# संस्कृतरचना

संस्कृतरचना

कक्षा
११



नेपालसर्वकारः
शिक्षाविज्ञानप्रविधिमन्त्रालयः
पाठ्यक्रमविकासकेन्द्रम्
सानोठिमी–भक्तपुरम्

# संस्कृतरचना

## कक्षा ११

नेपालसर्वकारः
शिक्षाविज्ञानप्रविधिमन्त्रालयः
पाठ्यक्रमविकासकेन्द्रम्
सानोठिमी–भक्तपुरम्

प्रकाशकः
**नेपालसर्वकारः**
**शिक्षाविज्ञानप्रविधिमन्त्रालयः**
**पाठ्यक्रमविकासकेन्द्रम्**
**सानोठिमी–भक्तपुरम्**

प्रस्तुतपाठ्यपुस्तकसम्बन्धिनः सर्वेऽधिकाराः पाठ्यक्रमविकासकेन्द्रस्य स्वामित्वेऽन्तर्निहितास्सन्ति । लिखितां स्वीकृतिं विनाऽस्य पुस्तकस्य पूर्णभागस्य अथवा एकांशस्य यथावत् प्रकाशनम्, परिवर्त्य प्रकाशनं तथा केनाऽपि वैद्युतेन साधनेन अन्येन प्रविधिना वा यन्त्रप्रयोगेण प्रतिलिपिनिस्सारणञ्च सर्वथा निषिद्धं वर्तते ।

**सर्वेऽधिकाराः प्रकाशकाधीनाः**

**प्रथमसंस्करणम् – २०७९**

# अस्मदीयं कथनम्

विद्यालयस्तरीयशिक्षामुद्देश्यप्रधानां व्यावहारिकीं सामयिकीं वृत्तिदायिनीं च विधातुं समये समये पाठ्यक्रम-पाठ्यपुस्तकविकास-परिमार्जनानुकूलनकार्याणि निरन्तरं सञ्चाल्यमानानि सन्ति । विद्यार्थिषु राष्ट्रराष्ट्रियते प्रति सम्मानभावनामुद्भाव्य नैतिकानुशासन-स्वावलम्बनादि-सामाजिक-चारित्रिक-गुणानामाधारभूत-भाषिकशिल्पस्य विकासपूर्वकं सहयोगात्मकस्य दायित्वपूर्णस्य चाचरणस्य विकासोऽद्यत्वे आवश्यको दृश्यते । अस्या एवावश्यकतायाः परिपूर्तये शिक्षासम्बद्धैर्महानुभावैः सम्मिलितानां गोष्ठीनामन्तःक्रियायाश्च निष्कर्षान्निर्मितं निर्मितं २०७९ तमस्य वैक्रमाब्दस्य पाठ्यक्रममनुसृत्य पुस्तकमिदं निर्मितं वर्तते ।

शिक्षा विद्यार्थिषु वर्तमानस्य ज्ञानपक्षस्यान्वेषणं विधाय शिक्षणशिल्पेन जीवनस्य सम्बन्धं स्थापयति । शिक्षया विद्यार्थिषु स्वाधिकास्य, स्वतन्त्रतायाः, समानतायाश्च प्रवर्धनाय, स्वस्थजीवनस्याभ्यासाय, तार्किकविश्लेषणेन निर्णयाय, वैज्ञानिकविश्लेषणेन व्यक्ति-समाज-राष्ट्राणां सबलविकासाय चाग्रेसरणशीलं सामर्थ्यं विकसनीयम् । एवं शिक्षातो नैतिकाचरणप्रदर्शिकायाः, सामाजिकसद्भावप्रवर्धिकायाः, पर्यावरणस्य सन्तुलनपूर्वकं प्रयोगं कर्तुं संवेदनशीलायाः, दृढशान्तिं प्रति प्रतिबद्धायाश्च व्यक्तेरपेक्षां समाजो विदधाति । तेन समाजसापेक्षतया ज्ञान-शिल्प-सूचना-सञ्चार-प्रविधीनां प्रयोगसमर्थाः, स्वावलम्बिनो, व्यावसायिकशिल्पाभ्यासजनिताः, राष्ट्रं राष्ट्रियतां राष्ट्रियादर्शं च प्रति सम्मानविधायकाः, समाजस्वीकार्याः, सदाचरणशीलाः, स्वसंस्कृति-संस्कारपालनपराः, परसंस्कृत्यादिषु सहिष्णवश्च नागरिकाः शिक्षया निर्मातव्याः । एवमेव कल्पनाशीलानां रचनाशिल्पिनाम्, नैरन्तरपरिश्रमेणोद्यमशीलानाम्, विचारे उदात्तानाम्, व्यवहारे आदर्शमयानाम्, सामयिकसमस्यानां व्यवस्थापने साफल्याधायकानाम्, स्वावलम्बिनाम्, देशभक्तानाम्, परिवर्तनोद्यतानाम्, चिन्तनशीलानाम्, समावेशिसमाजनिर्माणे योगदानं करिष्यमाणानां च नागरिकाणां निर्माणं शिक्षया विधातव्यमिति समाजस्यापेक्षा दृश्यते । इमानेव पक्षान् विचार्य 'राष्ट्रिय-पाठ्यक्रम-प्रारूप, २०७६' इत्यनुसारेण निर्मितस्य ११ कक्षायाः संस्कृतचनाविषयकपाठ्यक्रमस्याधोण पाठ्यपुस्तकमिदं विकसितं वर्तते ।

इदं पुस्तकं उपप्रा. रोहिणीराजः तिमिल्सिना, श्री शिवराजः लामिछाने, श्री गणेशः तिमिल्सिना, श्री पर्वतराजः घिमिरे, पुरुषोत्तमः घिमिरे-प्रभृतीनां महानुभावानां कार्यदलेन लिखितं सम्पादितञ्चास्ति । अस्य पाठ्यपुस्तकस्य लेखने पाठ्यक्रमसिद्धान्तसंरचनयोः नवीनतमधारणामनुसृत्य परम्परागतानां शिल्पानामनुसरणं कृतमस्ति । अस्मिन् कार्ये अस्य केन्द्रस्य महानिर्देशकः वैकुण्ठप्रसादः अर्याल, प्रा.डा. माधवशरणः उपाध्याय, प्रा.डा. आनन्दप्रसादः घिमिरे, प्रा.डा. ऋषिरामः पौडेल, श्री टुकराजः अधिकारी, प्रा.डा. ध्रुवप्रसादः भट्टराई, श्री निश्चलः अधिकारी, श्री केशवः भट्टराई, श्री नारायणः घिमिरे, श्री भीमप्रसादः खतिवडा-प्रभृतीनां महानुभावानां विशेषसहयोगो विद्यते ।

पाठ्यपुस्तकं शिक्षणप्रक्रियाया महत्त्वपूर्णसाधनं भवतीति नाविदितं शेमुषीमताम्। सानुभवाः शिक्षकाः, जिज्ञासवश्छात्राः, सविधिकर्मकराश्च पाठ्यक्रमलक्ष्यीकृतान् विषयान् नैकविधानां स्रोतसां साधनानाञ्चोपभोगेन अध्यापयितुमध्येतुं कर्म कर्तुं च प्रभवन्ति । अनेकैः कारणैः सर्वेष्वेव विद्यालयेषु सरलतया पाठ्योपकरणानामुपलब्धेरभावाद् अध्ययनकार्यं केवलं पाठ्यपुस्तकाश्रितं भवतीति तथ्यमात्मसात्कृत्य प्रस्तुतमिदं पाठ्यपुस्तकं यथासम्भवं स्तरयुतं विधातुं प्रयासो विहितः, तथापि पाठ्यपुस्तकेऽस्मिन् यत्र यत्र त्रुटयोऽल्पताश्च विदुषां दृष्टिपथमागच्छेयुस्तत्र तत्र परिष्कारे परिवर्धने च दृग्गोचरीभूतानां त्रुटीनां परिमार्जनादिकार्यजाताय परामर्शप्रदानविधौ शिक्षकच्छात्राभिभावकपाठकविशेषज्ञानां महती प्रभावकारिणी भूमिका भवति । अत एतेषु विषयेषु रचनात्मकपरामर्शदानेनोपकर्तुं पाठ्यक्रमविकासकेन्द्रमिदं तांस्तान् सर्वानेव महानुभावान् सप्रश्रयमभ्यर्थयते ।

**नेपालसर्वकारः**

**शिक्षाविज्ञानप्रविधिमन्त्रालयः**

**पाठ्यक्रमविकासकेन्द्रम्**

# विषयसूची


| पाठसङ्ख्या | शीर्षकम् | पृष्ठसङ्ख्या |
|---|---|---|
| प्रथमः | वैदिकवाङ्मयम् | १ |
| द्वितीयः | पम्पासरोवरवर्णनम् | १९ |
| तृतीयः | पत्राचारः | ३४ |
| चतुर्थः | कर्मसिद्धिः | ५२ |
| पञ्चमः | पितृभक्तिः | ८४ |
| षष्ठः | सन्देशाचारः | १०५ |
| सप्तमः | सङ्गतिफलम् | १२२ |

## प्रथमः पाठः

# वैदिकवाङ्मयम्

वेदः सर्वप्राचीनो विपुलतमश्च ज्ञानराशिर्वर्तते । विद्-धातोर्निष्पन्नस्य वेद-शब्दस्य अर्थो 'ज्ञानम्' अस्ति । तस्य मौलिकं तात्पर्यन्तु 'अध्यात्मविषयाणामन्वेषणम्' अस्ति । वेदश्छन्दोबद्धानां मन्त्राणां सङ्ग्रहो विद्यते । वेदमन्त्राणां रचना केनापि पुरुषेण न विहिता इति वेदोऽपौरुषेयो ग्रन्थो निगद्यते ।



प्राचीनसमये वेदो लिपिबद्धो नासीत् । तदानीं वेदविद्याया विस्तारोऽध्ययनाध्यापनाभ्यासाश्च श्रुतिपरम्परया भवन्ति स्म । शिष्या गुरुमुखात् श्रुत्वैव वेदमन्त्रान् कण्ठस्थान् कुर्वन्ति स्म । पश्चात् ते स्वशिष्याश्च तथैवाध्यापयन्ति स्म । इत्थं गुरुमुखाच्छ्रुत्वा वेदानामध्ययनस्य परम्परा विकसिता । अतो वेदः श्रुतिरित्यभिधीयते ।

वेदवाक्यान्यागमप्रमाणरूपेण स्वीक्रियन्ते । मन्त्ररूपो ब्राह्मणरूपश्चेति प्रधानतया वेदो द्विविधो वर्तते । वेदमन्त्राणां समूहः 'संहिता' कथ्यते । संहिता वेदस्य प्रथमो भागोऽस्ति । ब्राह्मणरूपो वेदभागस्तु

संहिताभागस्य व्याख्यारूपो विद्यते । अत्र 'ब्राह्मण'पदं ग्रन्थविशेषस्य वाचकमस्ति । ब्राह्मणग्रन्थोऽपि भागत्रये विभक्तोऽस्ति- ब्राह्मणम्, आरण्यकम्, उपनिषच्च । वेदस्य ब्राह्मणभागो यज्ञस्वरूपप्रतिपादको विद्यते । अयं गृहस्थाश्रमस्य कृत्यानां निर्देशनं करोति । आरण्यकं विज्ञानस्याध्यात्मज्ञानस्य च बोधकमस्ति । एतद् वानप्रस्थाश्रमस्य उपासनाविधिं शिक्षयति । उपनिषद्वात्मनः, वेदानां सारभूतानां सिद्धान्तानां च प्रतिपादकः संन्यासाश्रमस्य ज्ञानपरम्परानिदर्शको वेदभागो वर्तते ।

वेदाश्चत्वारः सन्ति- ऋक्, यजुः, साम, अथर्वश्चेति । महर्षिः कृष्णद्वैपायनश्चतुर्षु भागेषु वेदमन्त्राणां विभाजनमकरोत् । अतः स वेदव्यासनाम्ना ख्यातिमलभत । संहिताश्च चतस्रो भवन्ति- ऋक्संहिता, यजुःसंहिता, सामसंहिता, अथर्वसंहिता च । तथैव ब्राह्मणग्रन्था अपि प्रत्येकं वेदस्य पृथक् पृथक् सन्ति ।

मन्त्राणां स्वरूपभेदाद् वेदस्त्रिधाऽपि विभज्यते- ऋग्वेदः, यजुर्वेदः, सामवेदश्चेति । अतो वेदः 'त्रयी' इति नाम्नापि ख्यातो विद्यते । यज्ञप्रधाना एते त्रयो वेदा 'वेदत्रयी' कथ्यन्ते । अथर्ववेदस्तु सांसारिकविषयप्रधानो मन्यते, यद्यपि यज्ञसम्पादने अस्यापि महती भूमिका भवति । वेदत्रयी पारलौकिकं फलं ददाति, अथर्ववेदस्तु ऐहिकफलसाधने समर्थो वर्तते ।

ऋग्वेदो विश्वस्यादिमो ग्रन्थो विद्यते । 'ऋक्' इति देवानां स्तुतिपरकाणां छन्दोबद्धानां मन्त्राणां संज्ञा वर्तते । अत ऋचां समूह ऋग्वेदो निगद्यते । आयुर्वेद ऋग्वेदस्य उपवेदोऽस्ति । ऋग्वेदः स्तोत्राणां महान् निधिर्वर्तते । अत्र अशीत्यधिकपञ्चशतोत्तरदशसहस्रसङ्ख्यकाः (१०५८०) मन्त्राः सन्ति । अस्याधिकतराणां मन्त्राणामुपयोगो यज्ञेषु देवतानामाह्वानाय भवति । ऋग्वेदस्य मन्त्रपाठकः (मूलपुरोहितः/ऋत्विक्) 'होता' इत्युच्यते । अग्निर्ऋग्वेदस्य देवतास्ति । वेदव्यासो वेदविभागानान्तरं प्रथमतः ऋग्वेदस्य ज्ञानं स्वशिक्षायाय पैलाय ददौ, तेन पैल ऋग्वेदस्य प्रथम आचार्यो वर्तते । ऋग्वेदस्य एकविंशतिः शाखाः सन्ति । समग्रतः शाकलशाखैव लभ्यते । वाष्कल-आश्वलायन-साङ्ख्यायन-माण्डूकायनाख्याः शाखा आंशिकरूपेण लभ्यन्ते । अन्याः शाखास्तु विलुप्ताः प्रायेण ।

यजुर्वेदे यज्ञार्थमावश्यकाः पञ्चसतप्त्यधिकनवशतोत्तरसहस्रसङ्ख्यकाः (१९७५) मन्त्राः सङ्गृहीताः सन्ति । अतोऽयं वेदो यज्ञकर्मप्रधानो वर्तते । मन्त्राणां प्रकृत्यनुसारं यजुर्वेदो भागद्वये विभक्तोऽस्ति; शुक्लयजुर्वेदः, कृष्णयजुर्वेदश्च । शुक्लयजुर्वेदे केवलं मन्त्राणामेव विशुद्धतया प्रतिष्ठानं कृतं विद्यते । कृष्णयजुर्वेदे मन्त्रैः सह विनियोगवाक्यानि अपि सन्ति । तत्र मन्त्रब्राह्मणयोर्द्वयोरपि मिश्रीभावः कृतोऽस्ति । यजुर्वेदस्य ऋत्विक् (मूलपुरोहितः) अध्वर्युः कथ्यते । अध्वर्युरेव यज्ञस्य वास्तविकं विधानं करोति । यजुर्वेदस्य देवता वायुरस्ति । यजुर्वेदसम्बद्धः प्रथमो व्यासशिष्यो वैशम्पायनोऽस्ति । स एव यजुर्वेदस्य प्रथमाचार्यो वैशम्पायनो वर्तते । शुक्लयजुर्वेदस्य पञ्चदश, कृष्ण-यजुर्वेदस्य षडशीतिश्चेति यजुर्वेदस्य सैकशतं शाखा वर्तन्ते । तासु सम्प्रति शुक्लयजुर्वेदस्य माध्यन्दिनशाखा, काण्वशाखा चेति द्वे एवोपलभ्येते । कृष्णयजुर्वेदस्य च तैत्तिरीय-मैत्रायणी-कठ-कपिष्ठलाख्या चतस्र एव शाखाः समुपलभ्यन्ते । नेपाले विशेषतः शुक्लयजुर्वेदस्य माध्यन्दिनशाखाया अध्ययनाध्यापनपरम्परा दृश्यते । माध्यन्दिनशाखा वाजसनेयिनाम्नापि प्रसिद्धा वर्तते ।





शुक्लयजुर्वेदस्य शतपथब्राह्मणम्, कृष्णयजुर्वेदस्य तैत्तिरीयब्राह्मणञ्च प्रसिद्धौ ब्राह्मणग्रन्थौ स्तः। शुक्लयजुर्वेदस्य बृहदारण्यकम्, कृष्णयजुर्वेदस्य च तैत्तिरीयारण्यकमिति आरण्यकग्रन्थौ स्तः। यजुर्वेदस्य नवाधिकशतमुपनिषदः सन्ति। धनुर्वेदो यजुर्वेदस्योपवेदो मन्यते।

सामवेदो गानपरको वेदो वर्तते। अत्र सङ्गृहीता मन्त्राः स्वरबद्धा गेयाश्च सन्ति। ते मन्त्रा लयबद्धरूपेणोच्चस्वरेण च गीयन्ते। अत एव लौकिकगानविद्याया आदिमं स्रोतः सामवेद एव मन्यते। सा-रे-ग-म-प-ध-नि इति सङ्गीतस्य सप्तस्वराः सामवेदादेव गृहीताः सन्ति। सामवेदस्य ऋत्विग् (मूलपुरोहितः) उद्गाता कथ्यते। स उच्चैर्गिरा स्वरबद्धान् मन्त्रान् गायति। सामवेदस्य देवता आदित्यो वर्तते। वेदविभागानन्तरं सर्वप्रथमं जैमिनिर्व्यासात् सामवेदमधीतवानिति सामवेदस्य प्रथम आचार्यो जैमिनिर्मन्यते। सामवेदे पञ्चसप्तत्यधिकाष्टादशशतम् (१८७५) मन्त्राः सन्ति। तेषु अधिकतरा मन्त्रा ऋक्सामवेदयोः समाना दृश्यन्ते। सामवेदस्य सहस्रं शाखाः सन्ति किन्तु तास्वधिकतराः कालक्रमेण विलुप्ता अभवन्। विद्यमानासु शाखासु कौथुमीय-राणायनीय-जैमिनीयशाखाः प्रसिद्धाः सन्ति। सामवेदस्य आर्षेय-ताण्ड्य-षड्विंश-छान्दोग्य-जैमिनीय-भल्लवीत्यादयो ब्राह्मणग्रन्थाः सन्ति। सामवेदस्य छान्दोग्य-जैमिनीय-सामविधानादय आरण्यकग्रन्थाः प्रसिद्धा वर्तन्ते। अस्य सहस्रसङ्ख्यका उपनिषदः सन्ति। गान्धर्ववेदः सामवेदस्योपवेदः स्वीक्रियते।

अथर्ववेदोऽभिचारक्रियाप्रधानो वेदोऽस्ति । अस्य नामकरणमथर्वमुनेर्नाम्ना विहितमस्ति । अत्रस्था मन्त्रा मुख्यतोऽथर्वा, अङ्गिरा चेति ऋषिद्वयेन दृष्टाः (साक्षात्कृता) आसन् । अतोऽयं वेदोऽथर्वाङ्गिरोनाम्नापि ख्यातो विद्यते । अस्मिन् वेदे द्विविधा मन्त्राः सङ्गृहीताः सन्ति- अथर्वणा दृष्टाः शान्ति-पौष्टिककर्मसम्बद्धाः, अङ्गिरसा दृष्टा आभिचारिककर्मसम्बद्धाश्च । अतोऽयं वेदो लौकिकानां पारलौकिकानां च विषयाणां प्रतिपादको विद्यते । जीवनं सुखसमन्वितं विधातुं यानि साधनान्यपेक्ष्यन्ते तेषां सिद्ध्यर्थमस्मिन् वेदे विविधानामनुष्ठानानां विधानं विहितमस्ति । अयं वेदः स्वास्थ्यरक्षणस्य रोगनिवारणस्य चोपायान् शिक्षयति । अर्थशास्त्रस्य स्रोतोऽपि अथर्ववेद एव विद्यते । अस्य ऋत्विग् ब्रह्मा यज्ञस्याध्यक्षो भवति । तस्य प्रधानदायित्वं समस्तयज्ञकर्मणां निरीक्षणम्, सम्भाव्यत्रुटीनां मार्जनञ्च भवति । सोमोऽथर्ववेदस्य देवताऽस्ति । सुमन्तुरथर्ववेदस्याध्येता प्रथमो व्यासशिष्यः । अतोऽथर्ववेदस्य प्रथम आचार्यः सुमन्तुरेव । अथर्ववेदे सप्ताशीत्यधिकोनषष्टिशतसङ्ख्यका (५९८७) मन्त्राः सन्ति । गोपथमथर्ववेदस्य ब्राह्मणग्रन्थोऽस्ति । अस्य वेदस्यारण्यकग्रन्थो नास्ति । अस्य पञ्चाशदुपनिषदः सन्ति । स्थापत्यवेदोऽथर्ववेदस्योपवेदो मन्यते ।

वेदानां सम्यगवबोधाय वेदाङ्गानामध्ययनं नितरामावश्यकं भवति । शिक्षा, कल्पः, व्याकरणम्, निरुक्तम्, छन्दः, ज्योतिषम् इत्येतानि वेदाङ्गानि विद्यन्ते । षड्भिरङ्गैर्युतत्वाद् वेदः षडङ्गः कथ्यते । अङ्गशब्दस्यार्थः 'उपकारकः' इति । वेदार्थज्ञानाय येषां शास्त्राणामावश्यकता भवति तान्येव शास्त्राणि वेदाङ्गानि कथ्यन्ते ।

वैदिकवाङ्मयं संस्कृतवाङ्मयस्य प्राचीना ज्ञानधारा विद्यते । इदं वाङ्मयं न केवलं प्राचीनतममपितु समृद्धतमं विशालतमञ्च वर्तते । वैदिकवाङ्मयं पौरस्त्यानां ज्ञानविज्ञानसाहित्यकलादीनां स्रोतो विद्यते । वैदिकशब्दो वेदविषयकाणां बहुविधसामग्रीणां सूचको वर्तते । संहिताः, ब्राह्मणानि, आरण्यकानि, उपनिषदः, वेदाङ्गानि च वेदविषयकसामग्र्यः सन्ति । यद्यपि स्मृति-पुराण-दर्शनादिग्रन्थानामपि विषया वेदाधृताः सन्ति परन्तु तेषां परिगणनं लौकिकवाङ्मये भवति । वैदिकवाङ्मयमाधृत्यैव संस्कृतभाषायां लौकिकसंस्कृतवाङ्मयस्य प्रारम्भोऽभवत् । वैदिकवाङ्मये मानवजीवनोपयोगिनः सर्वेऽपि विषयाः साधु विवेचिताः सन्ति । वेदेषु ज्ञान-विज्ञान-धर्म-दर्शन-नीति-सदाचार-संस्कृति-समाज-राजनीतिप्रभृतीनां जीवनोपयोगिविषयाणां सन्निवेशो वर्तते । वस्तुतो वेदोऽस्माकं समाजस्य सांस्कृतिकनिधिरस्ति । अस्य संरक्षणाय प्रवर्धनाय च अस्माभिः प्रयतनीयम् । वैदिकवाङ्मयमाधृत्यैव वर्तमानानां ज्ञानानां परिज्ञानाय, उपयोगाय प्रचाराय च सर्वैः मनसा कर्मणा च प्रयासो विधातव्यो यतो हि सति वैदिकवाङ्मये एवास्माकं संस्कृतिः सभ्यता च सदाजीविनी भविष्यति ।

## अभ्यासः

### श्रवणं भाषणं च

१. **सखिमुखात् श्रुत्वाऽधस्तनानि पदानि अनूच्चारयत**

अध्ययनाध्यापनाभ्यासाः, वाङ्मयम्, ऋक्संहिता, वानप्रस्थाश्रमे, वाजसनेयिनाम्ना, ब्राह्मणग्रन्थः, सांसारिकविषयप्रधानः, छन्दोबद्धानाम्, आह्वानाय, वेदविषयकसामग्र्यः, तैत्तिरीयारण्यकम्, सन्निवेशः, अथर्ववेदः, वेदाङ्गानि

२. **सन्धिगतं पदं पृथक्कृत्य तयोरुच्चारणपूर्वकमुभयोर्ध्वनिगतपार्थक्यमनुभवत**

विपुलतमश्च, यद्यपि, विभाजनमकरोत्, त्रिविधोऽपि, अस्यापि, देवतानामाह्वानाय, प्रकृत्यनुसारम्, अध्वर्युरेव, नेति, नवाधिकशतम्, सन्तीति, वेदादेव, षडङ्गः ।

३. **अधस्तनं पद्यं मित्रं श्रावयित्वा वेदाङ्गानां नामानि पृच्छत**

शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषन्तथा ।

छन्दश्चेति षडङ्गानि वेदानां वैदिका विदुः ॥

४. **पदानां ध्यानेनोच्चारणं विधाय दन्त्यवर्णान् रेखाङ्कितान् कुरुत**

अथर्व, समूहः, वेदवाक्यानि, व्याख्यारूपम्, आरण्यकम्, भागत्रये, सङ्कलनम्, कृष्णद्वैपायनः, उद्गाता, कर्मसम्बद्धाः, अङ्गानि, वाङ्मयम् ।

५. **पाठस्य तृतीयानुच्छेदं वाचयित्वा कक्षायां सर्वान् श्रावयत ।**

६. **अधस्तनपदानां धातूपसर्गलकारकालप्रत्ययादीन् कथयत**

वर्तते, निगद्यते, श्रुत्वा, अकरोत्, ख्यातः, प्रतिष्ठानम्, गायति, उपलभ्येते, स्तुतिः, श्रुतिः, निष्पन्नः ।

७. **वेदानामध्ययनस्य अध्यापनस्य च परम्पराविषये स्वमतं प्रस्तुत ।**

८. **वेदानां प्राचीनतमत्वविषये स्वविचारं श्रावयत ।**

९. **अधस्तनपदानां विपरीतार्थबोधकपदं विलिख्य तद् वाक्ये च प्रयुज्य श्रावयत**

अपौरुषेयः, अपरम्, स्वीक्रियन्ते, उपयोगी, पारलौकिकम्, स्तुतिः, दृष्टाः, साधु ।

१०. **प्रदत्तस्यानुच्छेदस्य श्रवणेन तदनुवर्तिनां प्रश्नानामुत्तरं वदत**

अन्नाद् भवन्ति भूतानि पर्जन्यादन्नसम्भवः ।

यज्ञाद् भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ॥

यज्ञस्य महत्त्वं प्रतिपादयन्नुपनिषद्रूपायाः श्रीमद्भगवद्गीताया उपर्युक्तः श्लोको यज्ञस्यावश्यकतां सङ्केतयति । पौरस्त्यसमाजे यज्ञस्य महत्त्वं सर्वैः स्वीकृतमेव दृश्यते । यज्ञस्य पूर्णनिष्पादनाय चत्वार ऋत्विजो भवन्ति- होता, अध्वर्युः, उद्गाता, ब्रह्मा च । यज्ञेषु सम्बद्धवेदानां मन्त्रपठनकर्ता प्रमुखपुरोहितः ऋत्विगुच्यते । ऋग्वेदस्य होता, यजुर्वेदस्य अध्वर्युः, सामवेदस्य उद्गाता, अथर्ववेदस्य ब्रह्मा च यज्ञे स्वकीयविभागस्य नेतृत्वं कुर्वन्ति । होता देवानामाह्वानकर्ता अस्ति । स प्रक्रान्तदेवतानां प्रशंसायां रचितामृग्वेदसंहितामुच्चारयन् देवानाह्वयति । एतदुद्देश्यमभिलक्ष्य व्यासः पैलमुनिमृग्वेदमध्यापयामास । अध्वर्युर्विधिवद् यज्ञं सम्पादयति । यज्ञविधौ आवश्यका मन्त्रा यजुःसंहितायां सङ्गृहीताः सन्ति । व्यासो वैशम्पायनं यजुर्वेदमध्यापितवान् । उद्गाता उच्चैर्गिरा स्वरबद्धान् मन्त्रान् गायति । स्वरबद्धमन्त्राणां सङ्ग्रहः सामवेदे कृतो विद्यते । व्यासो जैमिनिमुनिं सामवेदमध्यापयत् । ब्रह्मा यज्ञस्य निरीक्षकः, त्रुटिसंशोधकश्च वर्तते । स एव यज्ञस्याध्यक्षो भवति । अस्य प्रधानकार्यं यज्ञकर्मणां निरीक्षणम्, सम्भावितत्रुट्या मार्जनं च भवति । एतदर्थं ब्रह्मणा सर्ववेदविदा भवितव्यम् । तेन मनसा बलेनापि सम्पन्नेन भवितव्यम् । तस्य ब्रह्मणः प्रधानवेदोऽथर्ववेदोऽस्ति । वेदव्यासः सुमन्तुमुनिमथर्ववेदमध्यापितवान् ।

(क) अन्नानि कुतो भवन्ति ?

(ख) भगवद्गीता किंरूपा वर्तते ?

(ग) पौरस्त्यसमाजे किं स्वीकृतम् ?

(घ) को मन्त्रान् गायति ?

(ङ) यज्ञस्याध्यक्षो ब्रह्मा किं किं कार्यं करोति ?

(च) सामवेदस्य ऋत्विक् केन नाम्ना व्यवह्रियते ?

(छ) व्यासस्य ऋग्वेदाध्यायी शिष्यः कः ?

(ज) देवतानामाह्वाने कस्याः संहिताया उपयोगो भवति ?

(झ) सुमन्तुः कस्य वेदस्याचार्यो वर्तते ?

(ञ) वेदव्यासः कं यजुर्वेदमध्यापितवान् ?

११. **पाठस्य तृतीयमनुच्छेदं श्रुत्वा एकपदेन प्रश्नानामुत्तरं वदत**

(क) वेदमन्त्राणां समूहस्य नाम किम् ?

(ख) वेदसंहितानां व्याख्यारूपो भागः किमुच्यते ?

(ग) ब्राह्मणभागः कतिषु भागेषु विभक्तोऽस्ति ?

(घ) आरण्यकं कस्य बोधकमस्ति ?

(ङ) 'उच्यते' इत्यस्य पर्यायवाचि क्रियापदं किम् ?

१२. **पाठस्य अन्तिममनुच्छेदं प्रवाच्य कक्षायां श्रावयत ।**

## पठनम्

**१. लेख्यचिह्नानि विचार्य पाठस्य चतुर्थं पञ्चमं चानुच्छेदं सस्वरं पठत ।**

**२. पाठस्य उपान्तिममनुच्छेदं पठित्वा तत्रत्यानि सन्धियुक्तपदानि चिह्नीकुरुत ।**

**३. पाठस्थं षष्ठमनुच्छेदं प्रवाहपूर्वकं पठित्वा विशेषणपदानि विशेष्यपदैः मेलयित्वा दर्शयत ।**

**४. पाठस्याष्टमानुच्छेदं द्रुतं पठत । तस्य च पुनः पुनः पठनं विधाय प्रतिवारं पठनगतिवर्धनाभ्यासं कुरुत ।**

**५. पाठस्य मौनपठनेनाज्ञातार्थानि पदानि सङ्कलयत । यथावश्यकं कोशस्य सखीनां गुरोर्वा सहायतया तदर्थबोधे जाते तेषां पदप्रयोगाभ्यासं च विधत्त ।**

**६. पाठं पठित्वा अच्सन्धियुतानि पदानि सङ्कलयत । तेषां सन्धिविभागं च कुरुत ।**

**७. पाठस्याष्टमानुच्छेदं पठित्वा अधस्तनप्रश्नानुत्तरयत**

(क) सामवेदः कीदृशः ?

(ख) सामवेदस्य लयेन गाने को हेतुः ?

(ग) सङ्गीते कियन्तः स्वरा भवन्ति ? के च ते ?

(घ) क उद्गाता निगद्यते ?

(ङ) सामवेदे कति मन्त्राः सन्ति ?

(च) सामवेदः कस्या आदिमं स्रोतः ?

(छ) सामवेदस्य देवताचार्यौ कौ ?

(ज) सामवेदस्य ब्राह्मणग्रन्थानां नामानि लिखत ।

(झ) सामवेदस्य कति शाखा आसन् ? तासु सम्प्रति उपलब्धाः काः ?

(ञ) गान्धर्ववेदः कस्य उपवेदः ?

(ट) अत्र 'सांसारिक' इत्यस्य समानार्थिरूपेण किं पदं प्रयुक्तमस्ति ?

(ठ) 'विलुप्तः' इत्यस्य धातूपसर्गप्रत्ययाः के ?

(ड) 'आदिमम्' इति विशेषणपदस्य विशेष्यं किम् ?

(ढ) अनुच्छेदस्य द्वितीये वाक्ये समागतस्य मन्त्रशब्दस्य त्रीणि विशेषणपदानि कानि ?

(ण) अनुच्छेदस्यान्तिमं वाक्यं कर्तृवाच्ये परिवर्तयत ।

८. **पाठस्यान्तिमानुच्छेदमाधृत्य पञ्चप्रश्नान् निर्मात ।**

९. **अधस्तनं गद्यं पठित्वा तदनुवर्तिप्रश्नानुत्तरयत**

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।**
**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥**
**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।**
**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥**

शिक्षा, कल्पः, व्याकरणम्, निरुक्तम्, छन्दः, ज्योतिषम् इत्येतानि वेदाङ्गानि सन्ति । एषां षण्णामङ्गानां सत्त्वाद् वेदः षडङ्ग उच्यते । अङ्गशब्देनोपकारकत्वं सूच्यते । वेदार्थज्ञानाय येषां शास्त्राणामावश्यकता भवति तान्येव शास्त्राणि वेदाङ्गानि कथ्यन्ते । अतो वेदाङ्गानि वेदानां सम्यगवबोधाय विरचितानि सन्तीति विज्ञायते । वेदाङ्गानि वैदिकोत्तरकाले विरचितानि सन्ति । वेदाङ्गेषु शिक्षा वेदस्य घ्राणम् (नासिका) वर्तते । कल्पो वेदस्य हस्तः अस्ति । व्याकरणं वेदस्य मुखं विद्यते । छन्दो वेदस्य पादः उच्यते । निरुक्तं वेदस्य श्रोत्रं कथ्यते । ज्योतिषं वेदस्य चक्षुर्मन्यते । अत एतेषामङ्गानामध्ययनानन्तरं वेदस्याध्ययने कृते एव वेदार्थस्य तन्निहितस्य विपुलज्ञानस्य च सम्यगवबोधः कर्तुं शक्यते ।

वेदाङ्गेषु शिक्षाग्रन्थस्य प्रमुखमुद्देश्यं वेदमन्त्राणां समुचितमुच्चारणं विद्यते । अत इदं वेदाङ्गमुच्चारणशास्त्रं वर्तते । वेदमन्त्राणां यथायथोच्चारणमत्यावश्यकं भवति । अतो वेदाध्ययने उदात्तानुदात्तस्वरितानां स्वरभेदानां तेषां शुद्धोच्चारणविधेश्च ज्ञानं परमावश्यकं भवति । अस्मिन् उच्चारणकर्मणि उपकारकं वेदाङ्गं शिक्षाग्रन्थरूपेण प्रसिद्धमस्ति । शिक्षासम्बन्धिनश्चानेके ग्रन्थाः सन्ति । तेषु ग्रन्थेषु वर्णानां पदानां वा शुद्धोच्चारणविधिः शिक्षितो विद्यते । वैदिकशिक्षाग्रन्थेषु ऋग्वेदस्य पाणिनीयशिक्षा सुप्रसिद्धा वर्तते । महर्षिपाणिनिना कृतोऽयं ग्रन्थो 'वर्णोच्चारणशिक्षा' इति नाम्नापि परिचीयते । एवमेव कृष्णयजुर्वेदस्य व्यासशिक्षा, शुक्लयजुर्वेदस्य याज्ञवल्क्यशिक्षा, सामवेदस्य गौतमी, लोमशी, नारदीया च शिक्षा, अथर्ववेदस्य माण्डूकीशिक्षा चेत्यादयः शिक्षाग्रन्था उपलब्धाः सन्ति । पाणिनीयशिक्षायां शिक्षाग्रन्थो वेदस्य नासिकारूपेण वर्णितो विद्यते ।

**प्रश्नाः**

(अ) **अनुच्छेदस्य प्राथमिकं वाक्यचतुष्टयमनुसृत्य प्रश्नानुत्तरयत**

(क) प्रथमे वाक्ये कर्तृपदं किम् ? तत्र का विभक्तिरस्ति ?

(ख) 'षडङ्गः' इति कस्य विशेषणम् ?

(ग) 'वेदः' इत्यत्र कः धातुः कश्च प्रत्ययः ?

(घ) 'उपकारकः' इत्यस्य धातूपसर्ग-प्रत्ययान् निर्दिशत ।

(ङ) 'षट् अङ्गानि' इत्यत्र सन्धिगतरूपं किम् ?

(च) 'कथ्यन्ते' इत्यत्र कस्य धातोः कस्य वाच्यस्य च क्रियापदं वर्तते ?

(छ) तृतीयचतुर्थवाक्ये सरलवाक्ये संश्लेषयत ।

**(आ) एकवाक्ये प्रश्नानुत्तरयत**

(क) अङ्गशब्दस्य कोऽर्थः ?

(ख) वेदाङ्गानि कति सन्ति ?

(ग) कल्पः कः ?

(घ) वेदाङ्गानि कदा विरचितानि ?

(ङ) शिक्षाग्रन्थस्य प्रमुखोद्देश्यं किम् ?

(च) पाणिनीयशिक्षा केन नाम्नाऽपि प्रसिद्धा ?

(छ) यजुर्वेदस्य प्रसिद्धा शिक्षा का ?

(ज) वेदस्य नासिकारूपो ग्रन्थः कः ?

**(इ) सङ्क्षेपेणोत्तरयत**

(क) वेदाङ्गानि विलिख्य तदध्ययनस्य प्रयोजनं निरूपयत ।

(ख) वेदस्य षडङ्गानि कानि ?

(ग) वेदाध्ययने केषां ज्ञानमावश्यकम् ?

(घ) शिक्षा विशेषतः किं शिक्षयति ?

(ङ) यजुर्वेदस्य प्रमुखाः शिक्षाः काः ?

**(ई) शिक्षा वेदस्य घ्राणरूपेण किमर्थं वर्णिता ?**

**१०. अधस्तनं श्लोकं पठित्वा शिक्षकसाहाय्येन नेपालिभाषायामर्थं प्रकाशयत**

छन्दोभूतमिदं सर्वं वाङ्मयं स्याद् विजानतः ।
नाच्छन्दसि न चापृष्टे शब्दश्चरति कश्चन ॥

**११. सारिणीं विलोक्य प्रश्नान् उत्तरयत**

| वेदः | शाखासङ्ख्या | प्रमुखाचार्यः | ऋत्विक् | प्रमुखदेवता | मन्त्रसङ्ख्या | उपवेदः |
|---|---|---|---|---|---|---|
| ऋक् | २१ | पैलः | होता | अग्निः | १०५८० | आयुर्वेदः |
| यजुः | १०१ | वैशम्पायनः | अध्वर्युः | वायुः | १९७५ | धनुर्वेदः |
| साम | १००० | जैमिनिः | उद्गाता | आदित्यः | १८७५ | गान्धर्ववेदः |
| अथर्व | ९ | सुमन्तुः | ब्रह्मा | सोमः | ५९८७ | स्थापत्यवेदः |

(क) सामवेदस्य कति शाखाः सन्ति ?

(ख) यजुर्वेदस्य प्रमुखाचार्यः कः ?

(ग) वायुः कस्य वेदस्य प्रमुखदेवता अस्ति ?

(घ) ऋग्वेदे कति मन्त्राः सन्ति ?

(ङ) यजुर्वेदस्य उपवेदः कः ?

(च) सामवेदस्य ऋत्विजो नाम किम् ?

## लेखनम्

१. **पदानामर्थप्रकाशनेन वाक्ये प्रयोगं प्रदर्शयत**

(क) ज्ञानराशिः (ख) मौलिकः (ग) गुरुमुखम् (घ) विभज्यते

(ङ) अधिकतमः (च) मिश्रीभावः (छ) विशेषतः (ज) अभवत्

(झ) अध्वर्युः (ञ) आदिमम् (ट) नामकरणम् (ठ) कथ्यन्ते

(ड) सम्यक् (ढ) विधातुम् (ण) उच्चैः ।

२. **सन्धिं विच्छिद्य सन्धिनाम लिखत**

वेदश्छन्दोबद्धः, श्रुत्वैव, वाक्यान्यागमप्रमाणानि, गृहस्थाश्रमः, त्रयो वेदाः, अतोऽयम्, यद्यपि, एवोपलभ्यते, नामकावारण्यकग्रन्थौ, अत एव, समाना दृश्यन्ते, जैमिनिरस्ति, तास्वधिकतराः, विलुप्ता अभवन्, सम्यगवबोधाय ।

३. **प्रदत्तसमस्तपदानां सविग्रहमर्थान् लिखत**

प्राचीनसमये, वेदविद्यायाः, गुरुमुखात्, यज्ञस्वरूपप्रतिपादकः, वानप्रस्थाश्रमे, स्वरूपभेदात्, यज्ञप्रधानाः, विनियोगवाक्यानि, अध्ययनाध्यापनपरम्परा, लौकिकगानविद्या, भागद्वयम्, सप्तस्वराः, आभिचारिककर्मसम्बद्धाः, ज्ञानविज्ञानसाहित्यकलादीनाम्, मानवजीवनोपयोगिनः ।

४. **अविस्तरेण पाठानुकूलमुत्तरं लिखत**

(क) वेदानामपौरुषेयत्वे को हेतुः ?

(ख) वेदस्य 'श्रुतिः' इति नाम कथं सञ्जातम् ?

(ग) संहिताब्रह्मणयोः को भेदः ?

(घ) ब्राह्मणग्रन्थः कस्याश्रमस्य कृत्यानि सूचयति ?

(ङ) कृष्णद्वैपायनस्य नाम वेदव्यास इति कथमभवत् ?

(च) वेदाः कीदृशानि फलानि प्रयच्छन्ति ?

(छ) ऋग्वेदः कः ? कश्च तस्योपवेदः ?

(ज) ऋग्वेदस्य कति शाखाः सन्ति ? तासु मुख्याः काः ?

(झ) यजुर्वेदे कियन्तो मन्त्राः सन्ति ?

(ञ) सामवेदो लौकिकगानविद्याया आदिमं स्रोतः । अत्र कारणं किम् ?

(ट) अथर्ववेदसम्बद्धा मन्त्राः कैर्दृष्टाः ?

(ठ) अथर्ववेदः कीदृशान् विषयान् प्रतिपादयति ?

(ड) वेदाङ्गानामध्ययनं किमर्थमपेक्ष्यते ?

(ढ) वेदविषयकसामग्र्यः काः ?

(ण) वेदेषु कीदृशानां विषयाणां सन्निवेशोऽस्ति ?

५. **अधस्तनप्रश्नान् नातिविस्तरेणोत्तरयत**

(क) पुरा वेदाध्ययनाध्यापनपरम्परा कीदृशी आसीत् ?

(ख) उपनिषत्सु मुख्यतः कीदृशा विषयाः समाविष्टाः सन्ति ?

(ग) ऋग्वेदः सर्वप्राचीनतमः सर्वविशालश्च वैदिको ग्रन्थः कथं मन्यते ?

(घ) शुक्लयजुर्वेदकृष्णयजुर्वेदयोर्मध्ये दृष्टं वैभिन्न्यं किम् ?

(ङ) अथर्ववेदस्य प्रयोजनं महत्त्वं च निर्दिशत ।

(च) लौकिकवाङ्मये केषां ग्रन्थानां परिगणनं भवति ? तेषां वेदेषु सम्बन्धश्च कः ?

(छ) वैदिकलौकिकवाङ्मययोः परिचयं तयोर्भेदञ्च निर्दिशत ।

६. **वेदा ज्ञानराशिरूपेण गृह्यन्ते । अत्र कारणं विविच्यताम् ।**

७. **वेदानामपौरुषेयत्वं श्रूयते । शास्त्रेष्वपि तथैव लिखितं प्राप्यते । अत्र स्वमतं स्फुटीकुरुत ।**

८. **पौरस्त्येषु धर्मसंस्कृतिकलावाङ्मयादिषु वेदानां कीदृशः प्रभावो वर्तते ? वर्णयत ।**

९. **लट्लकारस्य क्रियापदानि लङि परिवर्त्य पाठस्य प्रथमानुच्छेदस्य पुनर्लेखनं कुरुत ।**

१०. **'पौरस्त्यसंस्कृतौ वैदिकदर्शनस्य प्रभावः' इति विषये नातिदीर्घमनुच्छेदं लिखत ।**

११. **'सुरक्षिते वैदिकवाङ्मये एव अस्माकं संस्कृतिः सभ्यता च सदाजीविनी भविष्यति ।' इत्यस्य तात्पर्यं व्याख्यात ।**

१२. **'जलजन्तवः' इति विषयमवलम्ब्य अनुच्छेदमेकं रचयत ।**

१३. **पाठस्यान्तिमानुच्छेदस्य नेपालीभाषायामनुवादं कुरुत ।**

१४. **संस्कृतेऽनुवादं कुरुत**

हामी कृषिप्रधान देशका नागरिक हौं । प्रविधिमा आएको विकासले अहिले कृषिक्षेत्रमा अकल्पनीय

परिवर्तन आएको छ । विकसित देशमा त अहिले प्राचीन कृषिपरम्परा विस्थापित भएको छ । त्यहाँ अत्याधुनिक उपकरणहरू प्रयोगमा आएका छन् । हाम्रो देशका किसानहरू चाहिँ कृषिक्षेत्रमा आएको विकासबाट अनभिज्ञ छन् । त्यसैले यहाँका किसानहरू परम्परित कृषिप्रणालीमा निर्भर छन् ।

१५. **नेपालीभाषायामनुवादं कुरुत**

समाजः किल विविधजातिसम्प्रदायाचारविचारधर्मपरम्परावतां जनानां समूहो वर्तते । सर्वेषां सामाजिकसदस्यानामेकताबलेन समाजस्य समुन्नतिर्विधातुं शक्यते । समाजस्य शान्त्यै सुव्यवस्थायै च परस्परं सम्मानं, सहयोगः, सद्भावः, सहिष्णुता च नितरामपेक्ष्यन्ते ।

१६. **अधस्तनपदानामर्थं लिखत**

वेदः, सर्वप्राचीनम्, अध्वर्युः, सामसंहिता, वेदाङ्गम्, ऋत्विक्, गानम् ।

१७. **प्रदत्तसूत्राण्याधृत्य निबन्धं लिखित्वा समुचितं शीर्षकं च दत्त**

व्याकरणं वेदाङ्गेषु प्रमुखमङ्गम्,

'मुखं व्याकरणं स्मृतम्' इति शब्दशास्त्ररूपेण प्रसिद्धम्,

व्याकरणे शब्दव्युत्पादनम्,

धातुषु शब्देषु च प्रत्यययोजनेन शब्दनिर्माणम्,

समासादिप्रक्रियया शब्दानां व्युत्पादनम्,

लिङ्गानुशासनं व्याकरणस्य प्रमुखो विषयः,

व्याकरणाद् वाक्येषु कारकविभक्तीनां समुचितप्रयोगस्य ज्ञानम्,

धातु-शब्दरूपाणां निष्पादनाय तेषां समुचितप्रयोगाय च व्याकरणाध्ययनमावश्यकम्,

अर्थान्वेषणपूर्वकं शब्दसाधुत्वप्रकाशनं साध्वसाधुप्रयोगनिर्णयश्च व्याकरणस्य मूलभूतं प्रयोजनम्,

सन्धिव्यवस्था प्रकृति-प्रत्ययादीनां च समुचितं ज्ञानं व्याकरणेन विनाऽसम्भवम्,

वेदानां सम्यग्ज्ञानाय व्याकरणस्य ज्ञानमपरिहार्यम्,

इन्द्रः, चन्द्रः, काशकृत्स्नः, आपिशलिः, शाकटायनः, पाणिनिः, अमरः, जैनः इति एते संस्कृतभाषायाः प्रसिद्धा व्याकरणकाराः,

पाणिनिविरचितम् 'अष्टाध्यायी' सर्वप्रामाणिकं व्याकरणम्,

ग्रन्थोऽयं क्रमबद्धानां सूत्राणां सङ्ग्रहः,

पाणिनीयव्याकरणे वैदिकानां लौकिकानां च पदानां साधनम्,

शास्त्रमिदं सर्वविधशास्त्राणां संरक्षकमुपकारकं च ।

१८. **अधस्तनमनुच्छेदमाधारीकृत्य पञ्च प्रश्नान् निर्मात**

निरुक्तं नाम वेदाङ्गेष्वन्यतमम् । अस्य रचना महर्षिणा यास्केन विहितो वर्तते । अस्य ग्रन्थस्य प्रयोजनं वैदिकपदानां व्युत्पत्तिप्रतिपादनमस्ति । इदं शास्त्रं शब्दार्थयोर्मध्येऽर्थस्य प्रधानत्वं साधयति । ग्रन्थोऽयं निघण्टुनामकस्य ग्रन्थस्य टीकाग्रन्थो विद्यते । निघण्टुस्तु वैदिककोषोऽस्ति यत्र केवलं वैदिकाः शब्दाः परिगणिताः सन्ति । ग्रन्थेऽस्मिन् वेदमन्त्रेषु प्रयुक्तानां पदानामर्थज्ञानस्य प्रक्रिया वर्णिताऽस्ति । एकैकस्य पदस्य सम्भाविता अवयवार्था यत्र निःशेषेण उच्यन्ते तन्निरुक्तं कथ्यते । निरुक्तस्य सर्वमान्यमतमस्ति यत्- प्रत्येकं शब्दः केनाऽपि धातुना सह अवश्यमेव सम्बद्धो भवति । अतो निरुक्तानुसारेण सर्वे शब्दा व्युत्पन्ना भवन्ति । अन्यानि वेदाङ्गानि वेदस्य बहिर्भूतानि तत्त्वानि व्याकुर्वन्ति, तर्हि निरुक्तं वेदस्यान्तर्भूतानां तत्त्वानां च व्युत्पादनं करोति । अन्ये वेदाङ्गग्रन्थाः सूत्रशैल्यामुपनिबद्धाः प्राप्यन्ते परन्तु निरुक्तं गद्यशैल्यां निबद्धं विद्यते । निरुक्तं भाषाविज्ञानस्याधारग्रन्थोऽस्ति । अस्मिन् भाषाविज्ञानस्य सिद्धान्तानां वैज्ञानिकरीत्या निरूपणं कृतं विद्यते । यास्कात् पूर्वमपि अनेके निरुक्तकारा अभूवन् परन्तु इदानीं यास्कीयनिरुक्तमेवोपलब्धं विद्यते । महर्षिणा यास्केन स्वनिरुक्तग्रन्थे द्वादशानां निरुक्तकाराणां नामानि तेषां मतानि च निर्दिष्टानि सन्ति ।

## व्याकरणानुशीलनम्

### सन्धिज्ञानम्

### स्वरसन्धिः (अच्सन्धिः)

सन्धिः सामान्यतया त्रिविधा भवति– स्वरसन्धिः (अच्सन्धिः), व्यञ्जनसन्धिः (हल्सन्धिः), विसर्गसन्धिश्चेति । एतेषां मध्ये प्रमुखाणां नियमोदाहरणानि सन्ति । यथा–

**(क) यण्सन्धिः (इको यणचि)**

इकः (इ, उ, ऋ, लृ एतेषां वर्णानां) स्थाने अचि परे (अ, इ, उ, ऋ, लृ, ए, ओ, ऐ, औ एतेषु परवर्णेषु) क्रमेण य्, व्, र्, ल् एते (यणः) वर्णाः स्युः । यथा-

देवी + उपास्यः = देव्युपास्यः (ई-य्)
मनु + आलयः = मन्वालयः (उ-व्)
इति + एवम् = इत्येवम् (इ-य्)
भू + आदयः = भ्वादयः (ऊ-व्)
पितृ + अंशः = पित्रंशः (ऋ-र्)
लृ + आकारः = लाकारः (लृ-ल्)
मातृ + अंशः = मात्रंशः (ऋ-र्)
गौरी + अस्ति = गौर्यस्ति (ई-य्)

**(ख) गुणसन्धिः (आद् गुणः)**

अवर्णात् (अ, आ इति वर्णद्वयात्) इ, ई उ, ऊ, ऋ, लृ एतेषु वर्णेषु परेषु गुणसन्धिर्जायते । यथा-

रमा + ईशः = रमेशः (आ + ई = ए)

भास्कर + उदयः = भास्करोदयः (अ + उ = ओ)

भुवन + ईशः = भुवनेशः (अ + ई = ए)

चन्द्र + उदयः = चन्द्रोदयः (अ + उ = ओ)

राज + ऋषिः = राजर्षिः (अ + ऋ = अर्)

**(ग) वृद्धिसन्धिः (वृद्धिरेचि)**

अवर्णात् (अ, आ इति वर्णद्वयात्) ए, ऐ, ओ, औ एतेषु वर्णेषु परेषु वृद्धिसन्धिर्जायते । यथा -

तदा + एव = तदैव (आ + ए = ऐ)

कर्म + एव = कर्मैव (अ + ए = ऐ)

मम + ऐश्वर्यम् = ममैश्वर्यम् (आ + ऐ = ऐ)

जल + ओघः = जलौघः (अ + ओ = औ)

यथा + एव = यथैव (आ + ए = ऐ)

**(घ) सवर्णदीर्घसन्धिः (अकः सवर्णे दीर्घः)**

अ, आ, इ, उ एतेभ्यः वर्णेभ्यः सवर्णेष्वज्वर्णेषु परेषु पूर्वपरयोः स्थाने दीर्घएकादेशो भवति । यथा-

मुर + अरिः = मुरारिः (अ + अ = आ)

विद्या + आश्रमः = विद्याश्रमः (आ + आ = आ)

मुनि + इन्द्रः = मुनीन्द्रः (इ + इ = ई)

गिरि + ईशः = गिरीशः (इ + ई = ई)

श्री + ईशः = श्रीशः (ई + ई = ई)

सहस्रांशु + उदयः = सहस्रांशूदयः (उ + उ = ऊ)

रवि + इन्द्रः = रवीन्द्रः (इ + इ = ई)

## व्यञ्जनसन्धिः (हल्सन्धिः)

**(क) श्चुत्वसन्धिः (स्तोः श्चुना श्चुः)**

स् त् थ् द् ध् न् एतेषां वर्णानां परतः श् च् छ् ज् झ् ञ् एतेषु वर्णेषु कश्चिद् एको वर्तते चेत्तत्स्थाने क्रमशः श् च् छ् ज् झ् ञ् एते वर्णा आदिष्टा भवन्ति । यथा-

मुचुकुन्दस् + शेते = मुचुकुन्दश्शेते (स्-श्)          पुत्रस् + च = पुत्रश्च (स्-श्)

सत् + चित् = सच्चित् (त्-च्)

तत् + चित्तम् = तच्चित्तम् (त्-च्)

रिपून् + जय = रिपूञ्जय (न्-ञ्)

शत्रून् + जयति = शत्रूञ्जयति (न्-ञ्)

सद् + जनाः = सज्जनाः (द्-ज्)

जगद् + जनयित्री = जगज्जनयित्री (द्-ज्)

(ख) **ष्टुत्वसन्धिः (ष्टुना ष्टुः)**

स् त् थ् द् ध् न् वर्णानां परतः ष् ट् ठ् ड् ढ् ण् एतेषु वर्णेषु कश्चिद् एको वर्तते चेत्तत्स्थाने क्रमशः ष् ट् ठ् ड् ढ् ण् वर्णा आदिष्टा भवन्ति । यथा -

नारायणस् + षष्ठः = नारायणष्षष्ठः (स्-ष्)

रामस् + टीकते = रामष्टीकते (स्-ष्)

तत् + टङ्कनम् = तट्टङ्कनम् (त्-ट्)

पेष् + ता = पेष्टा (त्-ट्)

(ग) **अनुस्वारसन्धिः (मोऽनुस्वारः)**

पदान्तस्य मस्यानुस्वारादेशो भवति हलि परे (ह्, य्, व्, र्, ल्, ञ्, म्, ङ्, ण्, न्, झ्, भ्, घ्, ढ्, ध्, ज् ब्, ग्, ड्, द्, ख्, फ्, छ्, ठ्, थ्, च्, ट्, प्, क्, प्, श्, ष्, स्, ह् एतेषु परवर्णेषु) ।

गुरुम् + वन्दे = गुरुं वन्दे । (म् = ं )

मधुरम् + वद = मधुरं वद (म् = ं )

अहम् + पश्यामि = अहं पश्यामि (म् = ं )

कार्यम् + कुरु = कार्यं कुरु (म् = ं )

(घ) **जश्त्वसन्धिः (झलां जशोऽन्ते)**

पदान्तस्था झल्-वर्णाः (झ्, भ्, घ्, ढ्, ध्, ज् ब्, ग्, ड्, द्, ख्, फ्, छ्, ठ्, थ्, च्, ट्, प्, क्, प्, श्, ष्, स्, ह् एते) अवसाने सन्ति चेद् जश् (ज्, ब्, ग्, ड्, द्) भवति ।

अच् + आदिः = अजादिः । (च्-ज्)

सुप् + अन्तानाम् = सुबन्तानाम् । (प्-ब्)

जगत् + ईश्वरः = जगदीश्वरः । (त्-द्)

वाक् + ईश्वरी = वागीश्वरी । (क्-ग्)

षट् + आननः = षडाननः । (ट्-ड्)

## विसर्गसन्धिः

(क) **रुत्व-विसर्गसन्धिः (ससजुषो रुः । खरवसानयोर्विसर्जनीयः ।)**

पदान्तस्य सस्य 'रु' इत्यादेशो भवति । तस्य विसर्गादेशश्च जायते ।

मुनिस् – मुनि रु – मुनि र् – मुनिः । (स्- ः)

उमेशस् – उमेश रु – उमेश र् – उमेशः (स्- ः) ।

मुनयस् – मुनय रु – मुनय र् – मुनयः (स्- ः)

उमेशास् – उमेशा रु – उमेशा र् – उमेशाः (स्- ः)

(ख) **उत्व-विसर्गसन्धिः अतो रोरप्लुतादप्लुते, हशि च**

पदान्तस्य सस्य 'रु' इत्यादेशो भवति । तस्य रोः स्थाने अकारे परे अथवा हशि परे (ह्, य्, व्, र्, ल्, ञ्, म्, ङ्, ण्, न्, झ्, भ्, घ्, ढ्, ध्, ज् ब्, ग्, ड्, द् एतेषु परवर्णेषु) उकारादेशो भवति । तदनन्तरं गुणेन ओकारश्च भवति । अकारे परे पूर्वरूपश्च भवति ।

सस् + अपि = सोऽपि ।　　　　शङ्करस् + वन्द्यः = शङ्करो वन्द्यः ।

जनस् + अपि = जनोऽपि ।　　　　विद्यालयस् + अपि = विद्यालयोऽपि ।

**पाठे प्रयुक्तानां पदानां सन्धिविच्छेदः**

| **पदम्** | **सन्धिविच्छेदः** |
|---|---|
| सत्यं वद | सत्यम् + वद |
| मातृदेवो भव | मातृदेवः + भव |
| यान्यवद्यानि | यानि + अवद्यानि |
| यान्यस्माकम् | यानि + अस्माकम् |
| स्वाध्यायान्मा | स्वाध्यायात् + मा |
| त्वयोपास्यानि | त्वया + उपास्यानि |
| तथैव | तथा + एव |
| विपुलतमश्च | विपुलतमः + च |
| ज्ञानराशिर्वर्तते | ज्ञानराशिः + वर्तते |
| तात्पर्यन्तु | तात्पर्यम् + च |
| धातोर्निष्पन्नस्य | धातोः + निष्पन्नस्य |
| वेदोऽपौरुषेयः | वेदः + अपौरुषेयः |

| | |
|---|---|
| ग्रन्थो निगद्यते | ग्रन्थः + निगद्यते |
| नासीत् | न + आसीत् |
| इत्युच्यते | इति + उच्यते |
| गृहस्थाश्रमे | गृहस्थ + आश्रमे |
| विस्तारश्च | विस्तारः + च |
| द्विविधो वर्तते | द्विविधः + वर्तते |
| प्रथमो भागः | प्रथमः + भागः |
| उपनिषच्च | उपनिषत् + च |
| संन्यासाश्रमे | संन्यास + आश्रमे |
| उपनिषद् आत्मनः | उपनिषत् + आत्मनः |

१. **पाठस्याधस्तनपदानां सन्धिविच्छेदं कुरुत**

स्रोतो विद्यते = स्रोतः + विद्यते ।

सन्निवेशो वर्तते = .... + ... ।

यतो हि = ....... + ......।

सर्वेऽपि = ....... + ......।

निधिरस्ति = ..... + ...... ।

प्रारम्भोऽभवत् = ....... + ..... ।

वेदोऽस्माकम् = ....... + ......।

सूचको वर्तते = ....... + ...... ।

यद्यपि = ....... + ......।

वाङ्मयानन्तरम् ....... + .......।

२. **पाठस्याधस्तनपदानां सन्धिं कृत्वा लिखत**

इदम् + वाङ्मयम् = ...... ।

सुमन्तुः + आचार्यः = ........... ।

शब्दस्य + अर्थः .......... ।

ज्योतिषम् + इत्येतानि = ........।

षड् + अङ्गानि = .......।

षडङ्गः + वेदः = ........।

सम्यक् + अवबोधाय = ........।

पञ्चाशत् + उपनिषद् = ..........।

३. **पाठादुद्धृतानां पदानां सन्धिविच्छेदं कृत्वा सारिण्यां प्रदर्शयत–**

| **स्वरसन्धिः** | **व्यञ्जनसन्धिः** | **विसर्गसन्धिः** |
|---|---|---|
| यथा– प्रत्येकम्= प्रति+एकम् | | |

वेदभागोऽस्ति, संहिताश्च, प्रत्येकम्, स्वरूपभेदाद् वेदः, त्रिविधोऽपि, सामवेदश्च, नाम्नापि, अस्यापि, अथर्ववेदस्तु, विश्वस्यादिमः, ग्रन्थश्च, अस्याधिकतराणाम्, देवतास्ति, प्रकृत्यनुसारम्, कृष्णयजुर्वेदश्च, कृतोऽस्ति, अध्वर्युरेव, वायुरस्ति, आचार्योऽस्ति, चेति, एवोपलभ्येते, यजुर्वेदस्योपवेदः, गेयाश्च, सन्तीति, आदिमं स्रोतः, सामवेद एव, सामवेदादेव, उच्चैर्गिरा, आदित्यो वर्तते, सामवेदस्याचार्यः,

जैमिनिरस्ति, तास्वधिकतराः, सामवेदस्योपवेदः, वेदोऽस्ति, मुख्यतोऽथर्वा, ख्यातो विद्यते, सम्बद्धाश्च, अतोऽयम्, प्रतिपादको विद्यते, स्रोतोऽपि, ऋत्विग् ब्रह्मा, सोमोऽथर्ववेदस्य ।

## रचनात्मकं कार्यम्

१. **पाठाद् गृहीतैरधोलिखितैः सन्धियुक्तैः पदैर्नवीनानि वाक्यानि रचयत**

प्रत्येकम्, त्रिविधोऽपि, सामवेदश्चेति, नाम्नापि, अस्यापि, अथर्ववेदस्तु, विश्वस्यादिमः, ग्रन्थश्च, अस्याधिकतराणाम्, देवतास्ति, प्रकृत्यनुसारम्, कृष्णयजुर्वेदश्च, कृतोऽस्ति, अध्वर्युरेव, वायुरस्ति, आचार्योऽस्ति, चेति, एवोपलभ्येते, यजुर्वेदस्योपवेदः, गेयाश्च, सन्तीति, आदिमं स्रोतः ।

२. **वैदिकं वाङ्मयं प्रवर्ण्य स्वभाषयाऽनुच्छेदमेकं रचयत ।**

३. **मञ्जूषायाः साहाय्येन दशभिर्वाक्यैरधस्तनं चित्रं वर्णयत**

**यथा–**



दीपावलिपर्व, मनोहरं दृश्यम्, रङ्गवल्ली, भगिन्यौ, माता, मृद्दीपपुटकेषु, प्रज्वालयति, रचयतः, कार्पासदीपान्, संस्थाप्य, द्वाराणि, सुसज्जितानि, तैलञ्च स्थापयित्वा, मालाभिः

(क) **अत्र दीपावलिपर्वण उत्सवस्य चित्रमस्ति**

४. **वैदिकवाङ्मयस्य विषये वाक्यानि कर्गजपट्टे लिखित्वा स्वस्य कक्षाकोष्ठस्य भित्तौ श्लेषयत ।**

५. **स्वसंस्कृत्यनुसारमेकस्य पर्वणो वर्णनं कृत्वा लघुमनुच्छेदं विलिख्य शिक्षकं दर्शयत ।**

# पम्पासरोवरवर्णनम्



सौमित्रे शोभते पम्पा वैदूर्यविमलोदका ।
फुल्लपद्मोत्पलवती शोभिता विविधैर्द्रुमैः ॥
पुष्पभारसमृद्धानि शिखराणि समन्ततः ।
लताभिः पुष्पिताग्राभिरुपगूढानि सर्वतः ॥
प्रस्तरेषु च रम्येषु विविधाः काननद्रुमाः ।
वायुवेगप्रचलिताः पुष्पैरवकिरन्ति गाम् ॥
पतितैः पतमानैश्च पादपस्थैश्च मारुतः ।
कुसुमैः पश्य सौमित्रे क्रीडतीव समन्ततः ॥
इमानि शुभगन्धीनि पश्य लक्ष्मण सर्वशः ।
नलिनानि प्रकाशन्ते जले तरुणसूर्यवत् ॥
एषा प्रसन्नसलिला पद्मनीलोत्पलायुता ।
हंसकारण्डवाकीर्णा पम्पा सौगन्धिकायुता ॥
दीपयन्तीव मे कामं विविधा मुदिता द्विजाः ।
श्यामां चन्द्रमुखीं स्मृत्वा प्रियां पद्मनिभेक्षणाम् ॥



**प्रथमः श्लोकः**

## अन्वयः

सौमित्रे ! विविधैर्द्रुमैः शोभिता वैदूर्यविमलोदका फुल्लपद्मोत्पलवती पम्पा शोभते ।

**विग्रह-पर्याय-पदार्थाः**

सौमित्रे = हे लक्ष्मण !, विविधैः = अनेकैः, द्रुमैः = वृक्षैः, शोभिता (शुभ्+क्त+टाप्+सु) = भूषिता, वैदूर्यविमलोदका (वैदुर्यमिव विमलं वैदुर्यविमलम्, वैदुर्यविमलम् उदकं यस्याः सा वैदुर्यविमलोदका ।) = निर्मलजलयुक्ता, फुल्लपद्मोत्पलवती (पद्मानि च उत्पलानि च पद्मोत्पलानि, फुल्लानि पद्मोत्पलानि यस्यां सा) = पुष्पितकमलेन्दीवरान्विता, पम्पा = एतन्नामिका पुष्करिणी, शोभते = द्योतते ।

## कोशः

उदकम् - कबन्धमुदकं पाथः पुष्करं सर्वतोमुखम् ।
नलिनम् - वा पुंसि पद्मं नलिनमरविन्दं महोत्पलम् ।
द्रुमः - अनोकहः कुटः शालः पलाशी दुद्रुमागमाः।

## सरलार्थः

हे लक्ष्मण ! पम्पा पुष्पितकमलेन्दीवरान्विता अस्ति । एषा नानाविधैर्वृक्षैः सुशोभिता वर्तते । तत्रस्थं जलञ्च निर्मलमस्ति ।

**द्वितीयः श्लोकः**

## अन्वयः

समन्ततः पुष्पभारसमृद्धानि शिखराणि पुष्पिताग्राभिर्लताभिः सर्वत उपगूढानि सन्ति ।

**विग्रह-पर्याय-पदार्थाः**

समन्ततः = सर्वतः, पुष्पभारसमृद्धानि (पुष्पाणां भारः पुष्पभारः, तेन समृद्धानि) = कुसुमभारविलसितानि, शिखराणि = शृङ्गाणि, पुष्पिताग्राभिः (पुष्पितं कुसुमितम्, अग्रम् अग्रभागो यासां ताभिः) = विकसितकुसुमाग्राभिः, लताभिः = वल्लीभिः, सर्वतः = समन्ततः, उपगूढानि (उप+गुह्+क्त+जस्) = आच्छादितानि, सन्ति = वर्तन्ते ।

## कोशः

सर्वतः/समन्ततः - समन्ततस्तु परितः सर्वतो विष्वगित्यपि
पुष्पम् - स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं सुमम् ।

लता - वल्ली तु व्रततिर्लता ।

शिखरम् - कूटोऽस्त्री शिखरं शृङ्गम् ।

### सरलार्थः

हे लक्ष्मण ! पम्पासरोवरं परितः कुसुमभारयुक्तानि शिखराणि सन्ति, शिखराण्यपि वृद्धिं प्राप्ताभिः पुष्पिताभिर्लताभिः आच्छादितानि सन्ति ।

**तृतीयः श्लोकः**

### अन्वयः

वायुवेगप्रचलिता विविधाः काननद्रुमा रम्येषु प्रस्तरेषु च पुष्पैर्गाम् अवकिरन्ति ।

**विग्रह-पर्याय-पदार्थाः**

वायुवेगप्रचलिताः (वायोर्वेगः वायुवेगः, तेन प्रचलिता) = पवनप्रवाहकम्पिता, विविधाः = नानाविधाः, काननद्रुमाः (काननस्य द्रुमाः) = वनवृक्षाः, रम्येषु (रम्+यत्+सुप्) = मनोहरेषु, प्रस्तरेषु प्रस्तृणतीति प्रस्तरास्तेषु (प्र+स्तृ+अच+सुप्) = पाषाणेषु, च = अपि, पुष्पैः = कुसुमैः, गाम् = पृथ्वीम्, अवकिरन्ति = आच्छादयन्ति ।

### कोशः

वायुः - श्वसनः स्पर्शनो वायुर्मातरिश्वा सदागतिः ।

काननम् - अटव्यरण्यं विपिनं गहनं काननं वनम् ।

गौः - विपुला गह्वरी धात्री गौरिला कुम्भिनी क्षमा ।

प्रस्तरः - पाषाणप्रस्तरग्रावोपलाश्मानः शिला दृषत् ।

### सरलार्थः

पम्पासरोवरस्य समीपस्थेषु वनेषु वायुवेगेन कम्पिता वनवृक्षाः सन्ति । ते वनवृक्षास्तत्रस्थं पाषाणं पृथ्वीञ्च पुष्पसमूहैराच्छादयन्ति ।

**चतुर्थः श्लोकः**

### अन्वयः

समन्ततः पतितैः पतमानैः पादपस्थैः कुसुमैः सह मारुतः क्रीडति इव, पश्य ।

**विग्रह-पर्याय-पदार्थाः**

समन्ततः = सर्वतः, पतितैः (पत्+क्त+भिस्) = विगलितैः, पतमानैः (पत्+शानच्+भिस्) = अधो गच्छद्भिः, च = अपि, पादपस्थैः (पादपेषु तिष्ठन्तीति पादपस्थास्तैः) = वृक्षावस्थितैः कुसुमैः = पुष्पैः, मारुतः = वायुः, क्रीडति = रमते, इव = यथा, पश्य (दृश्+लोट्+सिप्) = अवलोकय ।

## कोशः

पादपः - वृक्षो महीरुहः शाखी विटपी पादपस्तरुः ।

मारुतः - समीरमारुतमरुज्जगत्प्राणसमीरणाः ।

कुसुमम् - स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं सुमम् ।

## सरलार्थः

हे लक्ष्मण ! पम्पासरोवरं समन्ततो वनस्थितेषु पाषाणेषु भूमिषु च पतितैः पतमानैश्च वृक्षस्थैः शोभनैः पुष्पैः सह वायुः क्रीडन्निव अस्ति, इति मनसि चित्रीकृत्य अवलोकय ।

**पञ्चमः श्लोकः**

## अन्वयः

हे लक्ष्मण ! शुभगन्धीनि इमानि नलिनानि जले सर्वशः तरुणसूर्यवत् प्रकाशन्ते, पश्य ।

**विग्रह-पर्याय-पदार्थाः**

हे लक्ष्मण ! = हे सौमित्रे ! = शुभो गन्धीनि (शुभगन्धो येषां तानि) = सुगन्धमयानि इमानि = एतानि पुरो दृश्यमानानि, नलिनानि = कमलानि, जले = सलिले, सर्वशः (सर्व+शस्) = सर्वथा, तरुणसूर्यवत् (तरुणश्चासौ सूर्यः, तरुणसूर्यः, तरुणसूर्येण तुल्यम्) युवार्क इव, प्रकाशन्ते = शोभन्ते, पश्य = तत्प्रकाशनं विलोकय ।

## कोशः

सूर्यः - सूरसूर्यार्यमादित्यद्वादशात्मदिवाकराः ।
भास्कराहस्करब्रध्नः प्रभाकरविभाकराः ॥

नलिनम् - वा पुंसि पद्मं नलिनमरविन्दं महोत्पलम् ।

तरुणः - वयस्यस्तरुणो युवा ।

जलम् - आपस्तु मूम्नि वार्वारि सलिलं कमलं जलम् ।

## सरलार्थः

हे लक्ष्मण ! पम्पासरोवरेऽवस्थितानि सुगन्धयुक्तानि कमलानि पश्य । तानि नलिनानि जले मध्याह्नकालिकसूर्यवत् प्रकाशितानि सन्ति ।

**षष्ठः श्लोकः**

### अन्वयः

एषा प्रसन्नसलिला पद्मनीलोत्पलायुता हंसकारण्डवाकीर्णा सौगन्धिकायुता पम्पा अस्ति ।

**विग्रह-पर्याय-पदार्थाः**

एषा = इयम्, प्रसन्नसलिला (प्रसन्नं सलिलं यस्याः सा) = स्वच्छजलसमन्विता, पद्मनीलोत्पलायुता (आ समन्ताद् युता आयुता, नीलानि च तानि उत्पलानि नीलोत्पलानि, पद्मानि च नीलोत्पलानि च पद्मनीलोत्पलानि, तैः आयुता), हंसकारण्डवाकीर्णाः (हंसाश्च कारण्डवाश्च हंसकारण्डवाः, तैः आकीर्णा), श्वेतगरुत्कारण्डवैर्व्याप्ता, सौगन्धिकायुता (सौगन्धिकया युता) = सौरभपूर्णा, पम्पा = पम्पाख्या पुष्करिणी अस्ति ।

### कोशः

सलिलम् - आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जलम् ।

हंसः - हंसास्तु श्वेतगरुतश्चक्राङ्गा मानसौकसः ।

### सरलार्थः

इयं स्वच्छजलयुक्ता, विविधकमलयुक्ता, अनेकविधैर्हंसैराच्छादिता, सुगन्धयुक्ता, पम्पा परिचयात्मिका पुष्करिणी अस्ति ।

**सप्तमः श्लोकः**

### अन्वयः

मुदिता विविधा द्विजाः श्यामां चन्द्रमुखीं पद्मनिभेक्षणां प्रियां स्मृत्वा (स्थितस्य) मे कामं दीपयन्ति ।

**विग्रह-पर्याय-पदार्थाः**

मुदिताः (मुद्+क्त+जस्) = हर्षिताः, विविधाः = नानाविधाः, द्विजाः = पक्षिणः, श्यामाम् = कृष्णाम्, चन्द्रमुखीं (चन्द्र इव मुखं यस्याः सा ताम्) = इन्दुवदनाम्, पद्मनिभेक्षणाम् (पद्मनिभे ईक्षणे यस्यास्ताम्) = कमलतुल्यनयनाम्, प्रियाम् = वल्लभाम्, स्मृत्वा = स्मृतिगतां विधाय स्थितस्य, मे = मम, कामम् = रतिम्, दीपयन्ति = प्रकटयन्ति ।

### कोशः

द्विजः - शकुन्तिपक्षिशकुनिशकुन्तशकुनद्विजाः ।

चन्द्रः - हिमांशुश्चन्द्रमाश्चन्द्र इन्दुः कुमुदबान्धवः ॥

## सरलार्थः

हर्षिता नानाविधाः पक्षिणः श्यामवर्णां कमलतुल्यनयनां प्रियतमां सीतां स्मरतो मम रतिभावं प्रकटयन्ति ।

## अभ्यासः

### श्रवणं भाषणं च

१. **पाठस्य पद्यानां लयोच्चारणपूर्वकं सामूहिकवाचनं कुरुत ।**

२. **पाठस्य पद्यानि क्रमेण श्रावयत ।**

३. **अधो निर्दिष्टानि पदानि स्पष्टमुच्चारयत**

(क) वैदूर्यविमलोदका
(ख) फुल्लपद्मोत्पलवती
(ग) पुष्पभारसमृद्धानि
(घ) पुष्पिताग्राभिः
(ङ) उपगूढानि
(च) पादपस्थैः
(छ) प्रसन्नसलिला
(ज) पद्मनीलोत्पलायुता
(ञ) शुभगन्धीनि

४. **अधः प्रदत्तस्य श्लोकस्यान्वयं श्रावयत**

**पतितैः पतमानैश्च पादपस्थैश्च मारुतः ।**
**कुसुमैः पश्य सौमित्रे क्रीडतीव समन्ततः ॥**

५. **अधस्तनस्य श्लोकस्यार्थं श्रावयत**

**इमानि शुभगन्धीनि पश्य लक्ष्मण सर्वशः ।**
**नलिनानि प्रकाशन्ते जले तरुणसूर्यवत् ॥**

६. **निर्दिष्टपदानां पर्यायान् सप्रमाणं कथयत**

काननम्, जलम्, पद्मम्, पुष्पम् , वायुः, चन्द्रः, मुखम्

७. **पाठस्य द्वितीयस्य श्लोकस्यान्वयं मित्रं प्रति पृच्छत, स्वयं च कथयत ।**

८. **प्रदत्तानां पदानां विग्रहं कुरुत**

शुभगन्धीनि, वैदूर्यविमलोदका, वायुवेगप्रचलिता, पद्मनिभेक्षणाम्, चन्द्रमुखीम्

९. **गद्यांशं श्रुत्वा वाल्मीकेर्योगदानविषये परस्परं विमृशत**

महर्षिर्वाल्मीकी रामायणस्य रचयिता अस्ति । अस्यर्षेर्विषये एका किंवदन्ती प्रचलिताऽस्ति ।

बाल्यकाले तस्य नाम रत्नाकर आसीत्। दुष्टानां संसर्गेण सोऽपि दुष्टोऽभवत्। पश्चान्नारदस्योपदेशेन स तपस्यायां लीनो भूत्वा महान् ऋषिरभवत्। तस्मिन् समये तस्य शरीरे वल्मीका गृहनिर्माणमकुर्वन्। अत एव तस्य नाम वाल्मीकिरभवत्।

रामायणे भगवतः श्रीरामस्य पूर्णं जीवनचरितमस्ति। अस्मिन् काव्ये पितुराज्ञापालनम्, आज्ञापालनम्, भ्रातृस्नेहः, परोपकारः, दीनरक्षा इत्यादीनि मानवजीवनस्य मूल्यानि वर्णितानि सन्ति। रामायणं संस्कृतभाषाया आदिकाव्यम्, महर्षिर्वाल्मीकिश्च आदिकविरस्ति। रामायणस्य रचनाकालः ईशवीयाब्दात् ५०० वर्षेभ्यः पूर्वमस्तीति आधुनिकाः समालोचकाः कथयन्ति।

## पठनम्

१. **लयमनुशील्याधस्तनं पद्यं सस्वरं वाचयत**

सौमित्रे शोभते पम्पा वैदूर्यविमलोदका।
फुल्लपद्मोत्पलवती शोभिता विविधैर्द्रुमैः॥

२. **प्रदत्तश्लोकस्य मौनपठनं विधायान्वयं कुरुत**

पुष्पभारसमृद्धानि शिखराणि समन्ततः।
लताभिः पुष्पिताग्राभिरुपगूढानि सर्वतः॥

३. **अधस्तनश्लोकं पठित्वा तदनुवर्तिनः प्रश्नानुत्तरयत**

विजेतव्या लङ्का चरणतरणीयो जलनिधि-
र्विपक्षः पौलस्त्यो रणभुवि सहायाश्च कपयः।
तथाप्येको रामः सकलमवधीत् राक्षसकुलं
क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे॥

## प्रश्नाः

(क) रामः कमवधीत्?

(ख) क्रियासिद्धिः कुत्र भवति कुत्र च न?

(ग) 'विपक्ष' इति पदं कस्य विशेषणम्?

(घ) जलनिधिरित्यस्य विग्रहं कुरुत।

(ङ) श्लोके प्रयुक्तं वृत्तं सलक्षणं निर्दिशत।

४. **प्रदत्तं संवादं पठित्वा प्रदत्तकार्याणि कुरुत**

## समयपालनम्

(दिनेशः अमरभारतीमाध्यमिकविद्यालये अष्टमकक्षायां पठति । अद्य विद्यालये अवकाशो वर्तते । प्रातः सप्तवादनसमयोऽस्ति । माता पूजाप्रकोष्ठाद् बहिरागता वर्तते । दिनेशो माता च वार्तालापं कुरुतः ।)

**दिनेशः –** मातः ! क्रीडनाय गच्छामि । सखायः क्रीडाक्षेत्रात् मामाह्वयन्ति ।

**माता –** इदानीमेव क्रीडितुं गच्छसि ! एष समयस्तु क्रीडायै उपयुक्तो नास्ति । त्वादृशेन विद्यार्थिना इदानीं पठितव्यं भवति ।

**दिनेशः –** मातः ! क्रीडनायैष समयः कथमुपयुक्तो नास्ति ? मम बहवः सखायोऽपि क्रीडाक्षेत्रे सम्प्राप्ताः सन्ति । अद्य तु विद्यालये अवकाश एव वर्तते । अवकाशस्य दिनेऽपि क्रीडनं किमर्थं निषिध्यते भवत्या ?

**माता –** पुत्र ! मम कथनस्य आशयस्तादृशो नास्ति । सर्वैर्जनैः सर्वाणि कार्याणि उपयुक्तसमये कर्तव्यानीति मम विचारः । त्वमपि समयस्य महत्त्वं जानीहि ।

**दिनेशः –** मातः, तर्हि मया सम्प्रति किं कर्तव्यं भवति ? गृहकार्यमपि ह्य एव समाप्तम् ।

**माता –** प्रातः क्रीडनात् पठनमुत्तमं भवति । इदानीमस्माकं मस्तिष्कमपि बाहुल्येन सक्रियं भवति ।

**दिनेशः –** मातः ! मस्तिष्कस्य सक्रियतायाः को लाभः ?

**माता –** बहवो लाभाः सन्ति । इदानीं यत् पठ्यते तत् स्थायि भवति । स्वच्छो विचार उद्भवति । पुत्र ! प्रातःकाले यत् क्रियते तेनादिवसं सर्वाणि कार्याणि प्रभावितानि भवन्ति । तपोधनैर्महर्षिभिरपि प्रातः कालस्य महत्त्वं विशेषेण वर्णितं वर्तते ।

**दिनेशः –** तदपि किञ्चित् श्रोतुमिच्छामि, मातः !

**माता –** समयोऽसौ अमृतवेला कथ्यते, अत्रामृतस्य अर्थोऽमृतमयो मूल्यवानिति जानीहि । अतः प्रातः कालो ध्यान-पठन-चिन्तन-मनन-प्रार्थनादिकार्याणां सम्पादनायोत्तमो मन्यते । एतदेव कारणमस्ति यत् पुरा तत्त्वविदो दार्शनिका महर्षयो ज्ञानिनो ध्यानिनश्च सूर्योदयात् प्रागेव जागरित्वा नित्यकर्म समाप्य चाध्ययने संलग्ना भवन्ति स्म ।

**दिनेशः –** स्वास्थ्यरक्षायै प्रातः कालः कीदृशोऽस्ति, मातः ?

**माता –** सर्वोत्तम एव मन्तव्यः पुत्र ! इदानीं मनः स्वच्छं शान्तं च भवति । शान्तमनसा मानसिकस्वास्थ्यं लभ्यते । तेन शारीरिकस्वास्थ्यस्यापि संरक्षणं भवति ।

**दिनेशः –** तर्हि क्रीडनं कदापि न कर्तव्यम् ? सर्वदा पठितव्यमेव ?

**माता –** पुत्र ! मम कथनस्याशयोऽयं नास्ति । पठनस्य समये पठनम्, भोजनस्य समये भोजनम्, क्रीडनस्य समये क्रीडनम्, शयनस्य समये च शयनं कर्तव्यमिति मम कथनस्याशयोऽस्ति । एतवच्च समयपालनमुच्यते ।

**दिनेशः –** मातः ! क्रीडनमपि आवश्यकमिति भवती वदति । मध्याह्ने क्रीडनं कीदृशं भवति ?

**माता –** मम विचारेण तु मध्याह्नेऽपि क्रीडनमुपयुक्तं न भवति । क्रीडनाय तु अपराह्णसमयः समीचीनो भवति । क्रीडनात् शरीरे स्फूर्तिर्जायते । तेन मनःशरीरे स्वस्थे भवतः ।

**दिनेशः –** अहमद्यदिनादेव समयपालनं करोमि । पठन-क्रीडन-शयनादीनि यथासमयं करोमि । सखीन् अपि परामृशामि ।

**माता –** शोभनम् पुत्र ! समयस्य परिपालको भव । सर्वाणि कार्याणि यथासमयं कुरु । ततः सदैव सफलो भविष्यसि ।

## कथनानि

**(क) असमीचीनानि कथनानि संशोध्य लिखत**

(अ) पुत्रो मातरं समयस्य महत्त्वं बोधयति ।

(आ) सखायः क्रीडाक्षेत्रे प्राप्ताः न सन्ति ।

(इ) प्रातः पञ्चवादने भोजनम् उचितं भवति ।

(ई) यदा दन्ता मलिना भवन्ति तदा धावनं कर्तव्यम् ।

(उ) मात्रा क्रीडनं निषिद्धं वर्तते ।

(ऊ) रात्रौ क्रीडनात् समयस्य सदुपयोगो भवति ।

**(ख) प्रदत्तप्रश्नानामुत्तराणि दत्त**

(अ) प्रातः कस्मात् किमुत्तमम् ?

(आ) किं समयपालनमुच्यते ?

(इ) केनादिवसं कार्याणि प्रभावितानि भवन्ति ?

(ई) प्रातःकाल केषां सम्पादनयोत्तमो मन्यते ?

(उ) कस्मिन् समये मस्तिष्कं बाहुल्येन सक्रियं भवति ?

**(ग) संवादमाधृत्य 'समयपालनम्' इति शीर्षकेऽनुच्छेदमेकं रचयत ।**

**५. अधो लिखितं गद्यांशं पठित्वा परस्परं विमृश्य पण्डितराजजगन्नाथस्य विषये स्वभाषया लिखत**

पण्डितराजो जगन्नाथस्तैलङ्गो ब्राह्मण आसीत् । पितुः पेरुभट्टस्य मातुर्लक्ष्म्याश्च पुत्रोऽसौ पितुः सकाशाद् विविधविद्या अधिगतवान्, यतो हि अस्य पिता सकलशास्त्रप्रवीणोऽद्वितीयो विद्वानासीत् । ज्ञानेन्द्रभिक्षुकाद् वेदान्तस्य, महेन्द्रनामकाद् विदुषो न्यायवैशेषिकयोः, खण्डदेवोपाध्यायात् पूर्वमीमांसायाः, शेषवीरेश्वराद् व्याकरणस्य चाध्ययनं कृतवानसौ वेदादिषु शास्त्रेष्वपि प्रवीण आसीदिति विदुषां विचारो । दर्शनशास्त्रे साहित्यशास्त्रे च स्वकीयं प्रावीण्यं प्रदर्श्य अनेन रसगङ्गाधरो व्यधायि । अस्य 'मनोरमाकुचमर्दिनी' इत्याख्यो व्याकरणग्रन्थोऽपि आसीत् । पण्डितराजो यवनशासकस्य शाहजहाँ इत्यस्य सभापण्डित आसीत् । इतिहासानुसारेण 'शाहजहाँ' इत्याख्यस्य

यवनसम्राजः शासनकालः १६२८ ईशवीयाब्दतः १६५८ ईशवीयाब्दकालिको वर्तते । अतो पण्डितराजोऽपि सप्तदशशतकस्य मध्यवर्ती प्रतीयते ।

स्वकीयेन प्रौढपाण्डित्येन पण्डितराजोपाधिना विभूषितोऽयं विशदविवेचनेन न्यायसम्मतपरीक्षणेन च काव्यतत्त्वानामुत्कृष्टलक्षणप्रदर्शने नितरां यतमान आसीत् । काव्यशास्त्रस्य प्रमाणभूतम् आलोचनातत्त्वमाधृत्यानेन पूर्वाचार्याणां मतानां परीक्षणं विहितमस्ति । पूर्वाचार्यमतेषु वर्तमानान् दोषान् निराकृत्यासौ निर्दुष्टलक्षणप्रतिपादनं विहितवान् । रसगङ्गाधरस्य माध्यमेन काव्यतत्त्वानि प्रदर्शयताऽनेन ग्रन्थे प्रौढपाण्डित्यपूर्णा भाषा प्रयुक्ता वर्तते । अतः सामान्यानां कृते कठिनोऽप्यस्य ग्रन्थो विषयप्रतिपादनेन, भाषया, शैल्या च प्रौढानां पण्डितानां चेत आहरति ।

६. **अधोलिखितं श्लोकं पठित्वा हिमालयस्य वर्णनं कुरुत**

अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः ।
पूर्वापरौ तोयनिधी वगाह्य स्थितः पृथिव्या इव मानदण्डः ॥

७. **अधस्तनं गद्यांशं पठित्वा काव्यविषये स्वाभिमतं प्रकटयत**

कस्यापि वस्तुनः स्वरूपं द्विविधं भवति बह्यमान्तरं च । तेन काव्यस्यापि बाह्यमान्तरं चेति द्विविधं स्वरूपं वर्तते । काव्यस्य बाह्यं स्वरूपं शब्दार्थरूपं भवति । कविरर्थस्य वर्णनं करोति, तन्माध्यमश्च शब्द एव । अतः शब्दार्थौ काव्यस्य शरीरत्वं भजतः । संसारे तादृशः कोऽपि ज्ञानविषयो नास्ति, यः शब्देन असम्बद्धः सन् सम्भवति । तेनाभिव्यक्तौ शब्दस्य प्राधान्यं स्वीकुर्वन्ति केचित् । पुनरन्ये अर्थबोधेन विना केवलं शब्दानां प्रयोगेणाभिव्यक्तेः साफल्याभावं प्रदर्श्य अर्थस्य प्राधान्यं साधयितुमुद्यता दृश्यन्ते । तेन काव्यसन्दर्भेऽपि शब्दार्थयोः प्राधान्याप्राधान्यविषये विदुषामैकमत्यं न प्राप्यते । केचित् शब्दस्यैव काव्यत्वं स्वीकुर्वन्ति चेत् केचित् शब्दार्थयोः काव्यत्वं स्वीकुर्वन्ति ।

८. **अधोलिखितं गद्यभागं पठित्वा शीर्षकं निर्धारयत**

शक्तिः कुत्र भवतीति विषये विदुषां नैकविधास्तर्काः श्रूयन्ते । केचिद् वदन्ति "शक्ती राज्यस्य उच्चपदेषु भवति ।" अन्ये एतदस्वीकृत्य तर्कयन्ति- "शक्तिस्तु बलशालिषु जनेषु भवति । इतरे पुनर्वदन्ति- "इयमायुधेषु सन्निहिता दृश्यते ।" एतेषां विचारे आयुधानां शक्तिरेव सर्वाः शक्तीर्जयति । परं भाषाशास्त्रिणां भिन्नविचारो वर्तते । एते शक्तिं शब्दाधृतां मन्वते । कस्यापि शब्दस्यार्थबोधिनी क्षमतैव शक्तिरस्तीति एतेषां सम्मतिरस्ति । शक्त्या विना शब्दोऽर्थबोधने क्षमो न भवतीति शब्दशास्त्रिणां प्रबलतर्को विद्यते ।

## लेखनम्

१. **कोष्ठस्थशब्दमाधृत्य रिक्तस्थानं पूरयत**

(क) भगवते विष्णवे तिलैः सह ..... समर्पय । (यव)

(ख) प्रहरी .......... निगृह्णाति । (चौर)

(ग) ........ व्याघ्रात् शावका बिभ्यति । (वन)

(घ) त्वया ....... पठितव्यः । (पाठ)

(ङ) ........ संलग्नो मा भव । (विवाद)

२. **अधस्तनपदानां विग्रहवाक्यं लिखत**

(क) पद्मनिभेक्षणाम् (ख) हंसकारण्डवाकीर्णा (ग) पुष्पभारसमृद्धानि

(घ) पुष्पिताग्राभिः (ङ) उपगूढानि (च) पादपस्थैः

(छ) प्रसन्नसलिला (ज) पद्मनीलोत्पलायुता (ञ) फुल्लपद्मोत्पलवती

(ट) वैदूर्यविमलोदका (ठ) तरुणसूर्यवत् (ड) शुभगन्धीनि

३. **सन्धिविच्छेदं कुरुत**

पुष्पैरवकिरन्ति, विविधैर्द्रुमैः, कारण्डवाकीर्णा, पादपस्थैश्च

४. **अधस्तनपद्ययोरन्वयं प्रदर्शयत**

पुष्पभारसमृद्धानि शिखराणि समन्ततः ।
लताभिः पुष्पिताग्राभिरुपगूढानि सर्वतः ॥
प्रस्तरेषु च रम्येषु विविधाः काननद्रुमाः ।
वायुवेगप्रचलिताः पुष्पैरवकिरन्ति गाम् ॥

५. **प्रदत्तानां पदानां प्रतिपदं द्वौ पर्यायौ निर्दिशत**

द्रुमः, मुदितः, हंसः, श्यामः, सूर्यः, उत्पलम्

६. **अधस्तनपद्ययोः भावार्थं लिखत**

पतितैः पतमानैश्च पादपस्थैश्च मारुतः ।
कुसुमैः पश्य सौमित्रे क्रीडतीव समन्ततः ॥
इमानि शुभगन्धीनि पश्य लक्ष्मण सर्वशः ।
नलिनानि प्रकाशन्ते जले तरुणसूर्यवत् ॥

७. **अर्थं लिखत**

एषा प्रसन्नसलिला पद्मनीलोत्पलायुता ।
हंसकारण्डवाकीर्णा पम्पा सौगन्धिकायुता ॥

८. **पाठस्याधारेण उत्तरं लिखत**

(क) कीदृशी पम्पा शोभते ?
(ख) लताभिः कानि उपगूढानि सन्ति ?
(ग) काननद्रुमाः किं कुर्वन्ति ?
(घ) मारुतः कैः क्रीडतीव ?
(ङ) का प्रसन्नसलिलाऽस्ति ?
(च) के कामं दीपयन्तीव ?
(छ) जले नलिनाति कथं प्रकाशन्ते ?

९. **सप्रसङ्गं व्याख्यात**

दीपयन्तीव मे कामं विविधा मुदिता द्विजाः ।
श्यामां चन्द्रमुखीं स्मृत्वा प्रियां पद्मनिभेक्षणाम् ॥

१०. **प्रदत्तस्य पद्यस्य गद्ये रूपान्तरणं कुरुत**

आदौ रामतपोवनादिगमनं, हत्वा मृगं काञ्चनम्
वैदेहीहरणं जटायुमरणं, सुग्रीवसम्भाषणम् ।
बालीनिर्दहनं समुद्रतरणं, लङ्कापुरीदाहनम्
पश्चाद्रावणकुम्भकर्णहननम्, एतद्धि रामायणम् ॥

११. **अधस्तनं गद्यभागं पठित्वा अस्य गद्यभागस्य त्रीणि सूत्रवाक्यानि कथयत**

मानवः परिवर्तनप्रेमी प्राणी वर्तते । स परिवर्तनं प्रति सदैवोत्सुको भवति । षट्चत्वारिंशदधिकद्विसहस्रतमस्य विक्रमवर्षस्य जनान्दोलनमपि नेपालिनां राजनीतिकपरिवर्तनस्य आकाङ्क्षायाः परिणाम आसीत् । तात्कालिकराजनीतिकव्यवस्थां प्रति प्रजाः सन्तुष्टा नासन् । तस्मिन् समये राजनीतिकमौलिकाधिकारा नियन्त्रिता आसन्, दलानि प्रतिबन्धितान्यवर्तन्त, तस्यां परिस्थितौ बहुशो नेपालिन ऐक्यबद्धा अभवन्। आराष्ट्रमान्दोलनं समचलत्। बहुदलीयशासनव्यवस्था पुनः स्थापिता । नेतारो दलानि च मुक्तिमलभन्त । वर्षावधौ संविधानं निर्मितम् । निर्वाचनं च सम्पादितम् । नेपालः प्राजातान्त्रिकदेशस्य रूपेण विदेशेषु च परिचितोऽभवत् । वैदेशिकी सहायता वर्धिता । शिक्षा-सञ्चार-यातायातक्षेत्रेषु महत् परिवर्तनं दृष्टम् । सर्वेऽधिकारानवसराँश्च प्राप्नुवन् ।

१२. **प्रदत्तगद्यांशतः पञ्च प्रश्नान् निर्माय तेषामुत्तराणि च स्वयं लिखत**

पञ्चविंशतिशतकानि व्यतीतानि, यदा शाक्यकुलावतंसः सिद्धार्थः स्वजन्मना इमां नेपालधरामलचञ्कार । पुरा वर्तमानलुम्बिनीप्रदेशस्य कपिलवस्तुजनपदे सुन्दरी नगरी आसीत् । राजा शुद्धोदनस्तत्र सुखेन राज्यशासनं सञ्चालयामास । शुद्धोदनस्य मायादेवीनाम्नी सती भार्याऽऽसीत् । सा मायादेवी सिद्धार्थनामानं सूनुमजनयत् । सिद्धार्थः शैशवकालादेव ज्ञानी विवेकी उत्सुकश्चासीत् । राजकुमारः सन्नपि स वैराग्यबोधेन बुद्धोऽभवत् । बहूनि वर्षाणि यावत् तपः कृत्वा सिद्धार्थः प्राणिनां दुःखस्य कारणं तन्निवारणस्योपायञ्च ज्ञातवान् । गौतमबुद्धस्य नाम्ना

लोकविश्रुतः सिद्धार्थो लोककल्याणाय चिरायोपादिशत् । बुद्धस्य उपदेशाः साम्प्रतमपि विभिन्नेषु देशेषु पठ्यन्ते पाठ्यन्ते च । स नेपालस्य गौरवं वर्तते ।

१३. **अधोलिखितं गद्यभागं पठित्वा शीर्षकं निर्धारयत**

विश्वस्य केषुचिद् देशेषु धार्मिकशिक्षा प्रदीयमाना वर्तते । स्वधर्म-भाषा-संस्कृति-परम्पराणां ज्ञानेन विना शिक्षा पूर्णतां न प्राप्नोतीति वितर्क्येयं शिक्षा प्रदत्ता वर्तते । नेपालेऽपि धार्मिकशिक्षाया आवश्यकताऽस्ति न वेति विषये विचारका विचारयन्ति । केचन तर्कयन्ति धार्मिकशिक्षया जनः शैशवकालादेव सभ्यः, आस्थावान् अनुशिष्टश्च भवति । अन्ये तर्कममुं खण्डयन्तो वदन्ति यद् धार्मिकशिक्षाया नाम्नि शैक्षिकजनशक्तिः सङ्कीर्णा न विधातव्या । केषाञ्चन विचारे धर्मः सर्वेषां हितं कामयते । मानवजीवनमपि अयमेव सार्थकं विदधाति । केषाञ्चन विचारे च धार्मिकशिक्षया जनाः परोपकारेषु संलग्ना भवितुं शक्नुवन्ति ।

१४. **अधो लिखितपद्यस्य वृत्तनिर्देशनं कुरुत**

न खलु गोपिकानन्दनो भवान्
अखिलदेहिनामन्तरात्मदृक् ।
विखनसार्थितो विश्वगुप्तये
सखउदेयिवान् सात्वतां कुले ॥

## व्याकरणानुशीलनम्

१. **लुङ्लकारस्य रूपाणि पठत**

**पठ्धातुः**

| **पुरुषः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | अपाठीत्, अपठीत् | अपाठिष्टाम्, अपठिष्टाम् | अपाठिषुः, अपठिषुः |
| मध्यमपुरुषः | अपाठीः, अपठीः | अपाठिष्टम्, अपठिष्टम् | अपाठिष्ट, अपठिष्ट |
| उत्तमपुरुषः | अपाठिषम्, अपठिषम् | अपाठिष्व, अपठिष्व | अपाठिष्म, अपठिष्म |

**सेव्धातुः**

| **पुरुषः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | असेविष्ट | असेविषाताम् | असेविषत |
| मध्यमपुरुषः | असेविष्ठाः | असेविषाथाम् | असेविढ्वम् |
| उत्तमपुरुषः | असेविषि | असेविष्वहि | असेविष्महि |

२. **भू-लिख्-दृश्-वृध्-लभ्-कृधातूनां लुङ्लकारस्य रूपाणि अन्विष्य लिखत ।**

३. **लुङ्लकारस्य क्रियापदानि प्रयुज्य स्वस्य दैनन्दिनीं लिखत ।**

४. **अधः प्रदत्तानामङ्-अप्-अच्-ल्युट्-क्तिन्-घञ्-युच्-प्रत्ययैर्निष्पन्नानां शब्दानां प्रयोगेण प्रतिपदं वाक्यमेकं रचयत**

अङ्- जॄ + अङ् (टाप्) = जरा

अप् - भू + अप् = भवः

अच् - चि + अच् = चयः

ल्युट् - पठ् + ल्युट् = पठनम्

क्तिन् - बुध् + क्तिन् = बुद्धिः

घञ् - हस् + घञ् = हासः

युच् - सु+पा+युच् = सुपानः

५. **वाक्यानि पठित्वा रेखाङ्कितशब्दानां प्रकृतिप्रत्ययविभागं कुरुत**

भगिनी कराभ्यां देवाय पुष्पमर्पयति ।

पवनो मन्दं सरति ।

पाण्डवानां जयस्तात कौरवेभ्यो न रोचते ।

चिन्तया स्वास्थ्यं क्षयं याति ।

अहं स्वास्थ्यरक्षणाय प्रातर्भ्रमामि ।

निरन्तरं पठनेन ज्ञानं वर्धते ।

विनाशकाले जनानां मतिर्भ्रष्टा भवति।

रामं विना का गतिः ?

दशरथस्य ज्येष्ठः पुत्रो रामोऽस्ति।

बहूनां जनानां संस्कृतेऽनुरागोऽस्ति।

शैत्येन शरीरे कम्पनं जायते ।

रवणः मरुभूमेर्यानमस्ति ।

गुरुकृपा शिष्यस्य जीवनं निर्माति ।

बालिका सत्सङ्गस्य रेखां निर्माति ।

६. **प्रदत्तानि पदानि केन प्रत्ययेन निष्पन्नानि सन्ति ? लिखत**

(क) चलनः (ख) श्रद्धा (ग) रागः

(घ) लवः (ङ) लयः (च) देवः

(छ) चोरः (ज) धारा (ञ) चूडा

(ट) गोधा (ठ) शब्दः (ड) गमनम्

७. **अधोलिखितं गद्यांशं कर्तृवाच्ये परिवर्त्य लिखत**

जनैः शिक्षा मानवाधिकारस्याङ्गं कथ्यते । शिक्षाया अभावेन नरः सर्वत्र वञ्च्यते । शिक्षा सर्वेषामवसराणामाधार इति शिक्षाविद्भिस्तर्कितम् । पुरा नारीभिश्च शिक्षाया अवसरः प्राप्तः । शिक्षायै अभिभावकवर्गेणाऽपि तत्परेण भूयते ।

८. **अधस्तनेऽनुच्छेदे केवलं कर्मवाच्यस्य वाक्यानि समुद्धरत**

अस्माकं देशेऽपि लक्षशो विद्यार्थिनः सन्ति । ते विद्यालयस्तरान्महाविद्यालय-विश्वविद्यालयस्तरं यावत् परिश्रमेण पठन्तः सन्ति । परं तेषां सर्वेषां क्षमता समाना न दृश्यते । केचन पुस्तकानि पठन्ति, तत्रत्यान् विषयाँश्च स्मरन्ति । कैश्चित् तु पुस्तकानि पठ्यन्ते, परं विषयवस्तु शीघ्रमेव विस्मर्यते । येन ध्यानेन पुस्तकं पठ्यते तेन उत्तमाङ्काः प्राप्यन्ते । एतादृशा अपि विद्यार्थिनो भवन्ति येऽपेक्षितान् अङ्कान् न प्राप्य चिन्तिता भवन्ति । परीक्षा विद्यार्थिनां प्रतिभाप्रदर्शन-सरणिर्वर्तते । यैः परीक्षायां सुष्ठु लिख्यते तैरेव साफल्यमवाप्यते । अस्माभिः परीक्षायां साफल्यस्यैतत् सूत्रमवगन्तव्यम् ।

९. **अधोलिखितं गद्यभागं भाववाच्ये परिवर्त्य पठत**

दीपको दिवा स्वपिति । स कारणं विनैव हसति । ह्योऽपि स सभायाम् उच्चैरहसत् । कदाचित् स चत्वरे एकाकी नृत्यति । सोऽद्य प्रातरपि तत्रानृत्यत् । स कदाचित् व्यर्थं प्रसन्नश्च भवति । दीपकः सहसा लज्जते च । अतो दीपकोऽद्भुतोऽस्ति ।

## रचनात्मकं कार्यम्

१. **सुरवाण्या स्वकीयैः शब्दैः पम्पापुष्करिण्या वर्णनं कुरुत ।**

# तृतीयः पाठः

## पत्राचारः

**दिनाङ्कः २०७८।११।०४**

**नारायणस्थानम्-५, काष्ठमण्डपः**

**समादरणीयाग्रज !**

**सादरं नौमि ।**

अहमत्र कुशलिनी अस्मि । परिवारश्च कुशली विद्यते । भवतोऽपि कौशलं कामयामहे । वैद्युतपत्रप्रेषणाय भवान् बहुवारमुक्तवान्, विविधैः कारणैर्मया पत्रसम्प्रेषणस्यावसरो लब्धो नासीत्, अद्य स्वप्रियमित्रस्य परशुनारायणस्य सहयोगेन वैद्युतं पत्रं प्रेषयितुमुद्यताऽस्मि । ममैतत् पत्रं भवतः प्रसादाय भवेदिति आशासे ।

भवतोऽध्ययनकार्यं तत्र सम्यगेव प्रचलतीति सर्वेषामस्माकं हृदि विश्वासो वर्तते । अत्र सर्वास्वपि परीक्षासु भवान् प्रथमं स्थानं लभते स्म, पारितोषिकाणि च प्राप्नोति स्म । विदेशं गत्वाऽप्यस्माकं पुत्रः सम्यगधीते, विशिष्टं च स्थानं लप्स्यत इति पित्रोर्विश्वासो दृश्यते । वार्ताप्रसङ्गेषु पिता सर्वदैव भवतो गुणकीर्तनं विधत्ते, माता च मातृसमाजे भवतो बहुशश्चर्चां विदधाति । किन्त्वेतेषु दिवसेषु तयोर्मनसि सन्देह उत्पन्नो दृश्यते । यदा पिता प्रतिवेशिनां समक्षे भवतो विषये सगर्वं वार्तां कुरुते, तदा जनाः पृच्छन्ति, "विदेशङ्गता बहुशो युवानः स्वदेशं नैव प्रत्यावर्तन्ते, किं भवतः पुत्र आगमिष्यति ?" इति । तच्छ्रुत्वा पिता खिन्नः सन् गृहं प्रत्यावृत्य उष्णं निःश्वस्य तूष्णीं तिष्ठति । सैन्यकर्मणा राष्ट्रसेवां विधाय निवृत्तजीवनं यापयतः पितुर्मनसि राष्ट्रप्रेम कियदस्तीति भवान् सम्यग् जानात्येव । विदेशेषु गत्वा स्वदेशे एवार्जितस्य शिल्पस्य, अधिगतायाश्च विद्याया उपयोगो राष्ट्रनिर्माणायैव विधेय इति तस्य दृढतमो विचार आवाभ्यां बाल्यादेव श्रुतो वर्तते ।

बहुभ्यो वर्षेभ्यः पूर्वं राष्ट्रभक्तेर्विषये सम्भाषणं विधाय प्रथमं स्थानं लब्ध्वा भवता पारितोषिकं पितुश्चरणयोः समर्पितमासीत् । हर्षाश्रुपरिपूरितनयनश्च पिता रामायणस्य राष्ट्रप्रेमविषयकं रामलक्ष्मणयोः संवादं श्रावितवानासीत् । भवतः सम्भाषणे व्यवहारे च पितुर्विचारस्य महान् प्रभावोऽवलोक्यते स्म । एतत्सर्वं स्मारं स्मारं पिता भवानवश्यमेव प्रत्यावर्तिष्यते इति विश्वसिति । किन्त्वन्येषां यूनां सङ्गत्या भवतो विचारो यदि परिवर्तितो भवेत्तर्हि किं विधीयेत ? इति चिन्ता तं पीडयति प्रतिदिनम् । भवादृशा कार्यकुशला

युवानः स्वदेशं परित्यज्य यदि विदेशेषु रमन्ते तर्ह्यस्माकं राष्ट्रस्य का गतिर्भवेत् ? राष्ट्रनिर्माणं कथं सम्भवेत् ? पितुः स्वप्नस्य वा का गतिः स्यात् ? साम्प्रतं विदेशङ्गता युवानः स्वदेशं नैव प्रत्यावर्तन्त इति स्मृत्वा चेखिद्यते पितुर्हृदयम् । अत एव भवन्तं संस्मृत्यापि स चिन्तामग्न इव जायते । किन्त्वहं जानामि; भवान् तथा न करोति । "मम पुत्रः सुपुत्रो वर्तते; राष्ट्रस्य कृते प्राणानपि सहर्षं समर्पयिष्यति" इति पितुर्वचनं भवान् मिथ्या न कारयतीति मे विश्वासः । "क्रिया केवलमुत्तरम्" इति स्वस्यादर्शवचनं स्मृत्वा भवान् शीघ्रमेव स्वदेशं प्रत्यावृत्य पितुः शङ्कां निवारयिष्यतीति आशासानाऽस्मि ।

बाल्यावस्थायां पिताऽस्माकं पुरतः पूर्वजानां वीरगाथां गायति स्म । तच्छ्रुत्वाऽवयोरपि हृदयस्य राष्ट्रभक्तिर्दृढा भवति स्म । राष्ट्रनिर्माणाय राष्ट्ररक्षणाय चास्माकं पूर्वजा प्राणान् अजुहवुः परं मातृभूमेः स्वाधीनतायाः सर्वदैव रक्षां व्यदधुः । पूर्वजानां कारणेनेयं भूमिः वीरप्रसूरिति विश्वस्मिन् प्रसिद्धाऽस्ति । वयं तादृशानां सन्ततयः स्मः ये कलापूजका आसन्, ये पराक्रमिण आसन्, ये उपदेष्टार आसन्, ये तपस्विनश्चासन् । स्वमहिमानं विस्मृत्य परदेशेषु गत्वा परेषां दासत्वं स्वीक्रियते चेदस्माकं पूर्वजा अस्मान् शपन्तीति पिता विचारयति । विद्यावारिधिपदवीं स्वीकृत्य यदा भवान् ग्रामे प्रत्यावर्तिष्यते तदा ग्रामीणास्ते स्वागतार्थं पुष्पमालामादाय स्वागतार्थमुपस्थिता भविष्यन्ति । तस्य क्षणस्य कल्पनयैव हर्षातिरेकेणाहं रोमाञ्चिताऽस्मि । एतच्छ्रुत्वा कार्यव्यापारे भवतः सोत्साहं प्रवृत्तिर्भवेदिति सदाशयं प्रकटयामि । भवतो विचारो महान् वर्तते, व्यवहारश्च समीचीनोऽस्ति । दूरभाषमाध्यमेन सञ्जालमाध्यमेन वाऽवश्यं चिन्तामग्नस्य पितुः शङ्कानिवारणाय भवान् यत्नं विधास्यतीति विश्वसिमि ।

शीघ्रमेवास्माकं परिवारे भवत उपस्थितिर्भविष्यतीति विश्वासं कृत्वा मेलनस्य समयं प्रतीक्ष्य स्थिताऽस्मि । भवतः प्रत्युत्तरमाशीर्वचनानि च वाञ्छामि । अद्य एतावतैव पत्रं विरमामि ।

भवतः प्रियभगिनी
ताशी शेर्पा

**मञ्जूषायाः प्रतिरूपम्**



## अभ्यासः

### श्रवणं भाषणं च

१. **शिक्षकमुखात् श्रुत्वा पदानि विच्छिद्योच्चारयत**

वैद्युतपत्रप्रेषणाय, पत्रसम्प्रेषणस्यावसरः, भवतोऽध्ययनकार्यम्, राष्ट्रनिर्माणायैव, पितुश्चरणयोः, हर्षाश्रुपरिपूरितनयनश्च, संस्मृत्यापि, तच्छ्रुत्वाऽवयोरपि, एतच्छ्रुत्वा, शीघ्रमेवास्माकम्

२. **पदानि श्रुत्वाऽर्थं कथयत**

कौशलम्, पारितोषिकाणि, प्रतिवेशिनाम्, राष्ट्रप्रेम, प्रत्यावर्तिष्यते, परित्यज्य, चिन्तामग्नः, आशासाना, राष्ट्ररक्षणाय, व्यदधुः, दासत्वम्, सोत्साहम्, प्रतीक्ष्य

३. **पाठेऽधो लिखितैः पदैर्निर्मितानि वाक्यान्वन्विष्य मित्रं श्रावयत**

विविधैः, प्रसादाय, मातृसमाजे, प्रत्यावृत्य, स्मारं स्मारम्, प्रतिदिनम्, आशासाना, वीरगाथाम्, सन्ततयः, हर्षातिरेकेण ।

४. **वाक्यानि श्रुत्वा एकवाक्येन सारांशं श्रावयत**

बाल्यावस्थायां पिताऽस्माकं पुरतः पूर्वजानां वीरगाथां गायति स्म । तच्छ्रुत्वाऽवयोरपि हृदयस्य राष्ट्रभक्तिर्दृढा भवति स्म । राष्ट्रनिर्माणाय राष्ट्ररक्षणाय चास्माकं पूर्वजाः प्राणान् अजुहवुः परं मातृभूमेः स्वाधीनतायाः सर्वदैव रक्षां व्यदधुः । पूर्वजानां कारणेनेयं भूमिः वीरप्रसूरिति विश्वस्मिन् प्रसिद्धाऽस्ति ।

५. **अधोलिखितस्यानुच्छेदस्य श्रवणेन रिक्तस्थानेषूपयुक्तानि पदानि वदत**

पत्रस्य विभिन्नानि स्वरूपाणि भवन्ति । तेषु नैजपत्रलेखनस्य परम्पराऽतीव प्राचीनाऽस्तीत्यनुमीयते । प्राचीनकाले कपोतादीनां पक्षिणां पादयोर्बद्ध्वा पत्रं प्रेष्यते स्म इति श्रूयते । सन्देशस्य सञ्चाराय पत्रमतीव महत्त्वपूर्णो माध्यमो विद्यते । यद्यपि पत्रलेखनस्य प्रारम्भः कदा बभूव इति निश्चित्य वक्तुं न शक्यते तथापि जनानामध्ययनस्याध्यापनस्य च विकासानन्तरमेव पत्रलेखनं प्रारब्धं स्यादित्यनुमानेन ज्ञातुं शक्यते । नैजपत्रस्य दक्षिणभागे सर्वोपरि दिनाङ्कानामुल्लेखो विधीयते । तस्याधोभागे पत्रलेखकस्य स्थानं लिख्यते । ततो निम्नभागे वामतः आदरसूचकेन शब्देन सह सम्बोधनं क्रियते । ततो वामत एव शिष्टाचार उपस्थाप्यते । तत्पश्चाद् कुशलादिकं पृष्ट्वा पत्रलेखनस्य कारणं सूच्यते । अनन्तरं च यस्मिन् विषये पत्रलेखनमारब्धं वर्तते स विषयो विस्तरेण वर्ण्यते । अन्त्यभागे तु पत्रं विरम्य स्वसम्बन्धं द्योतयित्वा पत्रलेखकस्य नामोल्लिख्यते । वैद्युतपत्रप्रेषणार्थं पत्रावरणस्य आवश्यकता न भवति । यदि पत्रं कार्यालयमाध्यमेन प्रेष्यते तर्हि नामस्थानसङ्केत आवश्यको भवति । पत्रावरणे प्रेषकस्य प्रापकस्य च समुचितं विवरणमुल्लिख्य पत्रं प्रेष्यते । अनया रीत्या पत्रलेखनं पूर्णं भवति ।

(क) ............ पत्रमतीव महत्त्वपूर्णो माध्यमो विद्यते ।

(ख) नैजपत्रस्य दक्षिणभागे सर्वोपरि ............ उल्लेखो विधीयते ।

(ग) वामतः ............ सह सम्बोधनं क्रियते ।

(घ) तत्पश्चात् ............ पत्रलेखनस्य कारणं सूच्यते ।

(ङ) अन्त्यभागे तु पत्रं विरम्य स्वसम्बन्धं द्योतयित्वा ............ नामोल्लिख्यते ।

**६. पत्रलेखनविधेर्विषये शिक्षकमुखात् श्रुत्वा कक्षायां स्वमतमुपस्थापयत ।**

**७. विकल्पान् श्रुत्वा पाठाधारेण उचितकथनं निगदत**

**(क)**

(अ) माता मातृसमाजे स्वस्य चर्चां विदधाति ।

(आ) माता मातृसमाजे भवतश्चर्चां विदधाति ।

(इ) माता मातृसमाजे मम चर्चां विदधाति ।

**(ख)**

(अ) अर्जितस्य शिल्पस्योपयोगो धनार्जनाय विधेयः ।

(आ) अर्जितस्य शिल्पस्योपयोगः स्वार्थपूरणाय विधेयः ।

(इ) अर्जितस्य शिल्पस्योपयोगो राष्ट्रनिर्माणाय विधेयः ।

**(ग)**

(अ) पित्रा महाभारतस्य देशभक्तिविषयकः प्रसङ्गः श्रावितः ।

(आ) पित्रा श्रीमद्भागवतमहापुराणस्य देशभक्तिविषयकः प्रसङ्गः श्रावितः ।

(इ) पित्रा रामायणस्य देशभक्तिविषयकः प्रसङ्गः श्रावितः ।

**(घ)**

(अ) बाल्यावस्थायां सोऽस्माकं पुरतः पूर्वजानां वीरगाथां गायति स्म ।

(आ) बाल्यावस्थायामेव सोऽस्माकं पुरतः पूर्वजानां ज्ञानगाथां गायति स्म ।

(इ) बाल्यावस्थायामेव सोऽस्माकं पुरतः पूर्वजानां हर्षगाथां गायति स्म ।

**(ङ)**

(अ) पूर्वजाः स्वाधीनताया रक्षां विधातुमसमर्था अभूवन् ।

(आ) पूर्वजाः पराधीनतां स्वीचक्रुः ।

(इ) पूर्वजाः स्वाधीनताया रक्षां व्यदधुः ।

(च)

(अ) भवान् विचारेण व्यवहारेण च सङ्कीर्णो वर्तते ।

(आ) भवान् विचारेण व्यवहारेण चाविवेकी वर्तते ।

(इ) भवान् विचारेण व्यवहारेण च महान् वर्तते ।

८. **अधस्तनं गद्यांशं श्रुत्वा शीर्षकं वदत**

बहुभ्यो वर्षेभ्यः पूर्वं राष्ट्रभक्तेर्विषये सम्भाषणं विधाय प्रथमं स्थानं लब्ध्वा भवता पारितोषिकं पितुश्चरणयोः समर्पितमासीत् । हर्षाश्रुपरिपूरितनयनश्च पिता रामायणस्य राष्ट्रप्रेमविषयकं रामलक्ष्मणयोः संवादं श्रावितवानासीत् । भवतः सम्भाषणे व्यवहारे च पितुर्विचारस्य महान् प्रभावोऽवलोक्यते स्म । एतत्सर्वं स्मारं स्मारं पिता भवानवश्यमेव प्रत्यावर्तिष्यते इति विश्वसिति । किन्तु अन्येषां यूनां सङ्गत्या भवतो विचारो यदि परिवर्तितो भवेत्तर्हि किं विधीयेत ? इति चिन्ता तं पीडयति प्रतिदिनम् । भवादृशा कार्यकुशला युवानः स्वदेशं परित्यज्य यदि विदेशेषु रमन्ते तर्ह्यस्माकं राष्ट्रस्य का गतिर्भवेत् ? राष्ट्रनिर्माणं कथं सम्भवेत् ? पितुः स्वप्नस्य वा का गतिः स्यात् ? साम्प्रतं विदेशङ्गता युवानः स्वदेशं नैव प्रत्यावर्तन्त इति स्मृत्वा चेखिद्यते पितुर्हृदयम् । अत एव भवन्तं संस्मृत्यापि स चिन्तामग्न इव जायते । किन्त्वहं जानामि; भवान् तथा न करोति । "मम पुत्रः सुपुत्रो वर्तते; राष्ट्रस्य कृते प्राणानपि सहर्षं समर्पयिष्यति" इति पितुर्वचनं मिथ्या न कारयतीति मे विश्वासः । "क्रिया केवलमुत्तरम्" इति स्वस्यादर्शवचनं स्मृत्वा भवान् शीघ्रमेव स्वदेशं प्रत्यावृत्य पितुः शङ्कां निवारयिष्यतीति आशासानाऽस्मि ।

९. **सन्धिविच्छेदं कृत्वा सन्धिनाम लिखत**

भवतोऽपि, सर्वास्वपि, बहुशश्चर्चाम्, विदेशङ्गताः, तच्छ्रुत्वा, भवतो विचारः, पितुर्हृदयम्, कल्पनयैव, रोमाञ्चिताऽस्मि ।

१०. **पाठाधारेण राष्ट्रभक्तिविषये स्वविचारान् कक्षायां श्रावयत ।**

## पठनम्

१. **पाठस्य तृतीयमनुच्छेदं सस्वरं पठत ।**

२. **पाठस्य द्वितीयमनुच्छेदं पठित्वा विशेषणपदानि सङ्कलयत ।**

३. **पाठस्य मौनपठनं विधाय क्लिष्टपदानि चिह्नीकुरुत ।**

४. **पाठादुत्तमपुरुषस्य क्रियापदानि सङ्कलय्य पठत ।**

५. **अधस्तनं गद्यांशं पठित्वा प्रश्नानुत्तरयत**

पत्रस्य विविधेषु स्वरूपेषु मध्ये एकं कार्यालयीयं पत्रमस्ति । कार्यालयीयं पत्रं निवेदनमप्युच्यते । कार्यालयीयं पत्रं कार्यालयस्य प्रयोजनार्थं प्रेष्यते । कार्यालयीये पत्रे नैजपत्रेष्विव कुशलवार्ता नैव प्रस्तूयते । अस्मिन् पत्रे निवेदकरूपेण स्वनाम लिख्यते परन्तु यस्मिन् कार्यालये पत्रं प्रेषणीयं भवति तस्य प्रमुखस्य नाम न लिख्यते, केवलं कार्यालयप्रमुखस्य पदस्य सङ्केतः क्रियते । पत्रेऽस्मिन् नैजपत्रस्येव दक्षिणभागे सर्वोपरि दिनाङ्कानामुल्लेखो विधीयते । तस्याधो वामभागे कार्यालयप्रमुखाय सम्बोधनं क्रियते । ततो निम्नभागे कार्यालयस्य नाम लिख्यते । ततश्च कार्यालयस्य स्थानमुल्लिख्यते । तदनन्तरमधोभागे विषयमुपस्थाप्य वामभागे 'महाशयाः' इति विलिख्य कार्यालयीयं पत्रं प्रारभ्यते । स्वकथनं स्वमतं वा प्रस्तुत्य पत्रे कार्यार्थं कार्यालयोऽनुरुध्यते । अन्त्ये च दक्षिणभागे निवेदकस्य नाम्नो गृहस्थानस्य चोल्लेखो भवति । एतादृशेषु पत्रेषु अनावश्यका विषया नोपस्थाप्यन्ते । यो विषय आवश्यको भवति तमेव लक्ष्यीकृत्य प्रयोजनं निर्दिश्य निवेदकः कार्यालयीयं पत्रं लिखति । निवेदनपत्रमधीत्य किं कर्तुं शक्यते तस्य कृते कार्यालयेन प्रयासो विधीयते । प्रेषितस्य निवेदनपत्रस्य उत्तरमावश्यकमस्ति चेत् सम्बद्धपक्षं प्रति कार्यालयोऽपि पत्रं प्रेषयति अन्यथा तत्सम्बद्धं कार्यं सम्पादयितुं कार्यालयस्तत्परो भवति । आधुनिके समाजे निवेदनपत्रं प्रमाणरूपेण संरक्ष्यते ।

**प्रश्नाः**

(अ) **अनुच्छेदाद् गृहीतं वाक्यं पठित्वा प्रश्नानुत्तरयत**

पत्रेऽस्मिन् नैजपत्रस्य इव दक्षिणभागे सर्वोपरि दिनाङ्कानामुल्लेखो विधीयते ।

(क) अस्मिन् वाक्ये प्रथमाविभक्तेः रूपं किम् ?

(ख) वाक्ये प्रयुक्तस्य क्रियापदस्य धातुः कः ?

(ग) पत्रेऽस्मिन् अस्य सन्धिविच्छेदं कुरुत ।

(घ) वाक्ये प्रयुक्तमेकमव्ययपदं किम् ?

(ङ) 'पत्रे' अस्य कारकं किं भवति ?

(च) वाक्यमिदं कस्मिन् वाच्येऽस्ति ?

(आ) **एकवाक्येनोत्तरं दत्त**

(क) कार्यालयीयं पत्रं किमुच्यते ?

(ख) कार्यालयीये पत्रे निवेदकरूपेण कस्य नाम लिख्यते ?

(ग) कार्यालयस्य निम्नभागे कस्योल्लेखो भवति ?

(घ) निवेदनपत्रे कुशलवार्ता आवश्यकी न वा ?

(ङ) कार्यालयः किं कर्तुं तत्परो भवति ?

(इ) **सङ्क्षेपेणोत्तरयत**

(क) कार्यालयीये पत्रे कस्य नाम लिख्यते, कस्य च न ?

(ख) निवेदनपत्रे दिनाङ्कान् लिखित्वा वामभागे किं किं लेखनीयम् ?

(ग) निवेदनपत्रं प्राप्य कार्यालयः किं करोति ?

(घ) निवेदनपत्रे आवश्यकविषयाः के ?

(ई) **अनुच्छेदमाधृत्य कक्षायां निवेदनपत्रलेखनशैलीविषये विमृशत ।**

६. **अधस्तनं संवादं पठित्वा प्रश्नानुत्तरयत**

(ताशी शेर्पा विद्यालयाद् गृहं प्रत्यागच्छन्ती आसीत् । परशुनारायणः चौधरी आपणाद् ग्रामं प्रति गच्छन्नासीत् । मार्गे तयोः मेलनम् अभवत् । ततः ताशी परशुनारायणं दृष्ट्वा सहैव गमनाय अन्वरुणत् ।

ताशी - परशुनारायण ! कुतः आगच्छन् असि ?

परशुनारायणः - आपणाद् आगच्छन्नस्मि । त्वं तु विद्यालयाद् आगच्छन्ती वर्तसे किमु ?

ताशी - आम्, सम्यगनुमितं त्वया । अद्याग्रजाय पत्रं प्रेषणीयमस्ति । अतोऽर्धदिवसस्यावकाशं गृहीत्वा शीघ्रं गृहं प्रत्यागच्छन्त्यस्मि ।

परशुनारायणः - पत्रप्रेषणाय अवकाशः किमर्थं ग्रहणीयः ? वैद्युतं पत्रं प्रेषय । आधुनिके युगेऽपि कथं काठिन्यमनुभवसि ?

ताशी - अहमन्तर्जालस्य प्रयोगे क्षमा नास्मि । त्वं तु जानासि किल ।

परशुनारायणः - अहं सर्वदैवान्तर्जालस्य प्रयोगेण वैद्युतं पत्रं प्रेषयामि । मम मातुलः क्यानडादेशे वर्तते । सोऽपि तत्रैव प्रत्युत्तरं प्रेषयति । साम्प्रतं तु विदेशं गत्वाध्ययनाय विद्यार्थिनोऽत्रैव स्थित्वा वैद्युतं पत्रं प्रेषयन्ति । तत्राध्ययनार्थं विश्वविद्यालयाननुरुन्धन्ति । ते च विद्यार्थिनां सर्वं विवरणमधीत्य कार्यं कुर्वन्ति ।

ताशी - तत्तु मयाऽपि श्रुतम् । तस्य कृते किं कर्तव्यं भवति ?

परशुनारायणः - वैद्युतपत्रप्रेषणाय पूर्वं जीमेल-हटमेल-याह्वित्यादिषु परिचयात्मकं सङ्केतनाम स्थापनीयम्, तत्र गोप्यसङ्केतोऽपि रक्षणीयः । यतोऽन्ये अस्माकं सन्देशान् द्रष्टुम्, तस्मादेव सङ्केतनाम्नः पत्रादिकं प्रेषयितुं च न शक्नुयुः ।

ताशी - अद्य गृहं गत्वा तव किमपि कार्यमस्ति न वा ? यदि नास्ति चेत् त्वं मम साहाय्यं कर्तुं शक्नोसि ? मम अग्रजोऽमेरिकादेशेऽध्ययनार्थं गतोऽस्ति । स मां वैद्युतपत्रप्रेषणाय वारं वारमुक्तवान् च, परन्तु सुसाङ्ख्ययन्त्रस्य प्रयोगो मम कृते सरलो नैवास्ति । अतो यदि समयोऽस्ति चेत्तस्य प्रयोगं मां शिक्षय ।

परशुनारायणः - अद्यैव समापनीयं कार्यं तु नास्ति । भवति तर्हि । अधुना त्वया सहैवाहं तव गृहं गच्छामि । तव मातापितरौ अपि मिलामि । तत एकं पत्रं तवाग्रजं प्रेषयित्वा गृहं गच्छामि । तव गृहाद् मम गृहं नातिदूरे विद्यते ।

ताशी - तर्हि शीघ्रं गच्छाव ।

(ततः गृहं गत्वा ताशी परशुनारायणस्य सहयोगेन अग्रजं प्रति पत्रं प्रेषितवती ।)

**प्रश्नाः**

(क) ताशी कुतो गृहं प्रत्यागच्छन्ती अस्ति ?

(ख) अर्धदिनस्यावकाशः केन गृहीतः ?

(ग) परशुनारायणः कीदृशं पत्रं प्रेषयितुमनुरुणद्धि ?

(घ) अन्तर्जालस्य प्रयोगे कः क्षमः ?

(ङ) वैद्युतपत्रस्य प्रयोगः कुत्र कुत्र भवति ?

(च) वैद्युतं पत्रं कथं प्रेषयितुं शक्यते ?

(छ) कोऽध्ययनार्थममेरिकादेशे गतः ?

(ज) सुसाङ्ख्ययन्त्रस्य प्रयोगः कस्य कृते सरलो नास्ति ?

(झ) परशुनारायणस्य कथनानुसारं स कौ मिलित्वा गृहं गच्छति ?

(ञ) ताशीपरशुनारायणयोर्गृहं कियद्दूरे वर्तते ?

७. **अधस्तनं गद्यांशं पठित्वा प्रश्नानामुत्तराणि दत्त**

बहुजातीयानां, बहुसांस्कृतिकानां, बहुधार्मिकाणां वा जनानां सम्मिश्रणेन समाजस्य निर्माणं भवति । समाजे स्थितानां सर्वेषामेक एव विचारः स्याद्, एकैव आस्था भवेदिति कल्पना व्यर्था भवति । मनुष्यास्तेषां वर्णधर्मानुसारेण संस्कारादीनुपसेवन्ते चेत् स्वसंस्कृतीनामवलम्बनं विधाय स्वस्य जीवनं यापयन्ति च । ते परम्परागतानि पर्वाणि मानयन्ति, श्रद्धाभावं प्रस्तुवन्ति, वाद्यादीनि वादयित्वा नृत्यं च प्रदर्शयन्ति । समाजे स्थिता अन्यजातीया मनुष्या अपरेषामेतादृशानि कार्याणि सहजतया स्वीकुर्वन्ति । अनया रीत्याऽन्येषां प्रचलनेषु प्रहारो न क्रियते चेत् सहिष्णुता सुदृढा भवति । यदि चान्येषां संस्कृतिषु हस्तक्षेपः क्रियते तर्हि तत्र सहिष्णुता न सङ्घटते । एकस्य सम्पूर्णो व्यवहारोऽपरस्मै न रोचते परन्तु तस्य विचारस्य सम्मानं कृत्वैव नेपाले सामाजिकसद्भावो

वर्धमानोऽस्ति । जनानां जातिसम्बद्धानां धर्मसम्बद्धानां कार्याणां सम्मानं कृत्वा समाजे सहिष्णुताया भावना प्रवर्धनीया । ये सङ्कीर्णमनसा चिन्तयन्ति तेषां कारणेन कुत्रचिदद्यापि असमानताया अवशेषा दृश्यन्ते । तन्निराकरणाय सर्वैः प्रयतनीयमेव । अस्माकं देशे सहिष्णुताया विभिन्नानि उदाहरणानि प्राप्तुं शक्यन्ते । काष्ठमण्डपस्यानेकेषु मन्दिरेषु नेवारजातीयाः पुरोहिताः सन्ति । मनःकामनामन्दिरे मगरजातीयः पुरोहितो वर्तते चेद् गढीमाईमन्दिरे थारुजातीयः पुरोहितो विद्यते । तथैव बुढासुब्बामन्दिरे किरातजातीयः पुरोहितोऽस्ति । अनेन प्रकारेणावलोक्यते चेन्नेपालः सामाजिकं सद्भावं वर्धयन्तस्मिन् संसारे सहिष्णुतायाः पाठं पाठयित्वा स्थितोऽस्ति ।

(क) कथं समाजो निर्मीयते ?

(ख) मनुष्याः कथं जीवनं यापयन्ति ?

(ग) सहिष्णुता कथं सुदृढा भवति ?

(घ) अस्माकं देशे सहिष्णुतायाः कान्युदाहरणानि सन्ति ?

(ङ) अनुच्छेदस्य सारं पञ्चभिर्वाक्यैः प्रकटयत ।

(च) सामाजिकसद्भावविषये कक्षायां विमृश्य सद्भाववर्धनाय के उपाया अवलम्बनीया इति स्वमतमुपस्थापयत ।

## लेखनम्

१. **वाक्येषु प्रयोगं कुरुत**

कुशली, सहयोगेन, प्राप्नोति, गुणकीर्तनम्, प्रतिवेशिनाम्, प्रत्यावृत्य, राष्ट्रप्रेम, दृढतमा, सङ्गत्या, परित्यज्य, चिन्तामग्नः, वीरगाथा, विस्मृत्य, दूरभाषमाध्यमेन, प्रतीक्ष्य

२. **अधस्तनानां प्रत्ययान्तानां शब्दानां प्रत्ययान् निर्दिशत**

कुशली, बहुशः, गताः, खिन्नः, निःश्वस्य, विधाय, प्रभावः, स्मारं स्मारम्, परित्यज्य, आशासाना, पराक्रमिणः, प्रतीक्ष्य

३. **'सुपुत्रः' अस्मिन् विषये एकमनुच्छेदं लिखत ।**

४. **पाठस्य प्रथमानुच्छेदाल्लट्लकारस्योत्तमपुरुषस्य रूपाणि सङ्कलय्य लृट्लकारे परिवर्तयत ।**

५. **अधस्तनं निवेदनपत्रं पठित्वा तदनुवर्तिप्रश्नानुत्तरयत**

**दिनाङ्कः २०७८।११।०४**

श्रीमन्तः प्राचार्याः,
आदर्शमाध्यमिकविद्यालयः,
मनहर्वा-४, बारामण्डलम् ।

**विषयः स्वच्छीकरणम् ।**

**महाशयाः,**

सविनयं निवेदयामि यद्, अस्माकं विद्यालयस्य पर्यावरणस्य स्वच्छताविषयश्चिन्तनीयो वर्तते । चत्वरेषु, कक्षाप्रकोष्ठेषु, उद्याने च यत्र तत्रावकराः प्रक्षिप्ताः सन्ति । विद्यालयपरिसरेऽवकरपात्राणां न्यूनता दृश्यते । यतो विद्यार्थिनो यत्र कुत्रापि अवकरान् प्रक्षिपन्ति । विद्यार्थिनामेतादृशो व्यवहारोऽनुशासनहीनतां द्योतयति । नियमनार्थं विद्यालयेन न काचिद् व्यवस्था विहिताऽवलोक्यते । आगन्तुका अस्माकं विद्यालयमागत्य प्रदूषितानि स्थानानि दृष्ट्वा किं चिन्तयन्तीति तु भवन्तो जानन्त्येव । अभिभावकदिवससमारोहश्च दिनपञ्चकात् पश्चाद् आयोजितो भविष्यति । अतो विद्यालयपरिसरस्य स्वच्छीकरणमत्यन्तमावश्यकमस्तीति मत्वा अनुशासनस्य पालनाय नियमानां कार्यान्वयार्थं, परिसरस्य च स्वच्छीकरणार्थमावश्यकीं व्यवस्थां विधातुं भवन्तोऽनुरुध्यन्ते ।

नवेदकः
हिमांशुः ठाकुरः
कक्षा - १२
क्रमाङ्कः - १५

**प्रश्नाः**

(अ) **एकपदेनोत्तरयत**

(क) विद्यालयः कस्मिन् मण्डलेऽस्ति ?

(ख) निवेदनपत्रस्य विषयः कोऽस्ति ?

(ग) निवेदकस्य नाम किम् ?

(घ) निवेदकः कतमस्यां कक्षायां पठति ?

(आ) **एकवाक्येनोत्तरयत**

(क) कुत्र कुत्रावकराः प्रक्षिप्ताः सन्ति ?

(ख) विद्यार्थिनां व्यवहारः किं द्योतयति ?

(ग) अभिभावकदिवससमारोहः कदा आयोजितो भविष्यति ?

(घ) प्राचार्याः किमर्थमनुरुध्यन्ते ?

(इ) **भाषिककार्यं कुरुत**

(क) 'अभ्यागताः' अस्य पर्यायपदमनुच्छेदादुद्धृत्य लिखत ।

(ख) 'दिनेभ्यः' अस्य विभक्तिं वचनं च निर्दिशत ।

(ग) 'मत्वा' अस्य निर्माणप्रक्रियां प्रदर्शयत ।

(घ) 'कर्तुम्' अस्मिन्नर्थेऽनुच्छेदे किं पदं प्रयुक्तम् ?

६. **पितृव्यस्य विवाहस्य कारणं सूचयित्वा दिनद्वयस्यावकाशार्थं प्राचार्यमनुरुध्य निवेदनपत्रमेकं लिखत ।**

७. **पाठमाधृत्य विदेशे निवसन्तं मातुलमावश्यकानि उपकरणानि प्रेषयितुमनुरुध्य एकं पत्रं लिखत ।**

८. **सोनामः ताश्याः पत्रस्य प्रत्युत्तरं कथं लिखतीति विचिन्त्यैकं पत्रं लिखत ।**

९. **यदि त्वं सोनामोऽसि चेत् पितुः शङ्कानिवारणार्थं किं करोषि ? अनुच्छेदमेकं रचयत ।**

१०. **त्वं पितृरूपेण सोनामाय कं सन्देशं प्रयच्छसि ? स्वमतं प्रकटयत ।**

## व्याकरणानुशीलनम्

१. **मतुप्-प्रत्ययप्रयोगः**

मतुप्-प्रत्ययः तद्धितप्रत्ययो वर्तते । अतः केवलं शब्देष्वस्य प्रत्ययस्य प्रयोगो विधीयते । मतुप्-प्रत्ययान्तपदं प्रकारद्वयेनार्थं द्योतयति - (तद्) अस्य अस्ति ।
(तद्) अस्मिन् अस्ति ।

मतुप्-प्रत्ययस्य प्रयोगेण निम्नानुसारेण शब्दा निष्पद्यन्ते

धन + मतुप् - धनवत् गुण + मतुप् - गुणवत् दया + मतुप् - दयावत्
रूप + मतुप् - रूपवत् विद्या + मतुप् - विद्यावत् बुद्धि + मतुप् - बुद्धिमत्
शक्ति + मतुप् - शक्तिमत् श्री + मतुप् - श्रीमत् भक्ति + मतुप् - भक्तिमत्
हनु + मतुप् - हनुमत्

सामान्यतया अकारान्तशब्देषु, आकारान्तशब्देषु, हलन्तशब्देषु च यदि मतुप्-प्रत्ययस्य प्रयोगः क्रियते चेद् 'वत्' इति शब्दान्ते युज्यते परन्तु अन्येषु शब्देषु मतुप्-प्रत्ययस्य प्रयोगे 'मत्' इति योजनीयम् । मतुप्-प्रत्ययान्तशब्दानां रूपाणि त्रिषु लिङ्गेषु भवन्ति ।

| पुँल्लिङ्गम् | स्त्रीलिङ्गम् | नँपुसकलिङ्गम् |
|---|---|---|
| धनवान् | धनवती | धनवत् |
| गुणवान् | गुणवती | गुणवत् |

| | | |
|---|---|---|
| दयावान् | दयावती | दयावत् |
| रूपवान् | रूपवती | रूपवत् |
| विद्यावान् | विद्यावती | विद्यावत् |
| बुद्धिमान् | बुद्धिमती | बुद्धिमत् |
| शक्तिमान् | शक्तिमती | शक्तिमत् |
| श्रीमान् | श्रीमती | श्रीमत् |
| भक्तिमान् | भक्तिमती | भक्तिमत् |
| हनुमान् | हनुमती | हुनमत् |

**मतुप्–प्रत्ययान्तशब्दस्य पुँल्लिङ्गस्य रूपाणि**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | धनवान् | धनवन्तौ | धनवन्तः |
| द्वितीया | धनवन्तम् | धनवन्तौ | धनवतः |
| तृतीया | धनवता | धनवद्भ्याम् | धनवद्भिः |
| चतुर्थी | धनवते | धनवद्भ्याम् | धनवद्भ्यः |
| पञ्चमी | धनवतः | धनवद्भ्याम् | धनवद्भ्यः |
| षष्ठी | धनवतः | धनवतोः | धनवताम् |
| सप्तमी | धनवति | धनवतोः | धनवत्सु |
| सम्बोधनम् | हे धनवन् | हे धनवन्तौ | हे धनवन्तः |

**मतुप्–प्रत्ययान्तशब्दस्य स्त्रीलिङ्गस्य रूपाणि**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | रूपवती | रूपवत्यौ | रूपवत्यः |
| द्वितीया | रूपवतीम् | रूपवत्यौ | रूपवतीः |
| तृतीया | रूपवत्या | रूपवतीभ्याम् | रूपवतीभिः |
| चतुर्थी | रूपवत्यै | रूपवतीभ्याम् | रूपवतीभ्यः |
| पञ्चमी | रूपवत्याः | रूपवतीभ्याम् | रूपवतीभ्यः |
| षष्ठी | रूपवत्याः | रूपवत्योः | रूपवतीनाम् |
| सप्तमी | रूपवत्याम् | रूपवत्योः | रूपवतीषु |
| सम्बोधनम् | हे रूपवति | हे रूपवत्यौ | हे रूपवत्यः |

**मतुप्-प्रत्ययान्तशब्दस्य नपुँसकलिङ्गस्य रुपाणि**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | शक्तिमत् | शक्तिमती | शक्तिमन्ति |
| द्वितीया | शक्तिमत् | शक्तिमती | शक्तिमन्ति |
| तृतीया | शक्तिमता | शक्तिमद्भ्याम् | शक्तिमद्भिः |
| चतुर्थी | शक्तिमते | शक्तिमद्भ्याम् | शक्तिमद्भ्यः |
| पञ्चमी | शक्तिमतः | शक्तिमद्भ्याम् | शक्तिमद्भ्यः |
| षष्ठी | शक्तिमतः | शक्तिमतोः | शक्तिमताम् |
| सप्तमी | शक्तिमति | शक्तिमतोः | शक्तिमत्सु |
| सम्बोधनम् | हे शक्तिमत् | हे शक्तिमती | हे शक्तिमन्ती |

गुणवत्-शब्दस्य त्रिषु लिङ्गेषु रूपाणि निर्मात ।

२. **अधस्तनेभ्यो वाक्येभ्यो मतुप्-प्रत्ययान्तानि पदानि चिनुत**

(क) बुद्धिमान् मनुष्यः सर्वत्र प्रशंसितो भवति ।

(ख) धनवन्तो जनाः समस्याः समाधातुं बुद्धिमन्तमनुधावन्ति ।

(ग) गुणवद्भिः सज्जनानां प्रशंसा विधीयते ।

(घ) रूपवतीनां नवीनेषु वस्त्राभूषणेषु रुचिर्भवति ।

(ङ) शक्तिमता भगवता संसारस्य सृष्टिर्विहिता ।

(च) भक्तिमन्तो नरा बलवते हनुमते पुष्पादिकं समर्पयन्ति ।

३. **अधस्तनानि पदानि प्रयुज्य वाक्यानि रचयत**

गतिमत्, गर्भवती, सरस्वती, बुद्धिमती, भगवान्

४. **अधस्तनान् प्रत्ययप्रयोगाभ्यासान् पठित्वा प्रतिप्रत्ययं मौलिकं वाक्यद्वयं निर्मात**

(क) (तद्) अस्य अस्ति इति अर्थे लच्-इलच्प्रत्यययोः प्रयोगो भवति । यथा

चूडा अस्यास्ति इति चूडालः (चूडा + लच्)

**यथा –**

चूडालो जनः शिखां कुरुते ।

फेनोऽस्त्यस्य इति फेनिलः (फेन + इलच्)

**यथा –**

अहं फेनिलेन वस्त्रं प्रक्षालयामि ।

तुन्दं विशालमुदरमस्त्यस्य इति तुन्दिलः (तुन्द + इलच्)

**यथा –**

बहुभोजनेन जनस्तुन्दिलो भवति ।

**(ख) श–प्रत्ययप्रयोगः**

(तद्) अस्ति अस्य इति अर्थे श-प्रत्ययस्य प्रयोगो भवति । यथा-

लोमानि बाहुल्येन सन्त्यस्य इति लोमशः (लोम + श)

**यथा –**

लोमशस्य जनस्य रोमाणि दृष्ट्वा बालकः पलायितः ।

रोमाणि सन्त्यस्य इति रोमशः (रोम + श)

**यथा –**

मेषादयो रोमशा जन्तवः कम्बलादीनां निर्माणाय पाल्यन्ते ।

कपिनामास्त्यस्य इति कपिशः (कपि + श)

**यथा –**

जना बलशालिनं कपिशं पूजयन्ति ।

**(ग) न–प्रत्ययप्रयोगः**

न-प्रत्ययस्य प्रयोगोऽपि अस्त्यस्यार्थे भवति । यथा-

पामास्त्यस्य इति पामनः (पाम + न)

**यथा –**

पामनो जनो वारं वारं शरीरं कण्डूयति ।

श्लेष्मास्यास्ति इति श्लेष्मणः (श्लेष्म-न)

श्लेष्मण उपचारार्थं चिकित्सालयं गच्छति ।

साम अधीते वेदो वा सामनः (साम + न)

**यथा –**

सामनः सामगीतं गीत्वा भगवन्तं प्रार्थयति ।

प्रशस्तानि अङ्गानि अस्याः अङ्गना (अङ्ग + न)

**यथा –**

अङ्गना दिव्यैरङ्गैः शोभना दृश्यते ।

(घ) **उरच्-व-प्रत्ययप्रयोगः**

दन्तशब्दे उरच्-प्रत्ययस्य प्रयोगो भवति । यथा-

दन्ता उन्नता अस्य इति दन्तुरः (दन्त + उरच्)

**यथा –**

दन्तुरस्य दन्ता दीर्घा भवन्ति ।

व-प्रत्ययस्य प्रयोगः केशशब्दे भवति । यथा-

केशाः प्रशस्ताः सन्त्यस्य इति केशवः (केश + व)

**यथा –**

केशवो भक्तेभ्यो वरं यच्छति ।

(ङ) **र-वलच्-प्रत्यययोः प्रयोगः**

स्वल्पार्थे र-प्रत्ययस्य प्रयोगो भवति । यथा

कुटी - स्वल्पा कुटी कुटीरः (कुटी + र)

**यथा –**

साधवः कुटीरे स्थित्वा साधनां कुर्वन्ति ।

शमी - स्वल्पार्थे शमीरः (शमी + र)

**यथा –**

शमीरस्य शाखायां वामनोऽपि लम्बितुं शक्नोति ।

शुण्डा - स्वल्पा शुण्डा शुण्डारः (शुण्डा + र)

**यथा –**

हस्तिशावकः शुण्डारेण जलमुत्क्षिपति ।

वलच्-प्रत्ययप्रयोगः

अस्य अस्ति अस्मिन्नर्थे वलच्-प्रत्ययस्य प्रयोगो विधीयते । यथा-

रजोऽस्त्यस्या इति रजस्वला (रजस् + वलच्)

**यथा –**

यज्ञोपवीतधारिणा रजस्वलाः न स्प्रष्टव्याः ।

कृषिरस्त्यस्य इति कृषीवलः (कृषि + वलच्)

**यथा –**

कृषीवलः क्षेत्रे धान्यानि उत्पादयति ।

**(च) ण-प्रत्ययस्य प्रयोगः**

क्रीडार्थे ण-प्रत्ययस्य प्रयोगो भवति । यथा-

दण्डः प्रहरणमस्यां क्रीडायां सा दाण्डा (दण्ड + ण)

**यथा –**

क्रीडासु दाण्डा अतीव रम्या क्रीडा वर्तते ।

मुष्टिः प्रहरणमस्यां क्रीडायां सा मौष्टा (मुष्टि + ण)

**यथा –**

टाइसनो मौष्टायां क्रीडायां साधुरासीत् ।

ण-प्रत्ययस्य प्रयोगः शीलमस्य इति अर्थे च क्रियते । यथा

बुभुक्षा शीलमस्य इति बौभुक्षः (बुभुक्षा + ण)

**यथा –**

बौभुक्षो भोजनालयं गत्वा खादन्नस्ति ।

शिक्षा शीलमस्य इति शैक्षः (शिक्षा + ण)

**यथा –**

शैक्षः पुरुषः शास्त्रचर्चां करोति ।

चुरा शीलमस्य इति चौरः (चुरा + ण)

**यथा –**

चौरः प्रहरिणं दृष्ट्वा अधावत् ।

ऋषिः शीलमस्य इति आर्षः (ऋषि + ण)

**यथा –**

आर्षं ज्ञानं अतीव मूल्यवत् अस्ति ।

५. **समासपरिचयं पठित्वा समासस्वरूपविषये कक्षायां विमृशत**

समसनं समासः। एकार्थीभावाय द्वयोः पदयोर्बहूनां वा पदानामेकीकरणं समासः। अर्थात्, समासविधिना द्वे पदे बहूनि वा पदानि एकीभवन्ति । समासस्य च अनेके विधयः सन्ति । विधेर्वैविध्यात् समासः पञ्चविधो भवति- केवलसमासः, अव्ययीभावसमासः, तत्पुरुषसमासः, बहुव्रीहिसमासः, द्वन्द्वसमासश्चेति । कर्मधारयसमासस्तत्पुरुषान्तर्गतो भवति । द्विगुसमाश्च कर्मधारयान्तर्गतो वर्तते । तेषां परिचयः सङ्क्षेपेण अधः प्रस्तूयते ।

## केवलसमासः

विशेषसंज्ञाविनिर्मुक्त समासः केवलसमासः। एतस्य समासस्य विशेषो विधिर्नास्तीत्ययं केवलसमास उच्यते। यथा सुप् सुपा सह समस्यते। एतेन विधिना 'भूतपूर्वः' इति शब्दो निष्पद्यते। तथैव केवलसमासविधिना इवशब्देन सह समासो भवति। इवेन सह समासे विभक्तेर्लोपो न भवति। यथा 'वागर्थाविव' इति ।

## अव्ययीभावसमासः

अव्ययीभावसमासे अव्ययस्य सुपा सह समासो भवति। प्रायेणास्मिन् समासे पूर्वपदमव्ययं भवति। अयं च समासः पूर्वपदार्थप्रधानो वर्तते। अनेन समासेन निष्पन्नं पदं चाव्ययं भवति। अकारान्तस्य अव्ययीभावसमासस्य अव्ययसंज्ञा तु भवति, किन्तु पञ्चमीं विभक्तिं विहाय अन्यत्र तस्य सुपो लुक् न भवति, अपि तु अमादेशो जायते। तृतीयायां, सप्तम्यां च विकल्पेन अम्भावो भवति। एतेन विधिना 'हरौ इत्यर्थे अधिहरि, कृष्णस्य समीपम् उपकृष्णम्' इत्यादयः शब्दाः निष्पद्यन्ते ।

## तत्पुरुषसमासः

तत्पुरुषसमासे उत्तरपदार्थस्य प्रधानता भवति । अयं च समासः समानाधिकरणो व्यधिकरणश्चेति द्विविधो भवति। समानाधिकरणस्तत्पुरुषः कर्मधारय उच्यते। यथा 'नीलम् च तद् उत्पलम्, नीलोत्पलम्' इति । यदि कर्मधारयसमासः सङ्ख्यापूर्वो भवति तर्हि द्विगुसंज्ञको भवति । यथा 'सप्त ऋषयः सप्तर्षयः, पञ्चानां गवां समाहारः पञ्चगवम्' इत्यादयः । व्यधिकरणश्च तत्पुरुषो द्वितीया-तृतीया-चतुर्थी-पञ्चमी-षष्ठी-सप्तम्यादिभेदेन बहुधा भवति । यथा, 'कृष्णं श्रितः कृष्णश्रितः, शङ्कुलया खण्डः शङ्कुलाखण्डः, गोभ्यो हितं गोहितम्, चोराद् भयं चोरभयम्, राज्ञः पुरुषः राजपुरुषः, अक्षेषु शौण्डः अक्षशौण्डः' इत्यादयः ।

## बहुव्रीहिसमासः

बहुव्रीहिसमासेऽन्यार्थः प्रधानो भवति । अनेन च समासेन निष्पन्नाः शब्दाः प्रायो विशेषणरूपेण प्रयुज्यन्ते । यथा 'पीतम् अम्बरं यस्य सः, पीताम्बरः' इत्यादि ।

## द्वन्द्वसमासः

द्वन्द्वसमास उभयपदार्थप्रधानो भवति । यथा, 'वटश्च पिप्पलश्च वटपिप्पलौ' इत्यादि ।

## रचनात्मकं कार्यम्

१. **मात्रा पुत्राय लिखितस्य पुत्रेण च मात्रे उत्तरस्वरूपेण लिखितस्य पत्रस्य निदर्शनस्वरूपं दर्शयत ।**

२. **पत्राचारस्य महत्त्वं वर्णयत ।**

३. **विग्रहं प्रदर्शयत**

अनुहरि, शास्त्रनिपुणः, नरसिंहः, त्रिलोकम्, अनुचितः, दशाननः, पत्रपुष्पफलानि ।

# चतुर्थः पाठः

## कर्मसिद्धिः

**(नाटकम्)**

**प्रा. रामहरिदाहालः**

**गुणातीतरूपो गुणाधाररूपः**
**समेषां हितार्थं दधद्विश्वरूपः ।**
**समस्तेषु भूतेषु तिष्ठन् दयार्द्रः**
**प्रद्याच्छिवं वः शिवो मङ्गलेशः ॥**
**(नान्द्यन्ते प्रविशति सूत्रधारः ।)**

सूत्रधारः - अलं विस्तरेण ! (नेपथ्याभिमुखं निरीक्ष्य) आर्ये ! यदि नेपथ्यविधानं पर्यवसितं तर्हि इहागम्यताम् ।

नटी - (प्रविश्य) आर्यपुत्र ! इयमस्मि । आज्ञापयत्वार्य ! किं प्रपूरणीयम् ?



सूत्रधारः	मान्याः सभ्याः कर्ममर्यादायाः सम्बन्धे बुभुत्सका दृश्यन्ते । विषयश्चायं सामयिकः । अतो वत्सगोत्रीयकवे रामहरेर्नवेन कर्मसिद्धिनामकेन लघुरूपकेण परिषदेषा परितोषयितव्या ।

नटी- भावत्कं निर्देशनं यथासम्भवं परिपाल्यते ।

सूत्रधारः - आर्ये ! प्रथमं तावत् सभ्यानभिमुखीकर्तुं गीतं गीयताम् ।

नटी - आज्ञापयत्वार्यः किमधिकृत्य गायानि ?

सूत्रधारः - सम्प्रत्येव प्रवृत्तं हेमन्तर्तुमधिकृत्य गीयताम् । सम्प्रति हि -

**तुहिनं नवनीतपिण्डवत्**

**पथि वृक्षेष्वजिरेषु राजते ।**

**वकहंसगणा विहारिणो**

**घनखण्डा इव भान्ति किं जले ॥**

नटी - सत्यमार्यपुत्र ! तथा हि -

**कनकानि फलन्ति किं तरा-**

**विति नारङ्गफलानि विभ्रमम् ।**

**दधते मनुजेषु भूरिशो**

**नवधान्यानि च क्षेत्रजानि नः ॥**

सूत्रधारः - आर्ये मधुरं गीतम् । गीतेन चाभिमुखीकृताः सभ्याः ।

नटी - आर्यपुत्र ! सम्प्रति रूपकप्रदर्शनावसरोऽस्तीति मन्ये । उच्यताम् केन रूपकेण सामाजिकानाह्लादयाम ?

सूत्रधारः - नवकविना रामहरिणा प्रणीतं कर्मसिद्धिनामकं समयानुकूलं लघुरूपकं प्रदर्शनयोग्यं वर्तते । (ततो द्वावेव निष्क्रामतः ।)

(**इति प्रस्तावना**)

(**प्रथमदृश्यम्**)

**(ततो लोकलोचनगोचरीभवति तपोनिष्ठो जाजलिः । असौ गुहामुखे तपति । अस्य शरीरं प्रायस्तृणादिभिराच्छन्नं वर्तते । निश्चलोऽसौ 'ओ३म्' इति ध्वनिमुच्चारयन्नस्ति ।)**

जाजलिः - ओ३म् ! ओ३म् ! ओ३म् ! ओ३म् !

ग्रामीणाः - आश्चर्यम्, आश्चर्यम् । विलोकयत ! मुनेः शिरसि वर्धितजटाजाले चटकदम्पतिभ्यां नीडं रचितं दृश्यते ।

कश्चन युवा - कियत्कालं तपस्तप्तं स्यान्मुनिवरेण ? पक्षिभिः शिरसि रचितं नीडमपि न जानाति ।

अपरः - ज्ञातं चेदपि उपेक्षितं स्यात् । 'पक्षिणो नीडं रचयन्तु नाम का हानिर्मे ?' इति विचारितं भवेत् ।

इतरः - मुनेर्धैर्यमासनस्थैर्यञ्च प्रशस्ये स्तः ।

अन्यः - (निकटमेत्य निपुणं निरीक्ष्य च) अहो ! पक्षिभिर्नीडस्य मध्येऽण्डान्यप्युत्पादितानि दृश्यन्ते ।

सर्वे - सत्यं सिद्धोऽस्ति मुनिः । प्रणमामामुम् ।

(प्रणम्य प्रतिष्ठन्ते ।)



जाजलिः - (शनैर्नेत्रे उन्मीलयति) तपोनिष्ठस्य मम कियान् समयो व्यतीतो भवेत् ? शरीरस्यावस्थां विलोक्य) अहो ! बालतृणाच्छन्नं शरीरम् । तथा हि -

**पादे श्यामा वर्धमानाऽस्ति दूर्वा**
**मालत्याद्यैर्वेष्टितं चाङ्गमन्यत् ।**
**वल्ल्या नद्धः पादपो वा मनुष्यो**
**वर्ते चेत्थं स्वां तनुं तर्कयेऽहम् ॥**

अन्यच्च -

**शिरसि मम समृद्धे केशशैवालजाले**
**विविधशकुनयो वै नीडमारच्य तस्थुः ।**
**तदपि मुनिरतिष्ठन्निश्चलोऽसौ समाधौ**
**यमनियमधनाढ्यं किं जयेयुर्हि विघ्नाः ।**

(शरीरे व्यापृतं घासादिकमपसारयति। अपसारणस्य कारणाद् घासाच्छन्नशिरसि रचितकुलायाः पक्षिण उड्डीयन्ते। उड्डीयमानः कश्चन पक्षी विष्टां पातयति, या जाजलेर्दक्षिणकरे पततिः।)

जाजलिः - (करक्षिप्तां विष्टां विलोक्य)

**प्राप्यन् चेतश्चेन्द्रियाणां समूहं**
**दीर्घं रुद्ध्वा श्रीपतौ सन्दधानम्।**
**तेजोदीप्तं मामनादृत्य पक्षी**
**यायात् कुत्रायं तपो मे प्रपश्य॥**

(किञ्चिद्रोषदृष्ट्या पक्षिणं विलोकयति। पक्षी तपोऽग्निना दग्धतनुर्भूमौ पतति। भस्मीभूतं पक्षिणं पश्यन् ) सिद्धं मे तपः। कृतापकार एष पक्षी प्राणैर्विमुक्तः। यदि नाम कश्चनान्योऽपकुर्यात्, तस्याप्येतादृश्येव गतिर्निश्चिताऽस्ति। (उत्तिष्ठति) अहो ! दर्शनीया खलु तपोवनरमणीयता। तथा हि-

**कियद् वा प्रमाणं दिवश्चेति बोद्धुं**
**विहाराजिरं वा मघोनो विबोद्धुम्।**
**इमे नन्दनं किं जयन्तीति रीत्या**
**मुहुः स्पर्द्धमाना विभान्तीह वृक्षाः॥**

अपि च -

**कमलिनीमकरन्दकधूलिभिः**
**शवलिता ह्रदिनीजलराशयः।**
**ननु विलोकयतां किल मानसे**
**सुरशरासनविभ्रममादधुः॥**

(किञ्चिदग्रे गत्वा तपोनिष्ठान् मुनीन् निरीक्ष्य)

**गिरौ गुहायामथ शाखिमूले**
**ध्यायन्ति स्थित्वा मुनयो महेशम्।**
**स्वरूपनिष्ठा यतयो न देहं**
**जानन्ति गेहं न कलत्रपुत्रान्॥**

अधुना समाधेर्विरतोऽस्मि। समाधेरवसरे सुखं दुःखं वा नासीत्। केवलमात्मानन्दानुभव एव व्यापृणोति स्म मानसम्। भवतु भिक्षार्थं ग्रामं यामि। सम्प्रति बुभुक्षा वर्धमाना प्रतिभाति। (किञ्चिदटित्वा अग्रतो नदीं पश्यन्)

**वने सञ्चरन्तो वृषास्तर्णकाद्याः**

**खगा वा महिष्यः पिबन्तीह नीरम् ।**

**प्रणालीश्च कुल्या विनिर्माय दक्षाः**

**समाकृष्य तोयं कृषिं वर्धयन्ति ॥**

अपि च -

**नदीकूपधारादयः स्युर्न भूमौ**

**कथं नाम सत्त्वानि प्राणान् धरेयुः ।**

**कथं वृक्षगुल्मा व्रततत्यश्च शोभां**

**दधाना धरायां समृद्धा भवेयुः ॥**

(नमति । घासकाष्ठाद्यानयनाय वनं प्राप्ता नदीतटवासिनो ग्रामीणा मुनिं पश्यन्ति।)

एकः - अहो ! समाधेः प्रबुद्धोऽसौ मुनिरेष जाजलिः, वन्दनीयो गृहिभिः ।

अन्ये - वाढम् ! वन्दनीयो मुनिः । (निकटमेत्य)

ग्रामीणाः - मुनिवर ! वयं ग्रामीणाः । बीजवपन-घासकर्तन-गोपालनादिकर्मभिर्गतमस्माकं जीवनम् । अस्माभिः किं कर्म विधातव्यम् ? केन सुखिनः स्याम वयम् ? कृपां कृत्वोपदिश्यतामेतद् ।

जाजलिः - यूयं गृहस्थाः । गृहस्थानां कर्तव्यं गृहसम्मार्जनम्, सन्ततिपालनम्, मातापित्रोः शुश्रूषणम्, मान्यानामादरः, गोपालनम्, अतिथिसेवनञ्च । संक्षिप्तं चेदपि प्रातः सायञ्च सन्ध्यावन्दनमाचरणीयमेव ।

ग्रामीणाः - अस्माकं ग्राममेत्योपदिशत्विति प्रार्थयामहे ।

जाजलिः - भवति । भिक्षार्थमहमपि ग्रामं जिगमिषामि । गृहस्थानां साहाय्येन ब्रह्मचारिणो वानप्रस्थाः तपस्विनः संन्यासिनश्च जीवन्ति ।

ग्रामीणाः - अनुगृहीताः स्म ।

जाजलिः - अहं दिवासन्ध्यामाचरामि । भवन्तश्च घासकाष्ठादीन् सङ्कलयन्तु । तदनु सहैव चलिष्यामः ।

ग्रामीणाः - एवमेव करवाम ।

(इति प्रतिष्ठन्ते ।)

(मुनिः सन्ध्यामाचरति । ग्रामीणा घासं काष्ठञ्च कृन्तन्ति ।)

ग्रामीणाः- घासकर्तनं प्रपूरितम् । काष्ठसञ्चयनमपि सम्पन्नम् । मुनिः कदा जागृयात् ? (अत्रान्तरे

मुनिः किञ्चिन्नेत्रे उन्मीलयति) अहो ! जागृतो मुनिः । यामस्तत्सन्निधौ । (हिण्डन्ते)

(जाजलिरुत्तिष्ठति । ग्रामीणा घासं काष्ठञ्च शिरसि धारयन्तो मुनिसन्निधौ समागच्छन्ति ।)

ग्रामीणाः - श्रद्धेय मुनिवर ! वयमागताः । भवन्तं परिवेशं दर्शयितुमिच्छामः ।

जाजलिः - साधयामस्तावत् ।

**(द्वितीयदृश्यम्)**

(जाजलिरासनमध्यास्ते । एतं परिवेष्ट्य वृद्धा युवानः स्त्रियो बालाश्च तिष्ठन्ति ।)

वृद्धाः - भो मुनिवर ! भवानस्मिन्नेव ग्रामे विराजताम् । अत्रोषित्वा विषयकूपपतितानस्मान् प्रतिदिवसं किञ्चित्कालमुपदिश्य उद्धरत्वित्यनुरुन्ध्महे । तथा हि -

**कलत्र-पुत्रादिक-नप्तृवर्गैर्दष्टान् परं तन्नहि शोचमानान् ।**
**उद्धर्तुमस्मान् प्लवमाविधाय मुरारिणा त्वं किल प्रेषितोऽत्र ॥**

युवानः - वयमपि किञ्चिन्नैतिकशिक्षामत्रार्जयितुमिच्छामः । तथा हि -

**तरुणे वयसीहि भौतिकं**
**सुखमाकाङ्क्षति मानसं किल !**
**कथमस्य फलं सुदुःसहं**
**परिजानाति जडं हि मानसम् ॥**

स्त्रियः - मुनिवर !

**विषया विषवन्मता बुधैः**
**परमेतेऽतिप्रिया भवन्ति नः ।**
**विषमिश्रितमोदकं द्रुतं**
**किमु नाकर्षति बालमूषकम् ॥**



जाजलिः - भो ग्रामवासिनः ! अहं खलु तपस्वी यतिः । तपश्चरित्वा सिद्धेर्त्यर्जनं मे कर्तव्यम् । यतिभिर्भोगबहुले गृहस्थाश्रमे नैव बहुकालं स्थातव्यम् । अतो हि चिरं स्थातुं नेच्छामि । विनाऽवस्थित्या उपदेष्टुं न

शक्यते । तथा हि -

**श्रव्यं दृश्यं त्रिभुवनभवं नैव सत्यं समग्रं**
**बुद्ध्वा चैतद् वयमिह परेशे मतिं सन्दधामः ।**
**दाराः पुत्रा द्रविणवसने सन्ततं सत्यमात्मा**
**भोक्तुं चाप्तुं प्रयतनपरान् किं गृहस्थान् वदाम !**

तथा हि किञ्चिद् वच्मि -

**सन्ततं स्मर्यतामीश्वरो मानसे**
**नैव विस्मर्यतामीश्वरो मानसे ।**
**भोगभुक्त्यै मनो नैव देयं जनैः**
**उत्थितास्त्यागतः सज्जनाः सर्वदा ॥**

(ग्रामीणाः फलानि ददति)

जाजलिः - अहं गृहत्रयाद् भिक्षां प्राप्यैव जीवननिर्वाहं करिष्यामि । फलानि भवन्तो भुञ्जताम् । (उत्थाय निष्क्रामति ।)

**(तृतीयदृश्यम्)**

(जाजलिर्भिक्षणाय कस्यचन गृहस्थस्य गृहं प्राप्नोति)

जाजलिः - जय शम्भो ! का को वाऽत्र भो !

गृहिणी - (अन्तर्देहलीतः) प्रतीक्ष्यतां मुनिवर ! अहं जरत्तरश्वसुरयोः सेवायामस्मि ।

जाजलिः - (किञ्चित् प्रतीक्ष्य) न बहु प्रतीक्षिष्ये । शीघ्रमायाहि । अन्यथाऽन्यत्र गच्छामि ।

(नेपथ्ये)

आगच्छामि मुनिवर ! द्रुतमागच्छामि, यदि द्रुतं नागच्छामि तर्हि भवान् मामपि विष्टापातिनीं चटकामिव भस्मसात्करिष्यतीति बिभेमि ।

जाजलिः - (आत्मगतम्) अनया सुदूरवनान्तरस्य घटना कथमवगता ? भो ! संयमिततया स्थास्ये ।

गृहिणी - (आगत्य प्रणम्य च) मुनिवर ! गृह्यतां भैक्ष्यम् ।

जाजलिः - (भिक्षां गृह्णन्नाशिषं प्रयुञ्जानश्च) मातः ! वनान्ते घटिता सा घटना भवत्या कथं ज्ञाता ? अपि भवत्या तपसा दूरदर्शनसिद्धिर्लब्धा ?

गृहिणी - मुनिवर ! मया सिद्धये जातुचिन्न प्रयतितम् । न च कैश्चिदनुगृहीताऽहम् । अनधीता गृहिणी अविहिततपश्चर्या चाहं तत् कथं सिद्धा स्याम् ? सिद्धस्तु भवान्, यो दृष्टिमात्रेण

चटकां भस्मसात्कृतवान् ।

जाजलिः - मातः ! एवं मा वद ! यदि नाम भवती असिद्धा, तर्हि वनान्तर्वर्तिनीं चटकाहतसम्बद्धां घटनां कथं जानाति ?

गृहिणी - एतत् सिद्ध्या न, परं स्वकर्मपालनेनैव विज्ञातम् ।

जाजलिः - कीदृशं स्वकर्म !

गृहिणी - अहमहर्निशं पत्युः श्वसुरयोश्च सेवायै दत्तावधानाऽस्मि । मदीयौ श्वसुरौ जरत्तरौ, क्षीणदृष्टिकौ, क्षीणश्रवणौ च स्तः, अनयोः स्वास्थ्यं कथं सबलं स्यात् ? कथं चेमौ तुष्टौ स्याताम् ? अप्यनयोः सेवायां त्रुटिस्तु न जाता ? इत्यत्राहं सशङ्का भवामि ।

जाजलिः - वृद्धयोः श्वसुरयोः शुश्रूषा त्वसिधारावहेलनवद् दुष्करा भवति । कथं खलु भवती तन्निर्वहति ? वृद्धसेवायां पथ्यभोजनस्य तप्तजलस्य औषधजातस्य च व्यवस्थापनं विधातव्यं भवति । कासश्वासैर्वातरोगा मधुमेहादय उच्चनिम्नरक्तप्रवाहादिरोगा मूत्रकृच्छ्र-मलस्तम्भादिरोगाश्च भवन्ति । रात्रिन्दिवमेव चिन्ताकुलया भवत्या कथमेतन्निरुह्यते ?

गृहिणी - अयि ! एतत्तु मम सौभाग्यम्, पित्रोः शुश्रूषायै समयः प्राप्तः । पित्रोः सेवा लक्ष्मीनारायणयोरेव सेवेति मन्ये । एतत्तु गृहिणीनां कृते निर्धारितं कर्म, अत्र कठिनता का ?

जाजलिः - अस्त्येव काठिन्यं तु, परं भवत्या तन्न मतं भवेत् ।

गृहिणी - न हि मुने ! एतन्न । यतः -

**आलस्यं वै कार्यव्यापारहाने-**
**र्मूलं बीजं वर्तते साधुवर्य !**
**त्यक्त्वाऽऽलस्यं सावधानाऽस्मि कार्ये**
**को वाऽऽलस्यादुत्थितो भूतिमार्गे ॥**



जाजलिः - सुन्दरं मधुरञ्च गीतम् । अपरञ्च भण्यताम् ।

गृहिणी - मुनिवर ! यथासम्भवं स्वकर्मणः परिपूरणाय यतमानाऽस्मि । अत्रैव सन्तुष्टाऽस्मि । अन्यत् किमपि न जाने । भगवद्गीतायां भगवता एवमेव प्रतिपादितमिति गुरुजनमुखान्मया श्रुतमपि

'स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः' इति । अस्मिन् सन्दर्भे जनकपुरनिवासी तुलाधरो वैश्यो भवतो जिज्ञासां समाधातुं शक्ष्यति ।

जाजलिः - आकाशवाण्याऽपि पूर्वं मे तत् संसूचितम् । भवती चैतद् दर्शयति । अहं तुलाधरवैश्यस्य पार्श्वे प्रस्थास्ये तथ्यबोधाय । वन्दे मातरम् ।

गृहिणी - वन्दे मुनिवरं चाहम् । यात्रायाः सफलतां च कामये । (इति निष्क्रान्तौ)

## (चतुर्थदृश्यम्)

## (जनकपुरक्षेत्रं विदेहनगरम्)

(तुलाधरो वैश्यः क्रयविक्रयव्यापारं कुर्वन्नास्ते । ग्राहकास्ततो विविधा आवश्यकसामग्रीः क्रीणन्ति । अत्रान्तरे जाजलिः प्रविशति )

जाजलिः - भो व्यापारिन् ! अपि भवान् तुलाधरो वैश्योऽस्ति ?

तुलाधरः - (पादौ स्पृष्ट्वा) मुनिवर ! अभिवादये । जना मामेवमेवं वदन्ति ।

जाजलिः - भवान् सिद्धो वैश्यवर इति श्रुत्वा दूरादागतोऽस्मि ।

तुलाधरः - मुनिवर ! नाऽहं सिद्धः, न च मया तदर्थं प्रयतितम् । भवतो दृष्टिमात्रेण चटका भस्मसाद्भूता । अतो भवान् सिद्धः । सम्प्रति ग्रामीणया कुलवध्वा प्रेषितोऽस्तीति मत्सकाशमिति जाने ।

जाजलिः - वैश्यवर ! विना सिद्ध्या भवतैतत् कथं विज्ञातम् ? रसगन्धौषधीनामन्यखाद्यवस्तूनाञ्च व्यापारेण सिद्धिः कथं न लुप्तेति जिज्ञासामि ।

तुलाधरः - मुने ! भूतानामद्रोहेण अल्पद्रोहेण वाऽहं जीवामि, विक्रयावधौ छलदम्भयोरसत्यस्य च लेशमपि नाश्रये, मनसा कर्मणा वाचा च समेषां हिताय प्रयतमानोऽस्मि । तददधिकं न किमपि जाने ।

जाजलिः - साधोरिव प्रशस्योऽस्ति व्यापारो भवतः ।

तुलाधरः - मुने !

**धनी वाऽस्तु दीनः कुलीनोऽकुलीनः**
**समाना तुलाऽऽस्ते मदीया समेषु ।**
**असत्यं छलं नाश्रये तुच्छलब्ध्यै**
**सुकार्यात् प्रभुः स्यान्नरोऽनल्पभूत्यै ॥**

जाजलिः - एष एव महान् धर्मो वैश्यवर !

तुलाधरः - धर्मार्जनार्थमीशप्राप्तये शान्त्यै वा नास्ति वनप्रस्थानस्य दीक्षाग्रहस्य काषायपरिधानस्य चाऽऽवश्यकता । लोकहितकारिणा, सर्वभूतहितकारिणा च कर्मणा सर्वे परितुष्यन्ति ।



जाजलिः - वैश्यवर्य ! सम्प्रति मयाऽनुभूतं यत् कामरोषदम्भाः सिद्धेरन्तरायाः। मदवर्धिकाः सिद्धयोऽप्यन्तराया एव ।

तुलाधरः - मुनिवर ! तथा न वक्तव्यम् । कोऽपि पदार्थो हानिकृन्न, प्रयोक्तुर्बुद्धिरेव हानिकारिका । तत्राऽऽसक्तिरेव हानिकारिका ।

जाजलिः - स्वकर्मणः परिपालनमेव वस्तुतो भगवदाराधनमस्ति । मया रहस्यं ज्ञातम् । अधिकं न किञ्चिद् वाञ्छामि । अधुना प्रस्थातुमीहे ।

तुलाधरः - कार्यान्तरासक्त्या भवतः सपर्या न कृता । निकटमेव गृहमस्ति । तत्र गृहिणी वर्तते । तत्रैत्य आतिथ्यं स्वीकर्तुमनुरुन्धे ।

जाजलिः - मयाऽक्षयभोजनं भुक्तं सम्प्रत्येव । अधुना तृष्णाऽपगता, बुभुक्षा च शान्ता । तथापि मम भिक्षुत्वमादृत्य मुष्टिमितान् तण्डुलकणान् याचे ।

तुलाधरः - अनुगृहीतोऽस्मि । (तण्डुलान् ददाति प्रणमति च ।)

(जाजलिः आशिषं प्रयुज्य प्रतिष्ठते । तुलाधरः स्वकार्यनिरतो भवति ।)

**भरतवाक्यम्**

**जनजनपदकार्यं नैजकार्यं विचार्य**
**विदधतु धरणीशा दम्भमानौ विहाय ।**
**निजपरगणनां वै मानवाः सन्त्यजन्तु**
**धृतिगतिमतिमन्तः सर्वलोका भवन्तु ॥**

**(पटाक्षेपः)**

## अभ्यासः

### श्रवणं भाषणं च

१. **शिक्षकमुखाच्छ्रुत्वा नाटकस्य मङ्गलाचरणपद्यं सलयमनुवाचयत ।**

२. **अधस्तनस्य पद्यस्य श्रवणेन लयमनुशील्य तल्लयानुकूलं ज्ञातपूर्वमपरं कञ्चन श्लोकं श्रावयत**

पादे श्यामा वर्धमानाऽस्ति दूर्वा
मालत्याद्यैर्वेष्टितं चाङ्गमन्यत् ।
वल्ल्या नद्धः पादपो वा मनुष्यो
वर्ते चेत्थं स्वां तनुं तर्कयेऽहम् ॥

३. **अधस्तनानां पदानां शुद्धोच्चारणं कुरुत**

दधद्विश्वरूपः , नेपथ्यविधानम्, बुभुत्सकाः, नवनीतपिण्डवत्, विभ्रमम्, लोकलोचनगोचरीभवति, चटकदम्पतिभ्याम्, आसनस्थैर्यम्, बालतृणाच्छन्नम्, यमनियमधनाढ्यः, घासाच्छन्नशिरसि, उड्डीयमानः, किञ्चिद्रोषदृष्ट्या, कमलिनीमकरन्दकधूलिभिः, घासकाष्ठाद्यानयनाय, गृहसम्मार्जनम्, बीजवपन-घासकर्तन-गोपालनादिकर्मभिः, साहाय्येन, घासकाष्ठादीनाम्, मुनिसन्निधौ, अनुरुन्ध्महे, भोगभुक्त्यै, जरत्तरश्वसुरयोः, भस्मसात्करिष्यति, गृह्णन्, अविहिततपश्चर्या, वनान्तर्वर्तिनीम्, क्षीणदृष्टिकौ, मूत्रकृच्छ्र-मलस्तम्भादिरोगाः, कार्यव्यापारहानेः, शक्ष्यति, आकाशवाण्या, कुलवध्वा, छलदम्भयोः, तुच्छलब्ध्यै, मदवर्धिकाः, कार्यान्तरासक्त्या ।

४. **अधोऽङ्कितस्य पद्यस्य श्रवणानन्तरं तद्वृत्तं परिचित्य वृत्तलक्षणं च कथयत**

कमलिनीमकरन्दकधूलिभिः
शवलिता ह्रदिनीजलराशयः ।
ननु विलोकयतां किल मानसे
सुरशरासनविभ्रममादधुः ॥

५. **नाटकस्य प्रस्तावनाखण्डे वर्तमानानि अधस्तनानि ससन्धिकानि पदानि शिक्षकमुखाच्छ्रुत्वा सन्धिं विच्छिद्य श्रावयत**

प्रदद्याच्छिवम्, नेपथ्याभिमुखम्, इहागम्यताम्, इयमस्मि, रामहरेर्नवेन, विषयश्चायम्, सभ्यानभिमुखीकर्तुम्, आज्ञापयत्वार्य, किमधिकृत्य, सम्प्रत्येव, हेमन्तर्तुमधिकृत्य, वृक्षेष्वजिरेषु, सत्यमार्यपुत्र, तराविति, चाभिमुखीकृताः, रूपकप्रदर्शनावसरोऽस्तीति, सामाजिकानाह्लादयाम, समयानुकूलम्, द्वावेव ।

६. **नाटकस्य द्वितीयं दृश्यं शिक्षकमुखाच्छ्रुत्वा स्वभाषायां तद्वर्णितविषयं कथयत ।**

७. **अधस्तनं पद्यं शुद्धमुच्चार्य तस्य सान्वयं भावार्थं कक्षायां श्रावयत**

विषया विषवन्मता बुधैः

परमेतेऽतिप्रिया भवन्ति नः ।

विषमिश्रितमोदकं द्रुतं

किमु नाकर्षति बालमूषकम् ॥

८. **निर्दिष्टपदानामर्थं कथयत**

अलम्, तरौ, निष्क्रामतः, नीडम्, उन्मीलयति, तनुः, मुहुः, तर्णकः, जिगमिषामि, हिण्डन्ते, प्लवः, चिरम्, भुञ्जताम्, जरत्तरश्वसुरयोः, जातुचित्, रात्रिन्दिवम्, जाने, जिज्ञासामि, काषायः, ईहे, पटाक्षेपः ।

९. **अधस्तनस्य पद्यस्यार्थं शिक्षकात् श्रुत्वा अस्य प्रतिपदमर्थं श्रावयत**

सन्ततं स्मर्यतामीश्वरो मानसे

नैव विस्मर्यतामीश्वरो मानसे ।

भोगभुक्त्यै मनो नैव देयं जनैः

उत्थितास्त्यागतः सज्जनाः सर्वदा ॥

१०. **अधस्तनानां समस्तपदानां विग्रहवाक्यानि कथयत**

गुणातीतरूपः, दयार्द्रः, नेपथ्याभिमुखम्, कर्ममर्यादायाः, नवनीतपिण्डवत्, नारङ्गफलानि, समयानुकूलम्, गुहामुखे, केशशैवालजाले, दक्षिणकरे, तपोऽग्निना, तपोवनरमणीयता, ह्रदिनीजलराशयः, स्वरूपनिष्ठा, भिक्षार्थम्, घासकाष्ठाद्यानयनाय, गृहसम्मार्जनम्, गोपालनम्, काष्ठसञ्चयनम्, विषयकूपपतितान्, नैतिकशिक्षाम्, भोगबहुले, प्रयतनपरान्, जरत्तरश्वसुरयोः, अविहिततपश्चर्या, स्वकर्मपालनेन, क्षीणदृष्टिकौ, वृद्धसेवायाम्, औषधजातस्य, रात्रिन्दिवम्, कार्यव्यापारहानेः, गुरुजनमुखात्, तथ्यबोधाय, मत्सकाशम्, अल्पद्रोहेण, असत्यस्य, अनल्पभूत्यै, दीक्षाग्रहस्य, सर्वभूतहितकारिणा, भगवदाराधनम्, तण्डुलकणान्, नैजकार्यम्, निजपरगणनम्, पटाक्षेपः ।

११. **नाटकस्य प्रथमदृश्यं श्रुत्वा ग्राम्यजीवनस्य वैशिष्ट्यं स्वभाषया कथयत ।**

१२. **नाटकस्य चतुर्थदृश्यं श्रुत्वा प्रदत्तप्रश्नानामुत्तराणि कथयत**

(क) एकपदेन उत्तरयत

(अ) तुलाधरो वैश्यः किं कुर्वन्नास्ते ?

(आ) तुलाधरेण किमर्थं न प्रयतितम् ?

(इ) कस्य व्यापारः साधोरिव प्रशस्योऽस्ति ?

(ई) के सिद्धेरन्तरायाः ?

(उ) जाजलिना किं भुक्तम् ?

(ख) एकेन पूर्णवाक्येनोत्तरयत

(अ) तुलाधरस्य विचारे जाजलिः किमर्थं सिद्धोऽस्ति ?

(आ) तुलाधरः कथं जीवति ?

(इ) नरः कस्मादनल्पभूत्यै प्रभुर्भवति ?

(ई) कीदृशेन कर्मणा सर्वे परितुष्यन्ति ?

(उ) कुत्रासक्तिर्हानिकारिका ?

(ग) निर्देशनमाधृत्य भाषिककार्याणि कुरुत

(अ) 'मया रहस्यं ज्ञातम्' 'जना मामेवमेवं वदन्ति' इति वाक्ययोर्वाच्यपरिवर्तनं कुरुत ।

(आ) 'ग्राहकास्ततो विविधा आवश्यकसामग्रीः क्रीणन्ति' इति वाक्यस्यैकवचने, 'तत्रैत्य आतिथ्यं स्वीकर्तुमनुरुन्धे' इति वाक्यस्य च बहुवचने परिवर्तनं कुरुत ।

(इ) 'विक्रयावधौ' 'कामरोषदम्भाः' इत्यनयोर्विग्रहवाक्ये निर्दिशत ।

(ई) 'क्रीणन्ति' 'जाने' इत्यनयोर्धातुलकारपुरुषवचनानि कानि ?

(उ) 'कुर्वन्नास्ते' 'कुलीनोऽकुलीनः' 'हानिकृन्न' 'तृष्णाऽपगता' इत्येषां सन्धिविच्छेदं कुरुत ।

(घ) 'मुने ! भूतानामद्रोहेण अल्पद्रोहेण वाऽहं जीवामि, विक्रयावधौ छलदम्भयोरसत्यस्य च लेशमपि नाश्रये, मनसा कर्मणा वाचा च समेषां हिताय प्रयतमानोऽस्मि' इति तुलाधरवाक्ये कीदृशी भावना वर्तते ? समीक्षणं कुरुत ।

१३. **अधस्तनं पद्यं तद्भावार्थं च शिक्षकाच्छ्रुत्वा 'कार्यं कथं कर्तव्यम् ?' इति स्वभाषया प्रकाशयत ।**

धनी वाऽस्तु दीनः कुलीनोऽकुलीनः
समाना तुलाऽऽस्ते मदीया समेषु ।
असत्यं छलं नाश्रये तुच्छलब्ध्यै
सुकार्यात् प्रभुः स्यान्नरोऽनल्पभूत्यै ॥

## पठनम्

१. **नाटकस्य तृतीयं दृश्यं साभिनयं वाचयत ।**

२. **अधस्तनं पद्यं गतियतिनिर्धारणपुरःसरं सलयं वाचयत**

कनकानि फलन्ति किं तरा-
विति नारङ्गफलानि विभ्रमम् ।
दधते मनुजेषु भूरिशो
नवधान्यानि च क्षेत्रजानि नः ॥

३. **प्रदत्तं पद्यं सलयं पठित्वा गणनिर्धारणेन तद्वृत्तं निर्धारयत**

शिरसि मम समृद्धे केशशैवालजाले
विविधशकुनयो वै नीडमारच्य तस्थुः ।
तदपि मुनिरतिष्ठन्निश्चलोऽसौ समाधौ
यमनियमधनाढ्यं किं जयेयुर्हि विघ्नाः ।

४. **अधस्तनस्य पद्यस्य लयानुशीलनेन वाचनं कृत्वा तद्वृत्तलक्षणं च कथयत**

आलस्यं वै कार्यव्यापारहाने-
र्मूलं बीजं वर्तते साधुवर्य !
त्यक्त्वाऽऽलस्यं सावधानाऽस्मि कार्ये
को वाऽऽलस्यादुत्थितो भूतिमार्गे ॥

५. **अधस्तनं पद्यं सम्यक् पठित्वा तदन्वयं कथयत**

नदीकूपधारादयः स्युर्न भूमौ
कथं नाम सोवानि प्राणान् धरेयुः ।
कथं वृक्षगुल्मा व्रत्त्यश्च शोभां
दधाना धरायां समृद्धा भवेयुः ॥

६. **प्रदत्तस्य पद्यस्य मौनपठनेन तद्भावार्थं प्रकाशयत**

तरुणे वयसीहि भौतिकं
सुखमाकाङ्क्षति मानसं किल !
कथमस्य फलं सुदुःसहं
परिजानाति जडं हि मानसम् ॥

७. **प्रदत्तानि प्रथमदृश्यसम्बद्धानि ससन्धिकानि पदानि सन्धिं विच्छिद्य पठत**

प्रायस्तृणादिभिराच्छन्नम्, निश्चलोऽसौ, ध्वनिमुच्चरयन्नस्ति, तपस्तप्तम्, स्यान्मुनिवरेण, मुनेर्धैर्यम्, मध्येऽण्डान्यप्युत्पादितानि, सिद्धोऽस्ति, प्रणमामामुम्, शरीरस्यावस्थाम्, वर्धमानाऽस्ति, मालत्याद्यैर्वेष्टितम्, चाङ्गमन्यत्, तर्कयेऽहम्, मुनिरतिष्ठन्निश्चलोऽसौ, जयेयुर्हि, जाजलेर्दक्षिणकरे, चेतश्चेन्द्रियाणाम्, कश्चनान्योऽपकुर्यात्, तस्याप्येतादृश्येव, दिवश्चेति, जयन्तीति, विभान्तीह, किञ्चिदग्रे, समाधेर्विरतोऽस्मि, समाधेरवसरे, केवलमात्मानन्दानुभवः, वृषास्तर्णकाद्याः, पिबन्तीह, स्युर्न, व्रततयश्च, प्रबुद्धोऽसौ, कृत्वोपदिश्यतामेतत्, ग्राममेत्योपदिशत्विति, संन्यासिनश्च, काष्ठञ्च, अत्रान्तरे, यस्मात्तत्सन्निधौ, साधयामस्तावत् ।

८. **नाटकस्य सार्थबोधं पठनेन प्रदत्तानां समस्तपदानां सविग्रहमर्थं प्रकाशयत**

दधद्विश्वरूपः, आर्यपुत्र !, हेमन्तर्तुम्, रूपकप्रदर्शनावसरः, बालतृणाच्छन्नम्, घासाच्छन्नशिरसि, तेजोदीप्तम्, कमलिनीमकरन्दकधूलिभिः, आत्मानन्दानुभवः, वृक्षगुल्मौ, बीजवपन-घासकर्तन-गोपालनादिकर्मभिः, मातापित्रोः, सन्ध्यावन्दनम्, मुनिसन्निधौ, कलत्र-पुत्रादिक-नप्तृवर्गैः, द्रविणवसने, जीवननिर्वाहम्, दूरदर्शनसिद्धिः, चटकाहतसम्बद्धाम्, दत्तावधाना, सशङ्का, तप्तजलस्य, मूत्रकृच्छ्र-मलस्तम्भादिरोगाः, स्वकर्मणः, तुलाधरः, आवश्यकसामग्रीः, छलदम्भयोः, तुच्छलब्ध्यै, धर्मार्जनार्थम्, काषायपरिधानस्य, कार्यान्तरासक्त्या, स्वकार्यनिरतः, धृतिगतिमतिमन्तः ।

९. **अधः कानिचित् विग्रहवाक्यानि प्रदत्तानि सन्ति । तेषां समस्तपदानि पाठेऽन्विष्य पठत**

(क) नान्द्याः अन्तः, तस्मिन्
(ख) घनस्य खण्डाः
(ग) तपसि निष्ठः
(घ) कृतः अपकारः येन सः
(ङ) शाखिनः मूलम्, तस्मिन्
(च) बालश्चासौ मूषकः, तम्
(छ) लक्ष्मीश्च नारायणश्च, तयोः
(ज) धरण्याः ईशाः
(झ) न द्रोहः, तेन
(ञ) मङ्गलस्य ईशः
(ट) दग्धा तनुः यस्य सः
(ठ) दिवसम् दिवसम्
(ड) भोगस्य भुक्तिः, तस्यै
(ढ) मदस्य वर्धिकाः
(ण) सर्वे च ते लोकाः

९. **नाटकस्य तृतीयं दृश्यं पठित्वा प्रदत्तान् प्रश्नानुत्तरयत**

(क) एकेन वाक्येनोत्तरयत

(अ) गृहिणी कयोः सेवायामस्ति ?

(आ) कया सिद्धये यत्नो न विहितः ?

(इ) गृहिण्या वनान्तर्वर्तिनी कथं विज्ञाता ?

(ई) गृहिणी श्वशुरयोः सेवां कयोः सेवां मनुते ?

(उ) गुरुजनमुखाद् गृहिण्या किं श्रुतम् ?

(ख) भाषासम्बद्धानि कार्याणि कुरुत

(अ) 'जाजलिर्भिक्षणाय कस्यचन गृहस्थस्य गृहं प्राप्नोति' इत्यत्र 'भिक्षणाय' इति पदे कस्मिन्नर्थे चतुर्थी विहिताऽस्ति ?

(आ) 'प्रतीक्ष्यताम्, आयाहि, अनुगृहीता, विधातव्यम्, निरुह्यते, समाधातुम्, प्रस्थास्ये' इति पदानां धातूपसर्गौ निर्दिशत ।

(इ) 'भैक्ष्यम्, जरत्तरौ, कठिनता, सौभाग्यम्, काठिन्यम्, आलस्यम्, सफलता' एतेषां पदानां तद्धितवृत्तिबोधकं विग्रहवाक्यं प्रकृतिप्रत्ययविच्छेदपूर्वकं प्रदर्शयत ।

(ई) 'प्रतीक्ष्य, प्रयुञ्जानः, सिद्धिः, विज्ञातम्, दुष्करः, विधातव्यम्, यतमाना, प्राप्तः, त्यक्त्वा, जिज्ञासा, समाधातुम्' इत्येषां कृदन्तपदानां प्रकृतिप्रत्ययविच्छेदं कुरुत ।

(उ) 'अन्यथाऽन्यत्र, भस्मसात्करिष्यतीति, गृह्णन्नाशिषम्, जातुचिन्न, स्वकर्मपालनेनैव, श्वसुरयोश्च, चेमौ, अप्यनयोः, कथमेतन्निरुह्यते, त्यक्त्वाऽऽलस्यम्' एतेषां ससन्धिकानां पदानां सन्धिविच्छेदं कुरुत ।

(ग) गृहिणी कीदृशी वर्तते ? तस्याश्चारित्रिकं वैशिष्ट्यं प्रकाशयत ।

(घ) जाजलिर्वृद्धसेवामसिधारावहेलनवत्कठिनां मनुते । गृहिणी च वृद्धसेवां गृहिणीनां सामान्यं धर्मं मनुते । उभाभ्यां स्वतर्काश्चात्रोपस्थापिताः सन्ति । यूयं कस्य मतं स्वाभिमतं मनुध्वे ? तर्केणोपस्थापयत ।



(ङ) आलस्यं वै कार्यव्यापारहानेर्मूलं बीजं वर्तते साधुवर्य !

त्यक्त्वाऽऽलस्यं सावधानाऽस्मि कार्ये को वाऽऽलस्यादुत्थितो भूतिमार्गे ॥

अस्य श्लोकस्य भावार्थं प्रकाशयत ।

(च) 'स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः' इत्यस्य भगवद्गीतावचनस्य मूलं तात्पर्यं किम् ? एकस्मिँल्लघ्वनुच्छेदे लिखत ।

**१०. अधस्तनं नाट्यांशं पठित्वा छन्दोविषये एकमनुच्छेदं लिखत**

(ततः प्रविशन्ति गुरुणा सह वटवः पुस्तकहस्ताः)

वटवः - (सामूहिकरूपेण) गुरो प्रणमामः । (सर्वे नमस्कुर्वन्ति)

गुरुः - आयुष्मन्तो भवत । यथास्थानं उपविशत ।

(वटवः स्वस्थानेषु उपविशन्ति)

रामः - गुरो ! अद्य किं पाठयति भवान् ?

गुरुः - अद्य छन्दांसि शिक्षयामि ।

हरिः - छन्दसां ज्ञानेन किं भवति गुरो !

गुरुः - पद्ये कविताः शास्त्राणि च लेखितुं शक्यन्ते ।

कृष्णः - गुरो ! छन्दांसि कति सन्ति ? कुत्र पठ्यन्ते, के च छन्दस आचार्याः ?

गुरुः - वेदे लोके च छन्दांसि असङ्ख्यानि सन्ति भवन्ति च । छन्दोविषये अनेकानि ग्रन्थरत्नानि लिखितानि सन्ति । तेषु पिङ्गलच्छन्दःसूत्रम्, वृत्तरत्नाकरम्, छन्दःकौमुदी इत्यादयः सन्ति ।

हरिः - कथं छन्दोज्ञानं कर्तुं पार्यते ?

गुरुः - छन्दांसि मात्रिका वर्णमात्रिकाश्च भवन्ति । मात्रिकेषु आर्या, गीतिरित्यादयः सन्ति । वर्णमात्रिकाश्छन्दांसि समपाद-अर्धसमपाद-विषमपादवर्गेषु विभक्ताः सन्ति ।

हरिः - ततस्ततः किम् ?

गुरुः - एकस्मिन् श्लोके चत्वारः पादाः भवन्ति । ह्रस्वदीर्घव्यवस्थायां गणा आधृताः सन्ति । ते च गणा 'यमाताराजभानसलगाः' सन्ति । एतच्छन्दःशास्त्रस्य मूलसूत्रमस्ति ।

कृष्णः - नेपालिसाहित्ये संस्कृतसाहित्ये च प्रसिद्धानि छन्दांसि कति सन्ति ?

गुरुः - छन्दांसि कोटिपरिमितानि सन्ति । तेषु अनुष्टुप्, विद्युन्माला, उपेन्द्रवज्रा, इन्द्रवज्रा, उपजातिः, शालिनी, भुजङ्गप्रयातम्, प्रियंवदा, वसन्ततिलका, मालिनी, शिखरिणी, मन्दाक्रान्ता, शार्दूलविक्रीडितम्, स्रग्धरा, स्रग्विणी, द्रुतलिम्बितम्, इत्यादीनि छन्दांसि सन्ति ।

श्यामः - गणस्य परिचयः प्रयोगश्च कथं जायते ?

गुरुः - ह्रस्वदीर्घव्यवस्थायां गणस्य रचना जायते । एकस्मिन् गणे त्रयो वर्णा भवन्ति । गुरुवर्णं वक्ररेखया ह्रस्ववर्णं सरलरेखया बोध्यते । तत्र गतियतीनाञ्च विचारो विधेयः । 'आदिमध्यावसानेषु यरता यान्ति लाघवम् । भजसा गौरवं यान्ति मनौ तु गुरुलाघवम्' इति श्लोकश्च प्रसिद्धः अस्ति ।

(प्रा.डा. ऋषिरामपोखरेलस्य 'गुरुकुलम्' इति नाटकात् समुद्धृतम्)

११. **पौरस्त्यनाटकपरिचयसम्बद्धान्यधस्तनानि पद्यानि पठित्वा प्रदत्तानां प्रश्नानामुत्तराणि लिखत**

नाटकं ख्यातवृत्तं स्यात् पञ्चसन्धिसमन्वितम् ।
विलासर्द्ध्यादिगुणवत् युक्तं नानाविभूतिभिः ॥
सुखदुःखसमुद्भूतिनानारससमन्वितम् ।
पञ्चादिका दशपरास्तत्राङ्काः परिकीर्तिताः ॥
प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान् ।
दिव्योऽथ दिव्यादिव्यो वा गुणवान्नायको मतः ॥
एक एव भवेदङ्गी शृङ्गारो वीर एव वा ।
अङ्गमन्ये रसाः सर्वे कार्यं निर्वहणेऽद्भुतम् ॥

(विश्वनाथकृतसाहित्यदर्पणात् समुद्धृतम्)

(क) नाटकं कीदृशं स्यात् ?

(ख) नाटकेऽङ्कविधानव्यवस्था कीदृशी दृश्यते ?

(ग) नाटकस्य नायकलक्षणं किम् ?

(घ) अङ्गिरसत्वेन कयोः रसयोर्निर्देशो विहितोऽस्ति विश्वनाथेन ?

(ङ) निर्वहणसन्धौ को रसः कार्यः ?

(च) शिक्षकसाहाय्येन नाटकस्य पञ्चानां सन्धीनां नामानि लिखत ।

## लेखनम्

१. **शिक्षकात् श्रुत्वाऽधस्तनानि पदानि शुद्धतया लिखत**

भूतेषु, पर्यवसितम्, बुभुत्सकाः, अभिमुखीकर्तुम्, भूरिशः, निष्क्रामतः, शिरसि, प्रशस्यः, उन्मीलयति, तस्थुः, उड्डीयन्ते, भस्मीभूतम्, दर्शनीया, स्पर्द्धमाना, शवलिता, तपोनिष्ठान्, विनिर्माय, वन्दनीयः, शुश्रूषणम्, जिगमिषामि, परिवेष्ट्य, विस्मर्यताम्, श्वसुरयोः, बिभेमि, अनधीता, सशङ्का, निरुह्यते, भूतिमार्गे, परिपूरणाय, शक्ष्यति, सुकार्यात्, दीक्षाग्रहस्य, हानिकारिका, प्रस्थातुम् ।

२. **प्रदत्तयोः पद्ययोः शुद्धतयाऽनुलेखनं कुरुत**

शिरसि मम समृद्धे केशशैवालजाले
विविधशकुनयो वै नीडमारच्य तस्थुः ।
तदपि मुनिरतिष्ठन्निश्चलोऽसौ समाधौ
यमनियमधनाढ्यं किं जयेयुर्हि विघ्नाः ।
कमलिनीमकरन्दकधूलिभिः
शवलिता ह्रदिनीजलराशयः ।
ननु विलोकयतां किल मानसे
सुरशरासनविभ्रममादधुः ॥

३. **अधस्तनानां समस्तपदानां विग्रहवाक्यानि लिखत**

गुणाधाररूपः, नेपथ्यविधानम्, लघुरूपकेण, वकहंसगणाः, नवधान्यानि, प्रदर्शनयोग्यम्, वर्धितजटाजाले, यमनियमधनाढ्यम्, करक्षिप्ताम्, विहाराजिरम्, सुरशरासनविभ्रमम्, कलत्रपुत्रान्, नदीकूपधारादयः, नदीतटवासिनः, सन्ततिपालनम्, अतिथिसेवनम्, तत्सन्निधौ, प्रतिदिवसम्, विषमिश्रितमोदकम्, त्रिभुवनभवम्, भोगभुक्त्यै, विष्टापातिनीम्, वनान्तर्वर्तिनीम्, श्वसुरयोः, क्षीणश्रवणौ, पथ्यभोजनस्य, कासश्वासैः, चिन्ताकुलया, यथासम्भवम्, जनकपुरनिवासी, क्रयविक्रयव्यापारम्, अन्यखाद्यवस्तूनाम्, तदधिकम्, ईशप्राप्तये, लोकहितकारिणा, मदवर्धिकाः, अक्षयभोजनम्, जनजनपदकार्यम्, दम्भमानौ, सर्वलोकाः ।

४. **अधस्तनानां पदानां पाठानुकूलमर्थं लिखत**

बुभुत्सकाः, परिषद्, दधते, नीडम्, उन्मीलयति, नद्धः, मुहुः, शवलिता, नीरम्, वाढम्, शुश्रूषणम्, प्लवः, द्रुतम्, भुञ्जताम्, जरत्तरः, शक्ष्यति, अनल्पभूत्यै, अन्तरायाः, ईहे, पटाक्षेपः ।

५. **प्रदत्तानां ससन्धिकानां पदानां सन्धिं विच्छिद्य लिखत**

भवानस्मिन्नेव, उद्धरत्वित्यनुरुन्ध्महे, वयसीह, विषवन्मता, तपश्चरित्वा, उत्थितास्त्यागतः, गृह्णन्नाशिषम्, प्रयुञ्जानश्च, जातुचिन्न, स्वकर्मपालनेनैव, श्वसुरयोश्च, अप्यनयोः, इत्यत्राहम्, तन्निर्वहति, लक्ष्मीनारायणयोरेव, त्यक्त्वाऽऽलस्यम्, वाऽऽलस्यादुत्थितः, यतमानाऽस्मि, गुरुजनमुखान्मया, वैश्योऽस्ति, प्रेषितोऽस्तीति, प्रशस्योऽस्ति, तुलाऽऽस्ते, सिद्धयोऽप्यन्तरायाः, प्रयोक्तुर्बुद्धिरेव ।

६. **नाटकस्य चतुर्थदृश्यस्य सामान्यगद्ये रूपान्तरणं कुरुत ।**

७. **अधस्तनानां पदानां प्रयोगेण सार्थानि मौलिकवाक्यानि रचयत**

तिष्ठन्, यथासम्भवम्, गायानि, सम्प्रति, शिरसि, प्रणमाम, उड्डीयमानः, विलोक्य, मुहुः, केवलम्, भिक्षार्थम्, समाकृष्य, भूमौ, वन्दनीयः, तदनु, परिवेष्ट्य, सुदुःसहम्, द्रुतम्, सन्दधामः, सर्वदा, भुञ्जताम्, जातुचित्, रात्रिन्दिवम्, समाधातुम्, वन्दे, स्पृष्ट्वा, हिताय, प्रस्थातुम् ।

८. **प्रदत्तस्य पद्यस्यान्वयं प्रदर्शयत**

किमद् वा प्रमाणं दिवश्चेति बोद्धुं
विहाराजिरं वा मघोनो विबोद्धुम् ।
इमे नन्दनं किं जयन्तीति रीत्या
मुहुः स्पर्द्धमाना विभान्तीह वृक्षाः ॥

९. **प्रदत्तं पद्यद्वयमाश्रित्य हेमन्तर्त्तुं वर्णयत**

तुहिनं नवनीतपिण्डवत्
पथि वृक्षेष्वजिरेषु राजते ।
वकहंसगणा विहारिणो
घनखण्डा इव भान्ति किं जले ॥
कनकानि फलन्ति किं तरा-
विति नारङ्गफलानि विभ्रमम् ।
दधते मनुजेषु भूरिशो
नवधान्यानि च क्षेत्रजानि नः ॥

१०. **नाटकस्य प्रथमदृश्यमवलम्ब्य तपोवनरमणीयताया विषये एकमनुच्छेदं लिखत ।**

११. **अधस्तनस्य पद्यस्य सान्वयं भावार्थं प्रकाशयत**

श्रव्यं दृश्यं त्रिभुवनभवं नैव सत्यं समग्रं
बुद्ध्वा चैतद् वयमिह परेशे मतिं सन्दधामः ।
दाराः पुत्रा द्रविणवसने सन्ततं सत्यमात्मा
भोक्तुं चाप्तुं प्रयतनपरान् किं गृहस्थान् वदाम !

१२. **नाटकस्य प्रथमद्वितीयदृश्ये आधृत्य अधस्तनान् प्रश्नानेकवाक्येनोत्तरयत**

(क) चटकदम्पतिभ्यां कुत्र नीडं रचितमासीत् ?

(ख) तपसा जागृतो मुनिः स्वस्य कीदृशं शरीरं ददर्श ?

(ग) पक्षी केन दग्धो भवति ?

(घ) स्वरूपनिष्ठा ऋषयः किं जानन्ति ?

(ङ) गृहस्थानां कर्तव्यानि कानि ?

(च) के गृहस्थानां साहाय्येन जीवन्ति ?

(छ) मुनिं परितः स्थिता युवानः किमर्जयितुमिच्छन्ति ?

(ज) यतिभिः कुत्र बहुकालं न स्थातव्यम् ?

**१३. अधस्तनानां प्रश्नानां सङ्क्षेपेणोत्तरं लिखत**

(क) तपोनिरतस्य मुनेर्जाजलेः शारीरिकी अवस्था कीदृश्यासीत् ?

(ख) तपस्यात उत्थितो जाजलिः सर्वप्रथमं स्वस्य सिद्धेः परीक्षणं कथं व्यदधात् ?

(ग) जलेन विना धरायां का समस्या आपद्यते ?

(घ) वृद्धा जाजलिं कं मन्वते ?

(ङ) कथं विषवद्विषया अपि अस्माकमतिप्रिया भवन्ति ?

(च) जाजलिः गृहिण्याः समक्षं किमर्थं लज्जामन्वभवत् ?

(छ) गृहिण्याः कर्मयोगः कीदृशोऽस्ति ?

(ज) तुलाधरस्य वैश्यस्य चारित्रिकं वैशिष्ट्यं किम् ?

(झ) 'लोकहितकारिणा सर्वभूतहितकारिणा च कर्मणा सर्वे परितुष्यन्ति' इत्यस्य वाक्यस्याशयं स्फुटीकुरुत ।

**१४. तुलाधरस्य चरित्रेण सह जाजलेश्चरित्रस्य तुलनां विधाय तयोश्चारित्रिकं वैशिष्ट्यं पृथक्कुरुत ।**

**१५. अस्मान्नाटकादस्माभिर्लब्धः सन्देशः कः ? स्वभाषायामेकमनुच्छेदं लिखत ।**

**१६. 'सिद्धिप्राप्तये तपश्चरणमावश्यकमस्ति, सिद्धये चास्माभिः सर्वथा यतनीयम्' इति विचारो जाजलिमधितिष्ठति, गृहिणीतुलाधरौ तु स्वकर्मपालनेनैव सिद्धिरर्जयितुं शक्यते इति विचार्य सिद्धिप्राप्तये जातुचिन्न प्रयतेते । अत्र यूयं कस्मिन् विचारे समर्थनं कुरुथ ? स्वमतमुपस्थापयत ।**

**१७. अधस्तनानां कृदन्तशब्दैर्निष्पन्नानां पदानां प्रकृतिप्रत्ययविभागं कुरुत**

तिष्ठन्, प्रपूरणीयम्, एत्य, प्रणम्य, नद्धः, रुद्ध्वा, दर्शनीया, बोद्धुम्, बुभुक्षा, दधाना, जीवनम्, विधातव्यम्, सम्पन्नम्, भौतिकम्, उपदेष्टुम्, भोक्तुम्, सिद्धिः, विज्ञातम्, यतमाना, प्रशस्यः, विहाय ।

**१८. प्रदत्तानां तद्धितान्तपदानां प्रत्ययं प्रकृत्या विच्छेदयत**

सभ्याः, सामयिकः, भावत्कम्, पक्षी, ग्रामीणाः, तपस्विनः, भैक्ष्यम्, जरत्तरौ, स्वास्थ्यम्, आलस्यम्, सफलताम्, काषायम्, भिक्षुत्वम्, संयमित्त्या ।

**१९. प्रदत्तानां सुबन्तपदानां प्रातिपदिकविभक्तिवचनानि निर्दिशत**

समेषाम्, कर्ममर्यादायाः, पथि, शिरसि, पक्षिभिः, अमुम्, असौ, समाधौ, चेतः, मे, दिवः, मघोनः, मुनयः, समाधेः, गृहिभिः, यूयम्, अस्माकम्, युवानः, दष्टान्, बुधैः, सिद्धेः, भोगभुक्त्यै, भवन्तः, का, श्वसुरयोः, संयमिततया, तपसा, सिद्धये, पत्युः, इमौ, वृद्धयोः, मम, शुश्रूषायै, परिपूरणाय, जिज्ञासाम्, यात्रायाः, दूराद्, ग्रामीणया, वस्तूनाम्, कर्मणा, वाचा, हिताय, सर्वे, प्रयोक्तुः ।

२०. **अधस्तनानां क्रियापदानां धातुलकारपुरुषवचनानि निर्दिश्यन्ताम्**

प्रदद्यात्, गायानि, स्यात्, वर्ते, तस्थुः, आदधुः, जानन्ति, यामि, स्याम, उपदिशतु, चलिष्यामः, प्रतिष्ठन्ते, यामः, अध्यास्ते, अनुरुन्ध्महे, स्मर्यताम्, करिष्यामि, भुञ्जताम्, प्रतीक्ष्यताम्, आयाहि, बिभेमि, गृह्यताम्, स्याताम्, भण्यताम्, जाने, प्रस्थास्ये, आस्ते, क्रीणन्ति, अभिवादये, विदधतु ।

२१. **अधःप्रदत्तं गद्यांशं पठित्वा सङ्क्षेपेण तत्सम्बद्धं प्रश्नद्वयमुत्तरयत**

यद्यपि कविकर्मनिर्वहणप्रवणानां समेष्वपि साहित्याङ्गेषु परममहदुत्तरदायित्वम्, परं नाटकाभिधानेन समुपनिबद्धे प्रबन्धे ग्रन्थकारस्य यादृशः कार्यभारस्तथा नेतराङ्गेषु । इममेवार्थं लक्ष्यीकृत्य व्यलेखि भरतेन महामुनिना-

**न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला ।**

**न स योगो न तत्कर्म नाटके यन्न दृश्यते ॥**

तादृशस्य नाटकस्योत्पत्तिविषये विदुषां सुमहान् मतभेदः परिलक्ष्यते । 'नाटकस्य पूर्वप्रादुर्भावो यवन(ग्रीस)देशात्तत एवार्यास्तस्य निर्माणमभिनयं च शिक्षितवन्तः' इति बहूनां प्रतीच्यविदुषां तदनुसारिणां चाभिमतम् । अत्रार्थे ते संस्कृतनाटके प्रयुज्यमानं यवनिकाशब्दमुदाहरन्ति । परं वेदसंहितायाम्, ब्राह्मणभागे, प्राचीनमहाकाव्ये, पाणिनीयायामष्टाध्याय्यां पातञ्जलेर्महाभाष्ये च पुरातननाटकानां बहूनि निदर्शनानि समुपलभ्यन्ते । एवं च रामायणे 'व्यामिश्रक' शब्दः संस्कृतप्राकृतनाटकार्थे प्रयुक्तः । अष्टाध्याय्यां 'पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः ४। ३। ११०' 'कर्मन्दककृशाश्वादिनिः ४। ३। १११' इति सूत्रद्वये महामुनिना पाणिनिना शिलालिकृशाश्वयोर्नटसूत्रयोरुल्लेखो व्यधायि । महाभाष्ये च शौभिक-शौभिका-शोभनिकाप्रभृतिशब्दैः सुकृतिना मुनिवरपतञ्जलिना भारते नाट्यरङ्गस्य विद्यमानता स्फुटीकृता । तत्रैव च बालिवध-कंसवधप्रभृतिशब्दानां प्रयोगोऽवलोक्यते । किं बहुना ? मगधराजो बिम्बसारो नागराजसम्माननाय नाटकाभिनयमकरोत् । बुद्धदेवश्च नाट्याभिनयस्य कर्तव्यतामुपादिशत्तदनुशासने । इत्थं चातिपुरातनादनिर्दिष्टसमयादारभ्य वेदशास्त्रलोकमय्यां प्रयोगस्थानत्रितय्यामपि भारते वर्षे नाटकप्रचारपर्यालोचनया 'पौरस्त्या नाटकं यवनदेशाज्जगृहुः' इति मतं सर्वतोभावेन दुर्विदग्धानामज्ञानविजृम्भितम् ।

अथावशिष्टो यवनिकाशब्दविचारः । शुद्धः शब्दो जवनिका यमनिका वा वर्तते । ततो यवनिकापदं यमनिकाया अपभ्रंशरूपेणैव सर्वसाधारणप्रयोगेषु लब्धास्पदम् । अतस्तदाधारेणापि नाटकेषु पौरस्त्यान् प्रति यवनानां नोत्तमर्णत्वं सम्भवतीति सर्वं सुस्थम् ।

(उत्तररामचरितम् इति नाटकस्य शेषराजरेग्मिणो व्याख्याया उदाहारादुद्धृतम्)

## प्रश्नौ

(क) साहित्ये नाटकस्य महत्त्वं कीदृशमस्ति ? निर्दिशत ।

(ख) नाटकेषु पौरस्त्यान् प्रति यवनानामुत्तमर्णत्वं सम्भवति न वा ? युक्त्या प्रतिपादयत ।

२२. **प्रदत्तं गद्यांशमाधृत्य निर्दिष्टान् प्रश्नानुत्तरयत**



निसर्गतो वेदादेवारभ्य सर्वमपि संस्कृतवाङ्मयं पर्यावरणचिन्तने दत्तावधानं दृश्यते । संस्कृतवाङ्मयं पर्यावरणरक्षार्थं जन्तुपादपयोर्मध्ये सामञ्जस्यं सन्तुलनं च सर्वतोभावेनापेक्षते । यथार्थतो विविधप्राणिभिः श्वसनक्रमे प्राणवायुः (अक्सिजन) गृह्यते, उच्छ्वसनक्रमे च दूषितवायुः (कार्बनडाइआक्साइड) वायुमण्डले विमुच्यते, पुनस्तदेव दूषितवायुः पादपैर्गृह्यते । अयमेव क्रमः सर्वदैव प्रचलन्नस्त्यासृष्टितः । अतः पर्यावरणरक्षार्थं पादपाः सर्वथा रक्षणीयाः। पर्यावरणसन्तुलने नास्त्यस्मादपर उपायः । ऋग्वेदोऽपि कथयति-

**"मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः॥**
**मधु नक्तमुतोषसो मधुमत्पार्थिवं रजः । मधु द्यौरस्तु नः पिता ॥**
**मधुमान्नो वनस्पतिर्मधुमानस्तु सूर्यः । माध्वीर्गावो भवन्तु नः ॥"**

परवर्तिनि पौराणिके साहित्ये वृक्षपूजनं वृक्षमहोत्सवं च उपदिशद्भिराचार्यैर्वृक्षाणां महत्ता मुक्तकण्ठेन प्रतिपादिता । तेषां प्रतिपत्तिरासीत् यदारोपिता वृक्षा मानवं पुत्रवदाजीवनं सेवन्ते । वराहपुराणवचनमेवमस्ति-

**"यथा सुपुत्रः कुलमुद्धरेद्धि यथातिकृत्स्नान् नियमप्रयत्नान् ।**
**तथा प्ररोपाः फलपुष्पभूताः स्वं स्वामिनं नरकादुद्धरन्ति ॥"**

न केवलमेतावदेव अपितु वृक्षरोपको नरो ब्रह्मलोकं गत्वा सुखमश्नुते । यथा निगदितं मत्स्यपुराणकारेण-

**"यश्चैकमपि राजेन्द्र ! वृक्षं संस्थापयेन्नरः ।**
**सोऽपि स्वर्गे वसेद्राजन् यावदिन्द्रायुतत्रयम् ॥**

निसर्गत ईश्वरस्त्रिगुणभेदेन भिन्नस्वरूपमवधार्य प्रकृतौ विभाति । प्रकृतिरपि ईश्वरस्येदं रूपं दृष्ट्वा वृक्षमाश्रित्य विश्वं रक्षति । अतः प्राकृतिकसम्पत्सु सकलप्राणिनां वृक्ष एवाश्रयः । अतो वृक्षाणां रोपणं संवर्धनं संरक्षणं च मानवानां परमं कर्तव्यमस्ति ।

पर्यावरणदृष्ट्या अश्वत्थवृक्षस्य महत्त्वं सर्वोपरि वर्तते । अस्य वृक्षस्य नीचैः स्थिते सति मनः प्रसन्नतां याति । अश्वत्थः सर्वाधिकं प्राणभूतं वातं प्राणिनां कृते उत्सृजति, दूषितवायुं च प्रभूतमवशोषयति । अतः कथयति भगवान् कृष्णो गीतायाम्- "अश्वत्थः सर्ववृक्षाणाम्" इति ।

आधुनिकयुगे पर्यावरणप्रदूषणं विश्वस्य प्रमुखा समस्या वर्तते। पर्यावरणस्यासन्तुलनेन प्रतिदिनं पृथिव्यास्तापक्रमो वर्धमानोऽस्तीत्यधुना समेषां चिन्ताया विषयो वरीवर्ति । तत्र सर्वकारैः, विविधसंस्थाभिश्च वृक्षरोपणकार्यक्रमा विधीयन्ते । वृक्षा एव सर्वविधं पर्यावरणप्रदूषणं शमयितुं शक्नुवन्ति । पर्यावरणदिवसः सङ्घुष्टोऽस्ति । प्रतिवर्षं जुनमासस्य पञ्चमे दिने पर्यावरणदिवसः मन्यते । तस्मिन् दिवसे पर्यावरणविषयका विविधाः कार्यक्रमा अनुष्ठीयन्ते । परन्तु परिणामः सन्तोषप्रदो नावलोक्यते । केवलं पर्यावरणस्य विषये भाषणेन पर्यावरणरक्षा न सञ्जायते। तदर्थं सर्वेऽपि पर्यावरणस्य रक्षाया विषये सचेतसः कार्याः। अनन्तरं सर्वैश्च पर्यावरणसंरक्षणाय व्यवहारेणैव यतनीयम् ।

## प्रश्नाः

**(क) एकेन वाक्येन उत्तरयत**

(अ) संस्कृतवाङ्मयं किमपेक्ष्यते ?

(आ) के मानवं पुत्रवदाजीवनं सेवन्ते ?

(इ) ईश्वरः कथं प्रकृतौ विभाति ?

(ई) अश्वत्थः किं करोति ?

(उ) अधुना विश्वस्य प्रमुखा समस्या का ?

**(ख) सङ्क्षेपेणोत्तरयत**

(अ) संस्कृतवाङ्मयं पर्यावरणचिन्तने कथं दत्तावधानं दृश्यते ?

(आ) 'सकलप्राणिनां वृक्ष एवाश्रयः' इति भणितिं तर्कैः प्रमाणयत ।

(इ) पर्यावरणसंरक्षणोपायाः के भवितुं शक्नुवन्ति ? स्वविचारं प्रस्तुत ।

## व्याकरणानुशीलनम्

**१. अधस्तनानां वाक्यानां कोष्ठप्रदत्तसङ्केतमाधृत्य वचनपरिवर्तनं कुरुत**

(क) मान्याः सभ्याः कर्ममर्यादायाः सम्बन्धे बुभुत्सका दृश्यन्ते । (द्विवचने)

(ख) किमधिकृत्य गायानि ? (बहुवचने)

(ग) तपोनिष्ठस्य मम कियान् समयो व्यतीतो भवेत् ? (बहुवचने)

(घ) अपसारणस्य कारणाद् घासाच्छन्नशिरसि रचितकुलायाः पक्षिण उड्डीयन्ते । (एकवचने)

(ङ) गृहस्थानां साहाय्येन ब्रह्मचारिणो वानप्रस्थाः तपस्विनः संन्यासिनश्च जीवन्ति । (एकवचने)

(च) एवमेव करवाम । (द्विवचने)

(छ) वयमपि किञ्चिन्नैतिकशिक्षामत्रार्जयितुमिच्छामः । (एकवचने)

(ज) ग्रामीणाः फलानि ददति । (द्विवचने)

(झ) शीघ्रमायाहि । (बहुवचने)

(ञ) मदीयौ श्वसुरौ जरत्तरौ, क्षीणदृष्टिकौ, क्षीणश्रवणौ च स्तः । (एकवचने)

(ट) स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः । (बहुवचने)

(ठ) मनसा कर्मणा वाचा च समेषां हिताय प्रयतमानोऽस्मि । (द्विवचने)

(ड) लोकहितकारिणा, सर्वभूतहितकारिणा च कर्मणा सर्वे परितुष्यन्ति । (एकवचने)

(ढ) मदवर्धिकाः सिद्धयोऽप्यन्तराया एव । (द्विवचने)

(ण) धृतिगतिमतिमन्तः सर्वलोका भवन्तु । (एकवचने)

२. **अधस्तनमनुच्छेदं बहुवचने परिवर्तयत**

मुनिवर ! मया सिद्धये जातुचिन्न प्रयतितम् । न च कैश्चिदनुगृहीताऽहम् । अनधीता गृहिणी अविहिततपश्चर्या चाहं तत् कथं सिद्धा स्याम् ? सिद्धस्तु भवान्, यो दृष्टिमात्रेण चटकां भस्मसात्कृतवान् ।

३. **कोष्ठस्थसङ्केतं पुरस्कृत्य वाक्यानां कालपरिवर्तनं कुरुत**

(क) विद्यार्थिनोऽवश्यं प्रवेशिकामुत्तरिष्यन्ति । (अनद्यतनभूतकाले)

(ख) असौ गुहामुखे तपति । (परोक्षानद्यतनभूतकाले)

(ग) सत्यं सिद्धोऽस्ति मुनिः । (सामान्यभविष्यत्काले)

(घ) शकुनयो नीडमारच्य तस्थुः । (वर्तमानकाले)

(ङ) उड्डीयमानः कश्चन पक्षी विष्टां पातयति, या जाजलेर्दक्षिणकरे पतति ।(अनद्यतनभूतकाले)

(च) जाजलिः किञ्चिद्रोषदृष्ट्या पक्षिणं विलोकयति । (परोक्षानद्यतनभूतकाले)

(छ) इमे नन्दनं किं जयन्ति ? (सामान्यभविष्यत्काले)

(ज) अधुना समाधेर्विरतोऽस्मि । (अनद्यतनभविष्यत्काले)

(झ) वने सञ्चरन्तो वृषास्तर्णकाद्याः खगा महिष्यो वा इह नीरं पिबन्ति । (परोक्षानद्यतनभूतकाले)

(ञ) अस्माकं ग्राममेत्योपदिशत्विति प्रार्थयामहे । (सामान्यभविष्यत्काले)

(ट) अहं गृहत्रयाद् भिक्षां प्राप्यैव जीवननिर्वाहं करिष्यामि । (सामान्यभूतकाले)

(ठ) अहं जरत्तरश्वसुरयोः सेवायामस्मि । (अनद्यतनभूतकाले)

(ड) अहं सशङ्का भवामि । (सामान्यभूतकाले)

(ढ) यात्रायाः सफलतां च कामये । (अनद्यतनभविष्यत्काले)

(ण) तत्रैत्य आतिथ्यं स्वीकर्तुमनुरुन्धे । (अनद्यतनभूतकाले)

**४. निर्दिष्टकार्यं कुरुत**

**(क) अधस्तनमनुच्छेदं सामान्यभविष्यत्काले परिवर्तयत**

मम ग्रामे एकमुद्यानमस्ति । प्रातःकाले सायङ्काले च जना भ्रमणायात्र आगच्छन्ति । रविवासरे जनानां सङ्ख्याऽधिका भवति । अत्र सुगन्धपूरितः पवनः सर्वतः प्रवहति । तत्र विविधा पादपा लताश्च सन्ति । तेषु विचित्रवर्णानि पुष्पाणि विराजन्ते । मालाकारो यथाकालं जलादिदानेन पुत्रवत्सलतया पादपानां पालनं रक्षणं संवर्धनं च करोति । विशुद्धजलवायुसेवनेन प्रातःकालिकं भ्रमणम्, धावनं, व्यायामादिकं च कृत्वा, प्रमुदिता जना इह नन्दनकानने इव स्वर्गसुखमनुभवन्ति ।

**(ख) अनद्यतनभविष्यत्काले परिवर्तनं विधाय प्रदत्तस्यानुच्छेदस्य पुनर्लेखनं कुरुत**

अस्माकं विद्यालये एकः पुस्तकालयोऽस्ति । पुस्तकालयस्य प्रवेशद्वारस्य समक्षं कार्यालयः वर्तते । तत्र पुस्तकलयाध्यक्षः तिष्ठति । स गृहं नेतुं छात्रेभ्यः पुस्तकानि ददाति । पुस्तकालये अनेका मञ्जूषाः सन्ति, यत्र विषयानुसारं पुस्तकानि सम्यक्तया स्थापितानि सन्ति । मञ्जूषाभ्यः पुस्तकानि निष्कास्य छात्रा आसनेषु उपविश्य तानि पठन्ति, पठित्वा च तत्रैव पटलेषु स्थापयन्ति । पुस्तकालयस्यैकस्मिन् कोणे पटलेषु पत्रिकाः समाचारस्य पत्राणि च सन्ति, तत्र मञ्चेषु स्थित्वा छात्रास्तानधीयते । पुस्तकालयस्य वातावरणमत्यन्तं शान्तिपूर्णमस्ति ।

**५. वाच्यपरिवर्तनं कुरुत**

(क) अहं सावधानः सन् कार्यं कृतवान् ।

(ख) त्वं कालिदासेन विलिखितानि पुस्तकानि अपठः ।

(ग) सा लयमनुशील्य स्वरमाधुर्येण छन्दोबद्धानि पद्यानि गायति ।

(घ) उत्तरामचरितं सम्यगधीत्य युवाभ्यां तद्विषयकः सुलेखो लिखितः ।

(ङ) कंसवधानन्तरं कंसपत्न्य उच्चैः रुरुदुः ।

(च) बालिका विद्यालयस्य चत्वरे कन्दुकेन क्रीडन्ति ।

(छ) कृष्णैर्वत्सैर्गवां दुग्धं पीतम् ।

(ज) अस्माकं ग्राममागत्य प्रधानमन्त्रिणा सेतोरुद्घाटनं व्यधायि ।

(झ) मम छात्राः केशवराजशर्मणो वाक्यप्रदीपिकां सम्यक् पठन्तु ।

(ञ) अनीता उद्यानं परितो धावन्ती भ्रमति स्म ।

(ट) सैनिका विविधान्यस्त्राणि गृहीत्वा युद्धक्षेत्रमगच्छन् ।

(ठ) मयाऽक्षयभोजनं भुक्तं सम्प्रत्येव ।

(ड) गोपाला गां पयो दुहन्ति ।

(ढ) मम पित्राऽहं देवघट्टं नीतः ।

(ण) न च कैश्चिदनुगृहीताऽहम् ।

(त) तव यशोऽभिवर्धताम् ।

६. **अधस्तनगद्यांशस्य वाक्यानां वाच्यपरिवर्तनं विधाय पुनर्लेखनं कुरुत**

कदाचित् कश्चित् काकः बुभुक्षितोऽभवत् । स भूमौ एकं मांसखण्डमपश्यत् । स तं मांसखण्डं मुखेऽगृह्णात् । उड्डीय स वृक्षशाखायामुपाविशत् । एका शृगाली वृक्षसन्निधौ प्रापत् । सा काकं दृष्टवती । काको मांसखण्डं भुञ्जान आसीत् । शृगाली लोभमकरोत् । शृगाली धूर्ततामकरोत् । सा वृक्षनिकटेऽगच्छत् । सा काकमकथयत्- 'काक ! त्वमत्यन्तं सुन्दरोऽसि । तव सुन्दरता विश्वं जयति । तव सौन्दर्यं मां वशीकृतवत् । अहं त्वादृशं विहगं दृष्टवती नास्मि । तव स्वरोऽपि मधुरो वर्तते । तव स्वरोऽपि मामाकर्षत् । अतोऽहं त्वां प्रशंसामि ।' काकः स्वप्रशसां श्रुतवान् । तस्य मनसि हर्षः समुत्पन्नोऽभवत् । स स्मितमहसत् । हसनक्रमे तस्य मुखात् मांसखण्डो भूमौ अपतत् । शृगाली मांसखण्डं भुक्तवती । ततः सा ततः पलायितवती ।

७. **जाजलिगृहिण्योरधःप्रदत्तस्य संवादस्य नेपालिभाषायामनुवादं कुरुत**

गृहिणी - अहमहर्निशं पत्युः श्वसुरयोश्च सेवायै दत्तावधानाऽस्मि । मदीयौ श्वसुरौ जरत्तरौ, क्षीणदृष्टिकौ, क्षीणश्रवणौ च स्तः, अनयोः स्वास्थ्यं कथं सबलं स्यात् ? कथं चेमौ तुष्टौ स्याताम् ? अप्यनयोः सेवायां त्रुटिस्तु न जाता ? इत्यत्राहं सशङ्का भवामि ।

जाजलिः - वृद्धयोः श्वसुरयोः शुश्रूषा त्वसिधारावहेलनवद् दुष्करा भवति । कथं खलु भवती तन्निर्वहति ? वृद्धसेवायां पथ्यभोजनस्य तप्तजलस्य औषधजातस्य च व्यवस्थापनं विधातव्यं भवति । कासश्वासैर्वातरोगा मधुमेहादय उच्चनिम्नरक्तप्रवाहादिरोगा मूत्रकृच्छ्र-मलस्तम्भादिरोगाश्च भवन्ति । रात्रिन्दिवमेव चिन्ताकुलया भवत्या कथमेतन्निरुह्यते ?

गृहिणी - अयि ! एतत्तु मम सौभाग्यम्, पित्रोः शुश्रूषायै समयः प्राप्तः । पित्रोः सेवा

लक्ष्मीनारायणयोरेव सेवेति मन्ये । एतत्तु गृहिणीनां कृते निर्धारितं कर्म, अत्र कठिनता का ?

जाजलिः - अस्त्येव काठिन्यं तु, परं भवत्या तन्न मतं भवेत् ।

८. **प्रदत्तानां वाक्यानां संस्कृतेऽनुवादं कुरुत**

(क) विश्वका सर्वोच्च दश शिखरहरूमध्ये आठओटा हिमालय नेपालमा नै छन् ।

(ख) हिमालयमा नै प्राचीन महर्षिहरूले तपस्या गरी सिद्धि प्राप्त गरेका थिए ।

(ग) पार्वतीको जन्मभूमि हिमालय नै हो, त्यसैले पार्वतीलाई हिमालयकी पुत्री भनिन्छ ।

(घ) भगवान् शिवको वासस्थान कैलाश हिमालयमा नै छ, त्यसैले हिमालयलाई शिवभूमि पनि भनिन्छ ।

(ङ) हिमालयको प्रकृति सुन्दर र रमणीय हुन्छ, त्यसैले पर्यटकहरू हिमालयप्रति सधैँ आकृष्ट हुन्छन् ।

(च) हिमालयमा बस्ने मानिसहरूको संस्कृतिले सबैलाई आकर्षित गरेको छ ।

(छ) हिमालय पूर्वीय सभ्यताको केन्द्र हो, हाम्रा सबै संस्कृति र संस्कार हिमालयसँग सम्बन्धित छन् ।

९. **अधो वर्तमानां सारिणीं पठित्वा तन्निष्पन्नानां शब्दानां प्रयोगं विधाय प्रत्येकमेकवाक्यं रचयत**

| **विग्रहः** | **व्युत्पत्तिः** | **निष्पन्नः शब्दः** |
|---|---|---|
| सुष्ठु ददाति | सु + दा + मनिन् | सुदामन् |
| अश्व इव तिष्ठति | अश्व + स्था + मनिन् | अश्वत्थामन् |
| सीयते | सी + मनिन् | सीमन् |
| सुशृणाति | सु + शृ + मनिन् | सुशर्मन् |
| पारं दृष्टवान् | पार + दृश् + क्वनिप् | पारदृश्वन् |
| राजानं कृतवान् | राजन् + कृ + क्वनिप् | राजकृत्वन् |
| सह योधितवान् | सह + युध् + क्वनिप् | सहयुध्वन् |
| प्रातः एति | प्रातर् + इ + क्वनिप् | प्रातरित्वन् |
| भूरि ददाति | भूरि + दा + वनिप् | भूरिदावन् |
| घृतं पिबति | घृत + पा + वनिप् | घृतपावन् |

| | | |
|---|---|---|
| कीलालं पिबति | कीलाल + पा + विच् | कीलालपा |
| विश्वं पाति | विश्व + पा + विच् | विश्वपा |

१०. **अधः प्रदत्तानि शब्दरूपाणि दृष्ट्वा तदधो वर्तमानानां शब्दानां रूपाणि लिखत**

| (क) सुदामन् | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सुदामा | सुदामानौ | सुदामानः |
| द्वितीया | सुदामानम् | सुदामानौ | सुदाम्नः |
| तृतीया | सुदाम्ना | सुदामभ्याम् | सुदामभिः |
| चतुर्थी | सुदाम्ने | सुदामभ्याम् | सुदामभ्यः |
| पञ्चमी | सुदाम्नः | सुदामभ्याम् | सुदामभ्यः |
| षष्ठी | सुदाम्नः | सुदाम्नोः | सुदाम्नाम् |
| सप्तमी | सुदाम्नि/सुदामनि | सुदाम्नोः | सुदामसु |
| सम्बोधनम् | हे सुदामन् | हे सुदामानौ | हे सुदामानः |

(अ) **अश्वत्थामन्** (आ) **सीमन्** (इ) **भूरिदावन्** (ई) **घृतपावन्**

| (ख) सुशर्मन् | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सुशर्मा | सुशर्माणौ | सुशर्माणः |
| द्वितीया | सुशर्माणम् | सुशर्माणौ | सुशर्मणः |
| तृतीया | सुशर्मणा | सुशर्मभ्याम् | सुशर्मभिः |
| चतुर्थी | सुशर्मणे | सुशर्मभ्याम् | सुशर्मभ्यः |
| पञ्चमी | सुशर्मणः | सुशर्मभ्याम् | सुशर्मभ्यः |
| षष्ठी | सुशर्मणः | सुशर्मणोः | सुशर्मणाम् |
| सप्तमी | सुशर्मणि | सुशर्मणोः | सुशर्मसु |
| सम्बोधनम् | हे सुशर्मन् | हे सुशर्माणौ | हे सुशर्माणः |

(अ) **पारदृश्वन्** (आ) **राजकृत्वन्** (इ) **सहयुध्वन्** (ई) **प्रातरित्वन्**

| ग) विश्वपा | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|

| | | | |
|---|---|---|---|
| प्रथमा | विश्वपाः | विश्वपौ | विश्वपाः |
| द्वितीया | विश्वपाम् | विश्वपौ | विश्वपः |
| तृतीया | विश्वपा | विश्वपाभ्याम् | विश्वपाभिः |
| चतुर्थी | विश्वपे | विश्वपाभ्याम् | विश्वपाभ्यः |
| पञ्चमी | विश्वपः | विश्वपाभ्याम् | विश्वपाभ्यः |
| षष्ठी | विश्वपः | विश्वपोः | विश्वपाम् |
| सप्तमी | विश्वपि | विश्वपोः | विश्वपासु |
| सम्बोधनम् | हे विश्वपाः | हे विश्वपौ | हे विश्वपाः |

(अ) **कीलालपा**

११. **उदाहरणमनुसृत्य सारिणीं पूरयत**

| **धातुः + प्रत्ययः** | **पुंलिङ्गे** | **स्त्रीलिङ्गे** | **नपुंसकलिङ्गे** |
|---|---|---|---|
| भू + क्तवतु | भूतवान् | भूतवती | भूतवत् |
| भू + क्त | .............. | .............. | भूतम् |
| पा + क्तवतु | .............. | .............. | पीतवत् |
| पा + क्त | पीतः | पीता | पीतम् |
| श्रु + क्तवतु | ................. | श्रुतवती | .............. |
| श्रु + क्त | श्रुतः | .............. | .............. |
| दृश् + क्तवतु | दृष्टवान् | .............. | .............. |
| दृश् + क्त | .............. | दृष्टा | .............. |
| प्रच्छ + क्तवतु | .............. | पृष्टवती | .............. |
| प्रच्छ + क्त | .............. | .............. | पृष्टम् |
| पच् + क्तवतु | .............. | .............. | पक्ववत् |
| पच् + क्त | पक्वः | .............. | .............. |
| वस् + क्तवतु | उषितवान् | .............. | .............. |
| वस् + क्त | .............. | .............. | उषितम् |
| गै + क्तवतु | .............. | .............. | गीतवत् |
| गै + क्त | .............. | गीता | .............. |

१२. **शिक्षकस्य सहयोगेनाधः प्रदत्तानां धातूनां क्तवतुप्रत्यये क्तप्रत्ययेन च निष्पन्नानां शब्दानां त्रिषु एव लिङ्गेषु प्रथमैकवचने रूपाणि लिखत (अकर्मकाणां धातूनां क्तप्रत्ययेन निष्पन्नः शब्दो नपुंसकलिङ्गस्यैकवचने भवति ।)**

गम्, हस्, दा, खाद्, भुज्, नी, स्वप्, वद्, तुद्, पठ्, लिख्, मन्, स्था ।

१३. **उदाहरणे प्रदत्तानि वाक्यानि पठित्वा क्तवतुप्रत्ययान्तानां पदानां प्रयोगेण पञ्चदश वाक्यानि विलिख्य तेषां वाच्यपरिवर्तनं च विधत्त**

उदाहरणम्-

(क) मम पुत्राः विद्वांसो भूतवन्तः । (कर्तृवाच्ये)

मम पुत्रैर्विद्वद्भिर्भूतम् । (कर्मवाच्ये)

(ख) भगिनी पुस्तकानि पठितवती ।

भगिन्या पुस्तकानि पठितानि ।

(ग) वृक्षात् पत्राणि पतितवन्ति ।

वृक्षात् पत्रैः पतितम् ।

(घ) नेतारो निर्वाचने प्रतिपक्षिणं जितवन्तः ।

नेतृभिर्निर्वाचने प्रतिपक्षी जितः ।

(ङ) अश्विनीकुमारौ च्यवनं युवानं कृतवन्तौ ।

अश्विनीकुमाराभ्यां च्यवनो युवा कृतः ।

१४. **क्त-क्तवतुप्रत्ययान्तानां पदानां प्रयोगेण स्वकृतशैक्षिकभ्रमणस्य वर्णनमेकेनानुच्छेदेन कुरुत ।**

१५. **उदाहरणमाश्रित्य प्रदत्तानां शब्दानां व्युत्पत्तिं प्रदर्शयत**

| शब्दः | विग्रहः | प्रकृतिप्रत्ययौ |
|---|---|---|
| शुभंयु | शुभमस्ति यस्य | शुभम् + युस् |
| अहंयु | | |
| ऊर्णायु | | |
| दण्डी | दण्डोऽस्ति यस्य | दण्ड + इनि |
| धनी | | |
| ज्ञानी | | |
| छत्री | | |

| | | |
|---|---|---|
| करी | | |
| कामी | | |
| रथी | | |
| बली | | |
| दण्डिकः | दण्डोऽस्ति यस्य | दण्ड + ठन् |
| धनिक | | |
| रथिक | | |
| ब्राह्मणवत् | ब्राह्मणेन तुल्यम् | ब्राह्मण + वति |
| शूद्रवत् | | |
| बन्धुवत् | | |
| मातृवत् | | |
| लोष्टवत् | | |
| आत्मवत् | | |
| स्वर्गवत् | | |
| पशुवत् | | |

१६. **उपरि सारिण्यां प्रदत्तानां शब्दानां प्रयोगेण प्रत्येकमेकैकं वाक्यं रचयत ।**

१७. **स्वाधीतानां तद्धितान्तानां पदानां प्रयोगेण कस्मिँश्चिद् विषये एकमनुच्छेदं विरच्य तद्धितान्तपदानि चिह्नीकुरुत ।**

## रचनात्मकं कार्यम्

१. **'छात्राणां कर्तव्यम्' इति विषये लघुनाटिकामेकां रचयत ।**

२. **नाटकस्य स्वरूपविषये पौरस्त्यानां पाश्चात्यानां च मान्यता कीदृश्यस्ति ? शिक्षकस्य साहाय्येनान्विष्याधीत्य च 'नाटकस्वरूपम्' इति विषये एकं निबन्धं रचयत ।**

३. **युष्माभिर्दृष्टस्य कस्यचिन्नाटकस्य विषयवस्तु प्रदर्श्य तत्सन्देशं च निरूपयन्तमेकमनुच्छेदं रचयत ।**

## पञ्चमः पाठः

# पितृभक्तिः

पुरन्दरस्य गृहं जनकपुरनगरस्य समीपस्थे कस्मिंश्चन ग्रामे वर्तते स्म । तस्य सुन्दरो नाम पुत्र आसीत् । किन्तु सोऽनुक्तग्राही आसीत् । ज्येष्ठानां वचनान्युपेक्ष्य स स्वाभिप्रायानुसारमेव कार्याणि सम्पादयति स्म । पुत्रस्यैतावता स्वभावेन पुरन्दरः खिन्नमना आसीत् ।

पुरन्दरो बुद्धिमानासीत्, किन्तु सोऽप्यनुक्तग्राही एव वर्तते स्म । ग्रामीणाः पुरन्दरस्य स्वानुगुण एव पुत्रो वर्तते, अतोऽनुक्तग्राहीति पृष्ठतो वार्तां कुर्वन्ति स्म । तच्छ्रुत्वा पुरन्दरो वदति स्म, “सत्यमहमनुक्तग्राही एवास्मि, किन्तु मम मनसि प्रभूता पितृभक्तिरस्ति, येषामाशीर्वादैर्मम जीवनं सुखमयं वर्तते । पितृभक्तिरेव मम सुखसूत्रं ममात्मजः सुन्दरोऽपि जानीयादिति मे हार्दमिति ।”

सुन्दरोऽन्येषामुपदेशं झटिति नैव विश्वसिति स्म । स्वयमेव परीक्ष्य निश्चयं कर्तुमुद्यतो भवति स्म । बाल्यकाल एव “अग्निर्दहति” इति मातुर्वचनमुपेक्ष्य परीक्षणाय तेनाग्नौ हस्तो निहित आसीत्, येन तस्य दक्षिणहस्ते दाहचिह्नमधुनापर्यन्तमासीत् । तारुण्येऽपि ग्रामसमीपस्थायां पुष्करिण्यां मकरोऽस्तीति जनानां वचनं श्रुत्वा परीक्षणाय निपतितः सोऽदृष्टवशादेव रक्षित आसीत् ।

पुत्रस्यैतादृशेन गुणेन पिता पुरन्दरश्चिन्तित आसीत्, परं तस्यैतादृशस्य स्वभावस्य गुणा अप्यासन् । तस्यैव ग्रामे काचन गौरीनाम्नी विधवा निवसति स्म, तस्या गृहं विशालं सुन्दरं चासीत् । रोगवशात् सा गृहस्याभ्यन्तरे एव मृतवती, तदनन्तरं तस्या बन्धुः कश्चन तद्गृहं विक्रेतुमैच्छत् । किन्तु ग्रामीणाः गौरी अधुनापि पिशाचीरूपेण तत्रैव निवसतीति वदन्ति स्म, यतो भीताः क्रेतारः शोभनमपि तद्गृहं भीतिवशात् नैव क्रेतुमग्रेसरा भवन्ति स्म । न्यूनमूल्येन प्राप्तं तद्गृहं क्रेतुं सुन्दर इच्छति स्म, किन्तु ग्रामीणानां वृत्तान्तैर्भीतः पुरन्दरस्तं निषेधति स्म । एतच्छ्रुत्वा सुन्दरो रात्रित्रयम् एकाकितया तत्र निवासं व्यदधात् । तत्र कापि पिशाची नास्तीति निश्चयं कृतवान् । तच्च विशालं गृहं पुरन्दरः क्रीतवान् । अनुक्तकारिणः पुत्रस्य स्वभावेन पुरन्दरोऽपि लाभान्वितो बभूव, किन्तु सुन्दरस्तस्याज्ञां नैव पालयति स्म ।

पुरन्दरस्य पार्श्वे दश-एकड-परिमितं क्षेत्रमासीत् । तत्र स उत्तमरीत्या कृषिकार्यं करोति स्म । पुत्रोऽपि तथैव करोतु इति स कामयते स्म । पुत्राय क्षेत्रं दत्त्वा तेन विहितं कृषिकर्म, क्षेत्रवर्धनं वा द्रष्टुं तस्य हृदयमुत्सुकमासीत् । किन्तु सुन्दरस्य एतस्मिन् विषये स्वीकृतिर्नासीत् । “कृषिकर्मणि परिश्रमस्तु विधीयते तथापि परिश्रमानुगुणो लाभो नैव भवति । यदि वाणिज्यं विधीयते तर्हि वर्षाभ्यन्तरे एव प्रभूतं

धनं सम्पाद्य वैभवपूर्णं जीवनं यापयितुं शक्यते। अतः किञ्चित् क्षेत्रं विक्रीय मूलधनं किञ्चिद् ददातु भवान्, येनाहं वाणिज्यमारभेय" इति सुन्दरः पितुः समक्षमवदत्।

"वाणिज्यमास्माकं वंशस्य वृत्तिर्न। वाणिज्ये वञ्चनम्, अनृतभाषणमित्यादयः दुर्गुणा अनिवार्या भवन्ति। कृषिकर्मणि तथा न कर्तव्यम्। कृषिकार्ये ममाप्यनुभवोऽस्ति, यतोऽहं साहाय्यं विधातुमपि समर्थः।" पुत्रस्नेहपरवशः पुरन्दर उक्तवान्।

पितुर्वचनं श्रुत्वा सुन्दर उच्चैरहसत्। पुनः स उक्तवान्, "वाणिज्यस्य ममेच्छा वर्तते, अतस्तस्योपायान् भवतोऽधिकं जानामि। वाणिज्यवृद्धये मया किं कर्तव्यमिति ममैव ज्ञानमधिकम्, भवतः पाण्डित्यं भवतः पार्श्वे तिष्ठतु। यद्यहं कृषिकर्मैवापि करिष्यामि, तदापि भवतोऽनुभवस्य साहाय्यं नैव ग्रहीष्यामि। आवयोः सहकार्यस्य विचारणामेव त्यजतु" इति। पुत्रस्नेहविमूढा पुरन्दरपत्नी सीता सुन्दरस्यैव वचनं गर्वेण प्रोत्साहितवती। मातापुत्रयोर्वचनं श्रुत्वा पुरन्दरः क्षेत्रक्रयणाय सञ्चितं धनं तस्मै दत्त्वा किञ्चित्खेदपुरःसरमुक्तवान्, "तव इच्छानुसारमेव करोतु" इति।

पितुर्धनमादाय सुन्दरो वाणिज्यमारब्धवान्। वाणिज्येन प्राप्तस्य धनस्य रक्षायै अनृतभाषणवञ्चनादिकमपि तस्य कर्तव्यमापतितम्। किन्तु वर्षाभ्यन्तरे एव तस्य प्रभूतं धनं सञ्चितं बभूव। एतद् दृष्ट्वा पुरन्दरोऽपि प्रसन्नः सन् पुत्रसमक्षं गत्वा उक्तवान्, "साधु कृतं पुत्र ! त्वं वाणिज्येऽसमर्थ इति मम विचार आसीत्, किन्तु त्वं समर्थोऽसीति ज्ञातवानस्मि, सर्वं क्षेत्रं गृहं वा विक्रीय वाणिज्यं करोतु, अहमपि तव वाणिज्ये अंशभाग् भवितुं वाञ्छामि" इति। पितुर्वचनं श्रुत्वा कुपितः सुन्दर उक्तवान्, "भवान् नीतिन्यायादिविषयेषु पाण्डित्यं प्रदर्शयति, किन्तु धनलुब्धो भवान् धनं विहायान्यन्नैव पश्यति। अनीत्या वञ्चनेन, अनृतभाषणेन वा धनार्जनं तु भवति किन्तु तस्य स्थिरता, मनसि सन्तोषो वा नैव भवतीति अनुभवेन ज्ञातवानस्मि। इतोऽपि वर्षं यावद् वाणिज्यमेव करिष्यामि। तावत्कालं यदि लाभो भवति तर्ह्येव वाणिज्यं करिष्यामि, नो चेत् कृषिकर्म एव पुनरारप्स्ये। न तावत् कमपि अंशभाजमहं स्वीकरोमि" इति।

"मम वचनं एष कदापि नैव शृणोति, अस्मिँस्तु पितृभक्तिलेशोऽपि न विद्यते।" पुरन्दरो मनसि विचारितवान्।

वर्षाभ्यन्तरे एव सुन्दरस्य वाणिज्ये महती हानिरभूत्। वाणिज्यस्य वर्धमानां हानिं दृष्ट्वा सुन्दरः कृषिकर्म आरब्धुमिष्टवान्। एतेन पुरन्दरः सन्तुष्टो बभूव। किन्तु सुन्दरः पित्राऽनुसृतां कृषिपद्धतिमनुसर्तुं नेच्छति स्म। "व्रीहिगोधूमादीनां कृषिकर्मणा न लाभो भवति। तेषां स्थाने तमालस्य आम्रवृक्षाणां च वाटिका निर्मातव्या। नारिकेलस्य, पुगीफलादीनां वा सस्यानि वर्धनीयानि" इति स पितरमुक्तवान्।

विद्यमानवाटिकाया नाशाय पुरन्दरस्य स्वीकृतिर्नासीत्। स उक्तवान्, "विद्यमानवाटिकाया नाशाय मम स्वीकृतिर्नास्ति। यदि स्वाभिप्रायानुसारमेव कर्माणि कर्तुं वाञ्छसि, तर्हि नवीनं क्षेत्रं स्वयमेव क्रीणीहि"

इति । किन्तु सुन्दर एनं विषयं नाङ्गीकृतवान् ।

पुरन्दर एतावता कार्यं करिष्यते चेत् सर्वनाश आपतिष्यतीति स्वपत्नीमुक्तवान् । पत्नी च "सर्वं ललाटलिखितानुगुणमेव भविष्यति, किन्तु येन पुत्रस्य खेद उत्पद्यते तादृशं कर्म न करोतु" इत्युक्तवती ।

पुरन्दरः पत्न्या वचनं नेष्टवान् । स पुनः पुनः पुत्रस्याग्रे हितोपदेशस्य व्यर्थप्रयत्नं विहितवान् । किन्तु तस्य कोऽपि प्रभावो न दृष्टः । अन्त्ये च स उक्तवान्, "अहं यावज्जीवामि तत् कर्तुमनुमतिं नैव प्रदास्यामि । यावन्मम प्राणाः वर्तन्ते तावन्ममैवेच्छानुसारं कृषिर्भविष्यति । यदि तव स्वेच्छानुसारं करणस्य वाञ्छा, तर्हि अन्यदेव क्षेत्रं क्रीत्वा तथा करोतु" इति ।

सुन्दरोऽपि तत् कर्तुं समर्थ एवासीत् । तस्मिन् ग्रामे कश्चन माधवनामा कृषीवलो भूमिपतिरासीत् । तस्य पुत्री उमा सुन्दरस्याचरणं दृष्ट्वा प्रभाविताऽसीत् । सा सुन्दरेण सहोद्वाहं कर्तुं समुत्सुकाऽसीत् । "सुन्दरमेव पतिं वृणोमि" इति सा सर्वेषां पुरतस्तारस्वरेण निगदति स्म । पुत्र्या एतादृशीमिच्छां दृष्ट्वा माधवः सुन्दरम् "यदि मम पुत्र्या सहोद्वाहं करिष्यसि, तर्हि दश-एकडपरिमितं क्षेत्रं दास्यामि" इति प्रस्तावितवान् आसीत् । सुन्दरस्य कृते एषोऽवसरः समीचीन एवासीत् । उद्वाहस्य समये पत्न्या सह क्षेत्रमपि प्राप्तं भविष्यति । किन्तु माधवपुरन्दरयोः परस्परं वैरमासीत्, येन तयोर्विवाहे समस्या उद्भूताऽसीत् । माधवो वदति स्म, "मम पुत्र्या सह यदि विवाहं कर्तुं वाञ्छसि तर्हि त्वया मातापितरौ विहायान्यस्मिन्नेव गृहे उमया सह एकाकिना स्थेयम्" इति ।

यदा स्वस्य पिता पुरन्दरोऽन्यदेव क्षेत्रं क्रेतुमादिष्टवान् तदैव सुन्दरो माधवस्य प्रास्ताविकं पित्रोः समक्षमुक्तवान् । "मातापितरौ विहाय पुत्रः स्वपत्न्या सहान्यस्मिन् गृहे स्थास्यति" इति विषयं स्मारं स्मारं पुरन्दरस्य सीतायाश्च हृदयं खिद्यति स्म । एकत्र पुत्रस्य विचारपरिवर्तनमसम्भवमिवासीत्, अपरत्र च मृत्युसमाना पुत्रवियोगपीडाऽऽसीत् । पुत्रवियोगस्य महतीं पीडां सोढुमसमर्था सीता प्रतिदिनं तस्मिन्नेव विषये चिन्तनं कर्तुमारभत । तदानीमेव सा स्वस्य दूरबन्धुं गोविन्दनामधेयं स्मृतवती, यो यं कमपि स्मारयितुं, मनः परिवर्तयितुं वा समर्थ आसीदिति जनश्रुतिरासीत् । त्वरितं तस्य गृहं गत्वा सीता स्वसमस्यां निवेदितवती ।

मनसः परिवर्तनाय सुन्दरेण दिनद्वयं यावद् गोविन्दस्य गृहं गन्तव्यमासीत् । द्वितीयवारं यदा गम्यते, तदैव प्रभावो दृश्यते । सीताया मुखतः समस्यां श्रुत्वा गोविन्द उक्तवान्, "यत्कृतं तदेव भोक्तव्यमस्माभिः । भवती स्वपुत्रीं यदुपदिष्टवती तदेव पुत्रोऽपि कर्तुं वाञ्छति । भवतः पुत्री जामात्रा सह श्वश्रूश्वशुरौ विहाय स्थातुं शक्नोति चेद् भवत्याः पुत्रः कथं न ? पुत्र्याः श्वश्रूश्वशुरयोः शापवशादेव एतादृशी अवस्थाऽपतिता विद्यते" इति । सीताऽपि विषयं परिवर्त्य उक्तवती, "अधुनाऽहमस्मिन् विषये वार्तालापं कर्तुं नेच्छामि । सुन्दरस्य हृदये पितृभक्तेर्लेशमात्रमपि नास्ति । तस्य हृदये पितृभक्तिर्यथा जागरिता भवेत्, तथोपायं चिन्तयतु ।"

सीताया वचनं श्रुत्वा गोविन्दः पुनरुक्तवान्, “अस्तु तदर्थमहं योग्यप्रयत्नं तु करिष्याम्येव । तथापि यावद् भवत्याः पुत्रीविषयका भावना परिवर्तिता नैव भविष्यति, तावदेतस्याः समस्यायाः समाधानस्योपायं न किञ्चिदप्यहं जानामि । यथा पुत्री श्वश्रूश्वशुराभ्यां सहैव निवसेत्, तथा उपदिशतु भवती” इति ।

“पुत्रस्य विचारपरिवर्तनाय पुत्र्या विचारपरिवर्तनस्य प्रस्तावः सर्वथाऽनुचित एव । अहं मम पुत्रं दिनद्वयमत्र प्रेषयिष्यामि । दिनद्वयं भवतः समीपमागमिष्यति चेन्मम पुत्रस्य विचारे परिवर्तनमागमिष्यति न वा ? द्वितीये दिवसे तु सर्वेषां विचारः परिवर्तितो जायत एव । मम पुत्रस्याप्यवश्यमेव परिवर्तितं भविष्यति । अहं कथञ्चिदपि भवतः पार्श्वे मम पुत्रं प्रेषययिष्यामि” इत्येवमुक्त्वा सीता तूष्णीं बभूव ।

“यद्यप्यहं प्रयत्नं करिष्याम्येव, तथापि तस्य बुद्ध्यनुगुणमेव सर्वं भविष्यति । भवती गत्वा स्वपुत्रं प्रेषयतु ।” गोविन्द एतावदुक्त्वा सीतां ततो गृहं प्रेषयामास ।

गृहे आगतां स्वपत्नीं दृष्ट्वा पुरन्दर उपहसन्निव उक्तवान्, “तस्मिन् पितृभक्तिः कदापि नैव दृष्टा, तथापि एतावत्कालपर्यन्तं भवत्याः खेदो नासीत् । मत्तः स एव बुद्धिमान् इति भवत्याश्चिन्तनं दृढमासीत् । किन्तु आवां विहाय गृहाद् दूरतः पुत्रो गमिष्यति इति चिन्तया त्वं व्याकुलासि, इति मे प्रतिभाति । अहो ! स्वार्थपरवशोऽयं लोकः !”

“किं ममोपहासेन ? पुत्रो यथा गृहे एव निवसेत्, तथा कर्तुं मया प्रयत्नो विहितः । किमेतत् प्रकृतचिन्तनम् ? भवता तत्कृते किं वा विहितम् ? अहमेव मम गोविन्दं स्मृत्वा तत्समीपं गत्वा पुत्रस्य विचारपरिवर्तनायानुरोधं कृतवती । किमत्र मम स्वार्थपरवशत्वमेवावलोक्यते ? समस्या आवयोरुभयोरपि समाना । अलं चर्चया । इतः किं करणीयमिति चिन्तनीयं तावत् ।” सीता गभीरेण वचसा उक्तवती ।

ततस्तौ दम्पती परस्परं समालोचितवन्तौ । अन्त्ये च स्वपुत्रं सुन्दरमाहूय प्रीत्या उक्तवन्तौ, “एतावत्कालपर्यन्तं त्वया यदुक्तं तदेवास्माभिर्विहितम् । तव प्रस्तावनायास्तिरस्कारो न कदापि विहितः । विवाहस्य विषयेऽपि त्वदीयो यो विचारस्तथैव कार्यं करोतु, किन्तु आवयोरेकं वचनं पालनीयं त्वया । त्वं स्वमातुलस्य गोविन्दस्य गृहं गत्वा तेन सह विवाहस्य आशीर्वादमादाय आगच्छ । ततः सर्वं सम्यग् भविष्यति” इति ।

सुन्दरोऽपि पित्रोराज्ञां शिरसि निधाय मातुलस्य गोविन्दस्य गृहं गतवान् । गोविन्दः सुन्दरस्य मुखात् सर्वं वृत्तान्तं श्रुतवान् । अन्त्ये च तं स्मारयन् उवाच, “भवतो माता सत्सम्प्रदायादिकं न जानाति । पुत्र्या दुर्बोधनं विहितवत्यस्ति । तादृशी सा कदापि स्वस्नुषां प्रति सम्यग् व्यवहारं नैव करिष्यति । पृथग् गृहं करणीयमिति भवतो यो विचारः सः सर्वथा समुचित एव । भवतः पिता कीदृश इति तु ग्रामीणाः सर्वे जानन्ति एव । तादृशस्य मूढस्यापि पितुरेतावान् साधुः पुत्र इति सन्तोषप्रदोऽयं विषयः । भवादृशस्य सुयोग्यस्य पुत्रस्य सेवां प्राप्तुं भवतः पितरौ अयोग्यावेव । अतो यथाशीघ्रं विवाहं कृत्वा गृहं विहाय स्वपत्न्या सह सुखपूर्वकं तिष्ठतु ।” एवं स सुन्दरस्य मातरं सीतां, पितरं च पुरन्दरं कठोरवचनैर्बहुधा निन्दितवान् ।

सुन्दरो पित्रोर्निन्दां श्रुत्वाऽसह्येन क्रोधेन रक्तनयन उवाच, "किमर्थमेतत् सर्वं भवान् मां निगदति ? न तयोर्निन्दां श्रोतुं मम पितरौ भवतः पार्श्वे मां प्रेषितवन्तौ, अपि तु भवत आशीर्वादं ग्रहीतुमेव । भवानेव विपरीतवादी वर्तते" इति ।

स्मितमुखेन गोविन्दः पुनरुवाच, "भवतः पिता शुभाशुभसमयमपि न परिचिनोति किमु ? अधुना खलु समयः शुभो नास्ति । श्वः प्रातः सुमुहूर्तोऽस्ति । तदा एव आगच्छतु । अशुभकाले प्रदत्त आशीर्वादः फलदायी न भविष्यति" इति ।

सुन्दरो गोविन्दे कुपितः सन् गृहं प्रत्यागतवान् । यत्तत्र प्रवृत्तं तत्सर्वं पितरौ निवेद्य उक्तवान्, "मयि आत्मविश्वासो वर्तते । अतो मम बुद्ध्यनुसारमेव सर्वं करोमि । किन्तु मम पित्रोर्विरोधं सोढुं कदापि न शक्ष्यामि । मम मनसि पित्रोर्महती श्रद्धा वर्तते । यो मम पित्रोः परुषवचनैर्निन्दां करोति, तस्याशीर्वादमहं नेच्छामि । पुनस्तस्य गृहं गन्तुमनुरोधो भवद्भ्यां न करणीयः । अहं तस्य मुखमेव द्रष्टुं नेच्छामि, भवन्तौ च तेन सह वार्तालापं न कुरुतम्" इति लोचने रक्ते कारयन् कोपेन उक्तवान् ।

पुत्रस्य एतादृशीमवस्थां दृष्ट्वा पुरन्दरोऽतीव हृष्टो बभूव । पुत्रे प्रभूता पितृभक्तिरस्तीति तथ्यं तेनाद्य सम्यग् ज्ञातम् । "आत्मविश्वासस्य कारणेन सोऽन्येषां वचनं नैव पालयति । स्वयमेव निर्णीय कार्यं करोति । एतत्तु समीचीनमेव । तेन मम वचनस्य तिरस्कारो न विहितः, अपि तु स्वस्यात्मविश्वासानुगुणं सर्वं विहितम् । अहं पितास्मीति सर्वं मम पालनीयं न भवति । अत एव वृद्धा वदन्ति, "बालादपि सुभाषितं ग्राह्यम्" इति । मम पुत्रस्य पितृभक्तिस्तु श्लाघनीया एव" इति विचार्य हर्षाश्रुपरिपूरितलोचनः पुरन्दरः स्वपुत्रमालिङ्गितवान् । तद् दृष्ट्वा सीताया अपि लोचने हर्षाश्रुभिः पूरिते अभवताम् ।

सीतापि गोविन्दस्य सर्वं वाक्यं स्मृतवती । तस्यैव कारणेन पितापुत्रयोर्मेलनं बभूवेति विदित्वा सा कृतज्ञाऽभवत् । ततस्तौ दम्पती दुरभिमानं परित्यज्य सद्व्यवहारे मनः कृतवन्तौ । तयोर्बोधनेन तयोः पुत्र्यपि श्वशुराभ्यां सहैव स्थातुमारभत । तेन पुत्र्याः परिवारेऽपि शान्तिरुत्पन्नाऽभवत् । सुन्दरो माधवस्य पुत्र्या उमया सह विवाहं कृतवान् । स्वपितृभ्यां पत्न्या च सह स सुखपूर्वकं गृहस्थं सञ्चालयितुमारब्धवान् ।

## अभ्यासः

### श्रवणं भाषणं च

१. **पाठस्य कथायाः सर्वाननुच्छेदान् एकैकश उच्चारयत ।**

२. **अधस्तनानां पदानां शुद्धोच्चारणं कुरुत**

वचनान्युपेक्ष्य, अनुक्तग्राही, ग्रामसमीपस्थायाम्, न्यूनमूल्येन, परिश्रमानुगुणा, अनृतभाषणवञ्चनादिकम्, व्रीहिगोधूमादीनाम्, प्रभावितासीत्, श्वश्रूश्वशुरौ, बुद्ध्यनुगुणम्, स्वार्थपरवशत्वम्, श्लाघनीया

३. **शिक्षकात् पाठस्य तृतीयस्यानुच्छेदस्य वाचनं शृणुत । तथैव वाचनस्याभ्यासं च कुरुत ।**

४. **पाठस्य चतुर्थमनुच्छेदं सन्धिविच्छेदपूर्वकमुच्चारयत । तत्र वर्तमानानि सन्धियुतानि, समस्तानि च पदानि अधस्तन्यां सारिण्यां पूरयत**

| सन्धियुतानि पदानि | समस्तानि पदानि |
|---|---|
| ......................... | ......................... |
| ......................... | ......................... |

५. **पितापुत्रयोर्विषये श्रुतां काञ्चन कथां कक्षायां श्रावयत ।**

६. **प्रातिपदिकानां लिङ्ग-शब्द-विभक्ति-वचनानि, क्रियापदानां च धातु-लकार-पुरुष-वचनानि निर्दिशत**

| प्रातिपदिकानि | क्रियापदानि |
|---|---|
| अनुक्तग्राही | आसीत् |
| परीक्षणाय | कुर्वन्ति |
| मृतवती | कामयते |
| उपायान् | शक्यते |
| वाणिज्यवृद्धये | जानामि |
| कृषिकर्मणा | ग्रहीष्यामि |
| मातापितरौ | क्रीणीहि |
| वचसा | निवसेत् |

७. **पित्रोः सम्मानविषये श्रुतं कञ्चन पद्यं कक्षायां श्रावयित्वा तस्यार्थं च वदत ।**

८. **'पितृदेवो भव' इत्यस्मिन् विषये कक्षायां एकैकशो व्याख्यानं प्रवचनं वा कुरुत ।**

९. **सम्मान्यानामुपदेशानां सर्वथा स्वीकरणम् उचितमनुचितं वा ? इत्यस्मिन् विषये सामूहिकविमर्शनं कुरुत ।**

१०. **अधस्तनपद्यानां भावार्थं निगदत**

जनिता चोपनेता च यश्च विद्यां प्रयच्छति ।
अन्नदाता भयत्राता पञ्चैते पितरः स्मृताः ॥
सर्वतीर्थमयी माता सर्वदेवमयः पिता ।
मातरं पितरं तस्मात् सर्वयत्नेन पूजयेत् ॥
भूमेर्गरीयसी माता स्वर्गादुच्चतरः पिता ।

११. **श्रीरामस्य, श्रवणकुमारस्य वा पितृभक्तेर्विषये शिक्षकाणामन्तर्जालकस्य वा साहाय्येनानुसन्धानं विधाय कक्षायां वदत ।**

१२. **पितरं प्रति सुन्दरस्य व्यवहार उचितोऽनुचितो वा ? स्वस्य तर्कमुपस्थापयत ।**

१३. **अधस्तनं गद्यं शीघ्रमुच्चारयत**

पिता न केवलमस्माकं जनक एव, अपि तु प्रेरणास्रोतो वर्तते । यः सन्ततीनां सुखाय कल्याणाय चाहोरात्रं प्रयतते, स पितैव । स्वस्य प्राणान् तिरस्कृत्यापि सः सन्ततीनां हिताय कर्माणि कुरुते । पिताऽस्माकं छदिर्वर्तते यस्याश्रयं विनाऽस्माकं जीवनं दुःखपूर्णं भवति । सन्ततीनां पालनस्य पोषणस्य च पर्यायभूतः पिता शिशूनां कृते उल्लासो वर्तते, किशोराणां च कृते पिता सर्वोत्तमप्रेरकः पथप्रदर्शकश्च, वयस्कानां प्रौढानां वा कृते पिताऽऽशीर्वादभूतः । पितुर्दर्शनेन सन्ततयो न केवलमदृष्टसङ्कटैरेव मुच्यन्ते, अपि तु रक्षिता अपि भवन्ति । सौभाग्याशालिनस्ते ये पितुः स्नेहासारपानं कर्तुमवसरं लेभिरे । धन्यं च तस्य जीवनं यः पितुराज्ञां पालयति, तस्य सेवां च कुरुते । पितुराशीर्वादं विना जीवनं ऊषरतुल्यं भवति । ऊषरभूमौ पिता वटवृक्ष इव शीतलतां प्रददाति ।

साम्प्रतिके समाजे मातापितरौ विहाय जनाः पृथगेव स्थातुं वाञ्छन्ति । एकलपरिवारस्यावधारणा जगति व्याप्ता वर्तते । अस्माकं प्राचीनपरम्परायां पिता अस्माकं गृहस्य रक्षको भवति स्म । किन्त्वधुना स्नेहसागराः पितरो वृद्धाश्रमेषु साश्रुलोचना लभ्यन्ते । साम्प्रतिका जनाः पितरं मार्गदर्शकं न मन्वते । तेषामुपदेशान् श्रुत्वा तमेव पश्चगामिनं वदन्ति । कठोरवचनैः पितरं तिरस्कृत्य तस्योपहासं च कुर्वन्ति । सेवानिवृत्तस्य पितुः सम्पत्तौ च सन्ततयः स्वांशस्याधिकारमिच्छन्ति, किन्तु पितुः कृते मनसि या श्रद्धा, आस्था चापेक्षिता भवति साऽधना नैव लभ्यते ।

वयं च सर्वे आधुनिका एव पुत्राः स्मः । पितरौ विहाय दूरगमनस्य अस्माकमपि इच्छा भवेत् । किन्तु यः शैशवेऽस्माकं हस्तमादाय स्वपद्भ्यां चलितु शिक्षितवान्, तस्यैव पितुस्तिरस्करणं त्यागो वा समुचित किम् ? इति सर्वदा विचारणीयम् । समयचक्रेण वयमपि पितरो भविष्याम एव । तदाऽस्माकं सन्ततयो यादृशं व्यवहारं कुर्युरित्यस्माकमपेक्षा तादृश एव व्यवहार पितुः समक्षमस्माभिर्विधेयः ।

## पठनम्

१. **लेख्यचिह्नानि विचार्य सन्धिं च विच्छिद्य पाठस्याष्टममनुच्छेदमुच्चैर्गिरा पठत ।**

२. **पाठस्य पञ्चमं षष्ठं चानुच्छेदं पठित्वा क्रियापदानि चिनुत ।**

३. **पाठस्य मौनपठनं विधाय अज्ञातार्थानि पदानि रेखाङ्कितानि कुरुत । कोशस्य साहाय्येन तेषामर्थानामन्वेषणं च विधत्त ।**

४. **पाठं सम्पठ्य प्रथमा-द्वितीया-तृतीया-चतुर्थी-पञ्चमी-षष्ठी-सप्तमीविभक्त्यन्तानि त्रीणि त्रीणि पदानि वदत ।**

५. **पाठस्य कथाया मौनपठनं विधाय समस्तानि दश पदानि सङ्कलय्य तेषां विग्रहवाक्यानि लिखत**

| समस्तपदानि | विग्रहवाक्यानि |
|---|---|
| स्वाभिप्रायानुसारम् | स्वस्य अभिप्रायः स्वाभिप्रायः, तस्यानुसारम् |
| ........................ | ........................ |

६. **पाठस्य तृतीयं चतुर्थञ्चानुच्छेदं पठित्वा उदाहरणानुसारं स्वीकृत्यस्वीकृत्योः सूचनाय 'आम्', 'नहि', इति पदे विन्यस्य वाक्यात्मकमुत्तरं वदत**

उदाहरणम् - प्रश्नः - किं सुन्दरोऽन्येषामुपदेशं सर्वथा विश्वसिति स्म ?

उत्तरम् - नहि, सुन्दरोऽन्येषामुपदेशं झटिति नैव विश्वसिति स्म ।

**प्रश्नाः**

(क) किं सुन्दरं स्वयं परीक्षैव निश्चयं करोति स्म ?

(ख) किं सुन्दरस्य हस्ते दाहचिह्नं अधुनापर्यन्तमासीत् ?

(ग) किं सुन्दरो बाल्ये एव ग्रामसमीपस्थायां पुष्करिण्यां निपतितः ?

(घ) सुन्दरस्यैतादृशेन स्वभावेन पुरन्दरश्चिन्तित आसीन्न वा ?

(ङ) 'केचन चौरा विधवाया गौर्या हत्यां चक्रुः' सत्यमेतत् ?

(च) किं सर्वे ग्रामीणा गौर्या विशालं गृहं क्रेतुमग्रेसरा आसन् ?

(छ) सुन्दरो रात्रिद्वयमेव तत्र स्थितवान् किमु ?

(ज) पुरन्दरो गौर्या विशालं गृहं क्रीतवान्, न वा क्रीतवान् ?

७. **पाठस्य पञ्चदशं षोडशं चानुच्छेदं पठित्वा अधस्तनान् प्रश्नान् उत्तरयत**

(क) सुन्दरः कदा माधवस्य प्रास्ताविकं पित्रोः समक्षम् उक्तवान् ?

(ख) पुरन्दरस्य सीतायाश्च हृदयं केन कारणेन खिद्यति स्म ?

(ग) सीता प्रतिदिनं कस्मिन् विषये चिन्तनं कर्तुमारभत ?

(घ) गोविन्दस्य विषये कीदृशी जनश्रुतिः प्रसिद्धाऽसीत् ?

(ङ) गोविन्दस्य गृहे कियद्दिनपर्यन्तं गत्वा मनसः परिवर्तनं भवति स्म ?

(च) सीतायाः पुत्री केन सह निवसति ?

(छ) गोविन्दस्य वचनानुसारं सीताया एतादृश्यवस्था केन कारणेनापतितो वर्तते ?

(ज) सुन्दरस्य हृदये किं नास्ति ?

(झ) अस्माभिः किं भोक्तव्यम् ?

८. **आत्मविश्वासस्य विषये अधस्तनमालेखं पठित्वा तदनुवर्तिप्रश्नान् उत्तरयत**

# आत्मविश्वासः

जीवनं सुखदुःखयोः समुच्चयरूपं विद्यते। तथापि जीवने सुखानामपेक्षया दुःखान्येव बहुधाऽऽपतन्ति मानवानाम्। यद्यपि जनाः सुखलिप्सयैवानेकानि कर्माणि कुर्वन्ति, तथापि दुःखेनैव भृशं पीडिता भवन्ति। अत एव जनैर्जीवनं सङ्घर्षमयमस्तीत्युच्यते। सङ्घर्षेण विना जीवने आनन्दो नैव लभ्यते। यथा खनित्रेण खनन् जनो भूमौ निहितं जलं लभते तथैव सङ्घर्षद्वारा मनुष्यो हृदयेऽन्तर्भूतां सन्तुष्टिं लभते। सङ्घर्षस्तावत् प्रथममस्माकं हृदये सुषुप्तमात्मविश्वासं द्रढयति। आत्मविश्वासं जनयितुं सङ्घर्षशील एव मनुष्यः सफलो भवति। यस्य पार्श्वे आत्मबलं वर्तते स जीवनयात्रायामापतितान्यनेकानि व्यवधानानि सारल्येन दूरीकरोति। किन्तु य आत्मना दुर्बलो वर्तते स मेघमध्ये आपतितः काक इव सन्दिग्धो भवति, यस्य पार्श्वे उड्डयनस्य इच्छा तु प्रबला वर्तते किन्तु कथं कुत्र वा गन्तव्यमिति दिग्भ्रमस्तस्य जायते।

कठिनायामपि परिस्थितौ आत्मनि विश्वस्तो जनः सुखपूर्वकं जीवति। अस्माकं समाजे बहवस्तादृशा जना दृश्यन्ते येषां पार्श्वे कार्यकौशलं वर्तते, दक्षता चास्ति किन्तु साफल्यं तेषां न दृश्यते। एतादृशा जना बहिः सुदृढास्तु दृश्यन्ते किन्तु कठिनायां परिस्थितौ ते क्षीणबला भवन्ति। उत्साहसम्पन्न एव जनो विषमायामपि परिस्थितौ दुःखसागरात् पारं गन्तुं सफलो भवति। भवान् यदि स्वस्य सामर्थ्यमपि जानाति, आत्मनि विश्वस्तः सन् लक्ष्यप्राप्तयेऽग्रे गन्तुमपि वाञ्छति किन्तु दुःखेषु आपतितेषु अग्रे गन्तुं न पारयते चेद् आत्मविश्वासस्य विकासो भवतः कृते नितरामावश्यकः।

तर्हि कथमात्मविश्वासो विकसितो भवति ? इति प्रश्नो भवतश्चेतसि समुद्भूतो भवेत्। प्रथमं तावत् संशयस्य सङ्कोचस्य वा परित्यागो विधेयः। भवान् स्वकार्ये कुशलो वर्तते, समये कार्यं च कुरुते, तथाप्यन्यैः सह सञ्चारं विधातुं, स्वस्य विचाराणां सम्प्रेषणं वा समूहे विधातुमसमर्थो वर्तते चेद् भवति आत्मविश्वासो नैव वर्तते। एतादृशो जनः कर्मणि सफलो नैव भवति। जनः समाजे तिष्ठति। साफल्यार्थं यावत् कार्यकौशलमावश्यकम्, तावदेव तस्य समूहे अभिव्यक्तिरावश्यकी। यावद् भवान् स्वस्य विचारं समेषां समक्षं न वदति, स्वकार्यं च नैव प्रस्तौति, तावद् भवान् कार्यस्य मूल्यं नैव लभते। दक्षता यावती आवश्यकी तावती एव प्रस्तुतिरपि अपरिहार्या एव। योऽन्येषां साहाय्यं नैव विदधाति, स्वयञ्चान्येषां साहाय्यं नैव गृह्णाति स जीवने सफलो नैव जायते। जनास्तादृशं जनं निन्दन्ति, तस्य सङ्गतिं च नैव कर्तुं वाञ्छन्ति।

आत्मनः पक्षपोषणञ्च आत्मविश्वासस्य विकासाय आवश्यकं तत्त्वमस्ति। सहकर्मिणो बान्धवा वा कार्यं कर्तुं निर्दिशन्ति, भवांश्च तेषां निर्देशनं सर्वदा यथायथं पालयति चेद् भवान् सर्वदा सन्तुष्टो नैव भविष्यति। अन्येषां साहाय्यमुचितमेवास्ति किन्तु अन्येषां साहाय्यार्थमात्मनो हानिर्नैव समुचिता। यावद् भवान् अन्येषामनुचितं प्रस्तावमस्वीकर्तुं नैव समर्थस्तावद् भवति आत्मविश्वास विकसितो नैव जायते।

निर्भयत्वमपि आत्मविश्वासस्य विकासायावश्यको भवति। भवान् कर्मणि कुशलो वर्तते किन्तु एकाकी

कार्यं कर्तुं बिभेति चेद् आत्मविश्वस्तो नास्ति । प्रत्येकं विषये भवान् अन्यस्य परामर्शमिच्छति तर्हि भवानात्मनि विश्वस्तो नास्ति । एतादृशं मनुष्यं जनाः सहसा नैव विश्वसन्ति ।

अतः स्वस्य दक्षतायाः, कौशलस्य च प्रामाण्यार्थं सङ्कोचस्य त्यागः, आत्मनः पक्षपोषणम्, निर्भयत्वञ्चेत्यादयो गुणा अतीव आवश्यका वर्तन्ते ।

## प्रश्नाः

**(अ) अधस्तनानि भाषिककार्याणि कुरुत**

(क) आलेखतः कर्मवाच्यस्य कर्तृवाच्यस्य च एकमेकं वाक्यं विचित्य लिखत ।

(ख) 'सङ्घर्षस्तावत् प्रथममस्माकं हृदये सुषुप्तमात्मविश्वासं द्रढयति' अत्र विशेषणपदं किम् ? किञ्च तस्य विशेष्यभूतं पदम् ?

(ग) 'सङ्घर्षमयमस्तीत्युच्यते' अत्र कति पदानि सन्ति ? सन्धिं विच्छिद्य दर्शयत । तानि च पदानि सुबन्तानि, तिङन्तानि अव्ययानि वेति पृथक्कृत्य दर्शयत ।

(घ) 'कौशलम्, विधेयः, यावत्' इति पदानां प्रकृतिप्रत्ययौ विभज्य दर्शयत ।

(ङ) 'विना, एव, इव, अतः, सह' एतेषाम् अव्ययपदानां प्रयोगं विधाय वाक्यानि रचयत ।

(च) 'उत्साहसम्पन्न एव जनो विषमायामपि परिस्थितौ दुःखसागरात् पारं गन्तुं सफलो भवति' इत्यस्मिन् वाक्ये कर्तृवाचकं पदं किम् ? 'दुःखसागरात्' इत्यस्य च पदस्य कारकं किम् ?

**(आ) एकवाक्येन उत्तरयत**

(क) जनाः किमर्थं कर्माणि कुर्वन्ति ?

(ख) आनन्दस्य लाभाय किं कर्तव्यम् ?

(ग) हृदयेऽन्तर्भूतां सन्तुष्टिं मानवः कथं लभते ?

(घ) कः काक इव सन्दिग्धो भवति ?

(ङ) समाजे कीदृशा जना बहुधा दृश्यन्ते ?

(च) दुःखसागरात् पारं गन्तुं सफलः को भवति ?

(छ) दक्षतया सह किमपरिहार्यम् ?

(ज) यो बन्धूनां प्रस्तावमनुसरन् यथायथं कर्माणि कुरुते स सन्तुष्टो भवति न वा ?

(झ) क एकाकी कार्यं कर्तुं बिभेति ?

(ञ) कीदृशं जनं मानवा नैव विश्वसन्ति ?

(ट) दक्षतायाः कौशलस्य च प्रामाण्यार्थं किं किमावश्यकम् ?

(इ) **सङ्क्षेपेणोत्तरयत**

(क) जीवन-सङ्घर्षयोः सम्बन्धं दर्शयत ।

(ख) आत्मविश्वाससहितो जनः कीदृशो भवति ?

(ग) आत्मविश्वासस्य करणीयानि कार्याणि वर्णयत ।

(घ) आत्मविश्वासस्य महत्त्वं पञ्चभिर्वाक्यैः प्रकटयत ।

(ङ) आत्मनः पक्षपोषणं किमर्थमत्यावश्यकम् ? दर्शयत ।

(ई) **आत्मविश्वासस्य विकासायास्माभिः किं किं विधातुं शक्यते ? तस्य विषये कक्षायां विमृश्य निष्कर्षं लिखत ।**

९. **अधस्तनं गद्यं पठित्वा प्रश्नानुत्तरयत**

'हेलेन केलर' अमेरिकादेशस्य राजनीतिज्ञा, प्राध्यापिका च वर्तते । तस्या जन्म १८८० तमस्य ईशाब्दस्य जूनमासस्य २७ तमे दिनेऽभवत् । सार्धैकवर्षे वयसि सा चक्षुर्भ्यां द्रष्टुं कर्णाभ्यां च श्रोतुमसमर्थाऽभवत् । सा शब्दस्योच्चारणेऽप्यसमर्थाऽसीत् । टुस्कुम्बिया अल्बामा इति क्षेत्रं तस्या जन्मस्थानमासीत् । तस्मिन् स्थाने अधुना सङ्ग्रहालयो वर्तते । जना अधुनापि जूनमासस्य २७ तमे दिने हेलेनकेलरदिवसरूपेण तस्याः सम्मानं कुर्वन्ति । शरीरेण सा किमपि कर्तुमसमर्थाऽऽसीत्, तथापि तस्यामात्मविश्वासोऽतीवासीत् । बुद्धिश्च तीक्ष्णाऽऽसीत् । तस्याः पिता धनिक आसीद्, अतः स तस्या उपचारार्थं यत्नं चकार । उपचारस्य सन्दर्भे पिता तां एलेक्जान्डर ग्राहमबेल इति नाम्ना प्रसिद्धस्य चिकित्सकस्य पार्श्वं निनाय । चिकित्सकोऽपि तस्यास्बुद्धेस्तीक्ष्णत्वं विज्ञाय तां पाठयितुं सुलिवननाम्नीं शिक्षिकामनुरुरोध । बधिरा अपि वार्तां कर्तुं शक्नुवन्ति, तेऽपि साङ्गानामिव कर्माणि कर्तुं शक्नुवन्तीति स्वस्य प्रतिभया प्रमाणितवती हेलेन अस्माकमात्मविश्वासस्य प्रेरणायाश्च स्रोतोरूपा वर्तते । द्रष्टुं श्रोतुं वक्तुञ्चासमर्था सा स्नातकपर्यन्तमध्ययनं कृत्वा प्राध्यापिकारूपेणापि स्वस्य प्रतिभां प्रमाणितवती । साहित्ये, समाजसेवायां च तस्या नामाधुनापि सादरं गृह्यते ।

(क) गद्यमधीत्य पञ्च सूत्रवाक्यानि लिखत ।

(ख) गद्यस्य तृतीयांशे सारांशं लिखत ।

(ग) किमर्थं हेलेन अस्माकं प्रेरणास्रोतोरूपास्तीति वर्णनं कुरुत ।

(घ) अनुच्छेदात् पञ्च प्रश्नान् निर्मात ।

## लेखनम्

१. **अधस्तनानां पदानामर्थान् विलिख्य वाक्येषु तेषां प्रयोगं कुरुत**

| | | | |
|---|---|---|---|
| (क) समीपस्थः | (ख) सम्पादयति | (ग) अनुक्तग्राही | (घ) सुखसूत्रम् |
| (ङ) उपेक्ष्य | (च) अदृष्टवशात् | (छ) तदनन्तरम् | (ज) व्यदधात् |
| (झ) लाभान्वितः | (ञ) वैभवपूर्णः | (ट) वाणिज्यवृद्धये | (ठ) पुत्रस्नेहविमूढा |
| (ड) अंशभाग् | (ढ) धनलुब्धः | (ण) निर्मातव्या | (त) क्रीणीहि |
| (थ) उद्वाहः | (द) प्रस्तावः | (ध) जनश्रुतिः | (न) श्वश्रूश्वशुरौ |
| (प) बुद्ध्यनुगुणम् | (फ) सर्वथा | (ब) सन्तोषप्रदः | (भ) कठोरवचनैः |
| (म) विपरीतवादी | (य) हर्षाश्रुपरिपूरितलोचनः | | (र) दुरभिमानः |

२. **सन्धिं विच्छिद्य सन्धिनाम लिखत**

| शब्दः | सन्धिविच्छेदः | सन्धिनाम |
|---|---|---|
| कस्मिंश्चन | | |
| सोऽनुक्तग्राही | | |
| पुत्रस्यैतादृशेन | | |
| गृहस्याभ्यन्तरे | | |
| ममाप्यनुभवोऽस्ति | | |
| विहायान्यद् | | |
| तर्ह्येव | | |
| यावज्जीवं | | |
| तावन्ममैवेच्छानुसारं | | |
| विहायान्यस्मिन्नेव | | |

३. **अतिसङ्क्षेपेण पाठानुकूलमुत्तरं लिखत**

(क) पाठस्य पात्रयोः पितापुत्रयोर्नाम किम् ?

(ख) ग्रामीणाः पुरन्दरस्य पृष्ठतः कीदृशीं वार्तां कुर्वन्ति स्म ?

(ग) सुन्दरो बाल्यकाले किं कृतवानासीत् ?

(घ) ग्रामीणा गौर्या गृहं क्रेतुं किमर्थं भीता अभवन् ?

(ङ) पुरन्दरः पुत्रः किं करोतु इति कामयते स्म ?

(च) कया वृत्त्या वर्षाभ्यन्तरे एव प्रभूतं धनं सम्पादयितुं शक्यते ?

(छ) वाणिज्ये कीदृशा गुणा अपेक्षिता भवन्ति ?

(ज) कदा सुन्दरस्य अनृतभाषणं कर्तव्यमापतितम् ?

(झ) कीदृशस्य धनस्य स्थिरता न भवति ?

(ञ) अधिकलाभाय कीदृशानामन्नानां वाटिका निर्मातव्या ?

(ट) सुन्दरः किमर्थं रक्तनयनो बभूव ?

(ठ) कीदृशस्य जनस्याशीर्वादं सुन्दरो नेच्छति ?

४. **सङ्क्षेपेणोत्तराणि लिखत**

(क) पुरन्दरस्य खेदकारणं किम् ?

(ख) सुन्दरोऽनुक्तग्राही अस्तीत्यत्र किं प्रमाणम् ?

(ग) कृषिकर्मणो विषये पितापुत्रयोर्मते पार्थक्यं किम् ?

(घ) वाणिज्यवर्धनाय उपदिशन्तं पितरं सुन्दरः किं कथयामास ?

(ङ) उमया सह सुन्दरस्य विवाहार्थं का समस्याऽऽसीत् ?

(च) उपहसन्तं पुरन्दरं प्रति तस्य पत्नी सीता किमुक्तवती ?

(छ) आशीर्वादमादातुं गतं सुन्दरं गोविन्दः किमुक्तवान् ?

(ज) गृहं प्रत्यावृत्तः सुन्दरः पितरौ किमुक्तवान् ?

(झ) पुरन्दरस्य सीतायाश्च लोचने कदा हर्षाश्रुभिः पूरिते अभवताम् ?

(ञ) सुन्दरस्य मनसि प्रभूता पितृभक्तिरस्तीति कथं ज्ञायते ?

५. **कथाया आधारेण सुन्दरस्य पुरन्दरस्य च चरितं वर्णयत ।**

६. **सुन्दरपुरन्दरयोः क उत्तमः ? स्वस्य मतं सकारणं लिखत ।**

७. **चतुर्थस्यानुच्छेदस्यानुलेखनं विदधत ।**

८. **पितापुत्रयोर्विवादस्य मूलं कारणं किम् ? विमृश्य निष्कर्षं लिखत ।**

९. **अन्तर्जालकस्य सन्दर्भग्रन्थादीनाञ्चाध्ययनेन पितुर्महत्त्वविषये पद्यानि सङ्कलय्य लिखत ।**

१०. **सम्मान्यानामग्रे श्रद्धा प्रदर्शनीया, उत मनसि श्रद्धा वर्तते चेत्तस्या अभिव्यक्तिर्नैवावश्यकी ? स्वमतं लिखत ।**

११. **अधस्तनयोर्विवेचनात्मकम् उत्तरं लिखत**

(क) 'पितृभक्तिः' इति कथायां पुरातनानां नवीनानां च जनानां विचारस्य वैविध्यं कथं प्रस्तुतं वर्तते ? विविच्य लिखत ।

(ख) 'व्यवहारेऽदृष्टापि भक्तिर्मनसि भवितुं शक्नोति' इति कथाया आधारेण प्रमाणयत ।

१२. **अधस्तनसूत्राण्याधृत्य कथामेकां विरच्य शीर्षकं लिखत**

- एकम् घनम् वनम्
- तत्र गृध्राणां समूहस्य निवासः
- सहैवोड्डयनम्, सहैवाहाराणामन्वेषणम्
- एकवारमन्यस्मिन् देशे गमनम्
- तत्र बहूनां मत्स्यानां, मण्डूकानां च निवासस्तेनाहारस्य सौविध्यम्
- गृध्राणां सुखपूर्वकं निवासः, आहारस्य सौविध्येन आलस्यस्य वृद्धिश्च
- तेषां समूहे एको वृद्धगृध्रः, गृध्राणामालस्येन तस्य चिन्ता
- आहाराणामन्वेषणायान्यत्र गमनाय, उड्डयनस्याभ्यासाय च तस्यानुरोधः
- गृध्रैस्तस्योपहासः, तस्य मनसि खेदश्च
- अन्यान् गृध्रान् तत्रैव विहाय तस्यान्यत्र गमनम्
- बहुकालादनन्तरं पुनर्बन्धूनां दर्शनाय तेषां समीपे प्रत्यावर्तनम्
- तत्र स्वबन्धूनां गृध्राणां मृतदेहानामवलोकनम्
- एकस्य गृध्रस्य प्राणा अवशिष्टाः
- तस्य माध्यमेन वृत्तान्तस्य बोधः
- तत्र तरक्षूणामातङ्कद्वारा गृध्राणां मृत्युः
- अभ्यासाभावाद्, तेषां शक्तिक्षयः, उड्डयनाय तेषामसमर्थता
- स्वस्य रक्षणार्थमाक्रमणाय च नखेषु शक्तेरभावः
- तच्छ्रुत्वा वृद्धगृध्रस्य खेदः
- स्वस्य कौशलमभ्यासेन सर्वदा रक्षणीयमिति सन्देशः ।

१३. **अधस्तनं गद्यं पठित्वा तदनुवर्तिप्रश्नान् उत्तरयत**

**कथामहिमा**

दुर्बोध्योऽपि विषयः कथामाध्यमेन सारल्येन बोधयितुं शक्यते । अतो बालानां बोधाय कथानामुपयोगो बहु भवति । सदाचारशिक्षणाय, मनोरञ्जनाय, उत्सासंवर्धनाय च कथाया उपयोग आधिक्येन जायते । तथैव धार्मिकप्रयोजनायापि कथाः कथ्यन्ते । वेदस्य ब्राह्मणग्रन्थेषु, उपनिषत्सु चानेका आख्यायिका लभ्यन्ते, यासां माध्यमेन दार्शनिका आध्यात्मिकाश्च जटिलतरा विषया बोधिताः सन्ति । पुराणानि तु कथापुञ्जभूतान्येव सन्ति । सर्वेष्वपि पुराणेषु कथाया बाहुल्यमस्ति, येषां माध्यमेन सच्चरित्रस्य, धर्मस्य च शिक्षणं विहितं विद्यते । अस्माकं समाजे

रामायणस्य, महाभारतस्य, पुराणानां च कथाः प्रसिद्धाः सन्ति। ऐतिहासिकः, पौराणिकः, सामाजिकः, मनोवैज्ञानिकः, नैतिकश्चेत्यादयो बहुविधा विषयाः कथासु प्रयुक्ता भवन्ति। तदनुसारेण ऐतिहासिकी, पौराणिकी, सामाजिकी, मनोवैज्ञानिकी, नैतिकी चेत्यादयः कथा भवन्ति। ऐतिहासिकीषु कथासु विशेषत इतिहासे प्रसिद्धानां पात्राणां, वीराणां वीराङ्गनानाञ्च प्रेरणादायिन्यो घटना वर्ण्यन्ते। तेषां माध्यमेन चास्माकं मनस्युत्साहो वर्धते, प्रेरणा च जागर्ति। सामाजिकविषयमवलम्ब्य रचितासु कथासु चास्माकमेव समाजे दृष्टानां घटनानां सुन्दरं वर्णनं भवति, यस्य माध्यमेन जना मनोरञ्जनं, सन्देशं च लभन्ते। समाजे वर्तमानानामनेकेषां मानवानां रुचिस्तेषामवधारणानां च व्यवहारमाध्यमेन चित्रणं मनोवैज्ञानिकीषु कथासु भवति। पुराणप्रसिद्धं विषयमवलम्ब्य रचिता, उद्धृता वा कथाः पौराणिककथा निगद्यन्ते। संस्कृते च विशेषतो नैतिकानां पौराणिकानामैतिहासिकानां वा कथानां बाहुल्यं दृश्यते। सामाजिकी, मनोवैज्ञानिकी च कथा संस्कृते बहुधा नैवावलोक्यते। अतोऽस्माभिस्तादृशानां कथानां रचनायै आयासो विधेयः।

## प्रश्नाः

(क) पञ्चभिर्वाक्यैः कथाया महत्त्वं प्रकाशयत।

(ख) ब्राह्मणग्रन्थेषु उपनिषत्सु च दृष्टा आख्यायिकाः कीदृशं विषयं वर्णयन्ति ?

(ग) अनुच्छेदात् पञ्च तद्धितप्रत्ययान्तानि पञ्च कृत्प्रत्ययान्तानि च पदान्यन्विष्य लिखत।

(घ) पाठानुसारेण परस्परं मेलयत

| **समूहः क** | **समूहः ख** |
|---|---|
| ऐतिहासिकी कथा | समाजप्रसिद्धो विषयः |
| पौराणिकी कथा | व्यवहारद्वारा मनसश्चित्रणम् |
| सामाजिकी कथा | सदाचारस्योपदेशः |
| मनोवैज्ञानिकी कथा | वीराणां वीराङ्गनानां च घटनाः |
| नैतिकी कथा | पुराणेभ्य उद्धृतानि आख्यानानि |

## व्याकरणानुशीलनम्

१. **केवलसमासस्योदाहरणानि पठत**

दृष्टपूर्वः - न निर्मितः केन न दृष्टपूर्वः न श्रूयते हेममयः कुरङ्गः।
तथापि तृष्णा रघुनन्दनस्य, विनाशकाले विपरीतबुद्धिः॥

वागर्थाविव - वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥

२. **अव्ययीभावसमासस्य कानिचन उदाहरणानि पठत–**

| **पूर्वपदमुत्तरपदञ्च** | **अर्थः** | **विग्रहवाक्यम्** | **समस्तशब्दः** |
|---|---|---|---|
| अधि, हरि | विभक्तिः | हरौ | अधिहरि |
| उप, कृष्ण | समीपम् | कृष्णस्य समीपम् | उपकृष्णम् |
| सु, मद्र | समृद्धिः | मद्राणां समृद्धिः | सुमद्रम् |
| दुर्, यवन | व्यृद्धिः | यवनानां व्यृद्धिः | दुर्यवनम् |
| निर्, मक्षिका | अभावः | मक्षिकाणामभावः | निर्मक्षिकम् |
| अति, हिम | अत्ययः | हिमस्यात्ययः | अतिहिमम् |
| अति, निद्रा | असम्प्रति | निद्रा सम्प्रति न युज्यते | अतिनिद्रम् |
| इति, हरि | शब्दप्रादुर्भावः | हरिशब्दस्य प्रकाशः | इतिहरि |
| अनु, विष्णु | पश्चात् | विष्णोः पश्चात् | अनुविष्णु |
| अनु, रूप | योग्यता (यथार्थ) | रूपस्य योग्यम् | अनुरूपम् |
| प्रति, अर्थ | वीप्सा (यथार्थ) | अर्थमर्थं प्रति | प्रत्यर्थम् |
| यथा, शक्ति | पदार्थानतिवृत्ति (यथार्थ) | शक्तिमनतिक्रम्य | यथाशक्ति |
| सह, हरि | सादृश्यम् (यथार्थ) | हरेः सादृश्यम् | सहरि |
| अनु, ज्येष्ठ | आनुपूर्व्यम् | ज्येष्ठस्यानुपूर्व्येण | अनुज्येष्ठम् |
| सह, चक्र | यौगपद्यम् | चक्रेण युगपत् | सचक्रम् |
| सह, सखि | सादृश्यम् | सदृशः सख्या | ससखि |
| सह, क्षत्र | सम्पत्तिः | क्षत्राणां सम्पत्तिः | सक्षत्रम् |
| सह, तृण | साकल्यम् | तृणमप्यपरित्यज्य | सतृणम् |
| सह, अग्नि | अन्तः | अग्निग्रन्थपर्यन्तमधीते | साग्नि |

**प्रयोगाः**

अधुना अधिराष्ट्रं शान्तिर्नैव राजते, इति मम मनः खिन्नं वर्तते ।

उपकृष्णं निवसति अर्जुनः ।

देशे सुभिक्षं वर्तते चेद् जनाः सुखिनो भवन्ति ।

अध्यात्मं राजते कृष्णः ।

३. **केवलसमासस्याव्ययीभावसमासस्य च प्रयोगं विधायानुच्छेदमेकं रचयत ।**

४. **तृच्प्रत्ययपरिचयं तृच्प्रत्ययेन शब्दनिर्माणप्रक्रियां च पठत**

धातुभ्यः 'ण्वुल्तृचौ' इति सूत्रेण कर्तर्यर्थे तृच्प्रत्ययो भवति। तृच्प्रत्ययान्ताः शब्दाः कर्तारं द्योतयन्ति। यथा जयेऽर्थे प्रयुज्यमानाज्जिधातोर्यदि तृच्प्रत्ययो विधीयते तर्हि 'जेतृ' इति शब्दो निष्पद्यते। तस्य च शब्दस्यार्थो 'यो जयति' इति भवति। कानिचन तृच्प्रत्ययान्तानि रूपाणि अधः प्रस्तूयन्ते। उदाहरणं दृष्ट्वा सारिणीं पूरयत-

| **धातुः** | **तृच्प्रत्ययान्तं रुपम्** | **पुल्लिङ्गस्य प्रथमाविभक्तौ रुपाणि** | | |
|---|---|---|---|---|
| कृ (डुकृञ् करणे) | कर्तृ | कर्ता | कर्तारौ | कर्तारः |
| क्री (डुक्रीञ् द्रव्यविनिमये) | क्रेतृ | क्रेता | क्रेतारौ | क्रेतारः |
| जि (जि जये) | जेतृ | | | |
| पाता (पा पाने) | पातृ | | | |
| श्रोता (श्रु श्रवणे) | श्रोतृ | | | |
| गम् (गम्लृ गतौ) | गन्तृ | | | |
| रक्ष् (रक्ष पालने) | रक्षितृ | | | |
| दा (डुदाञ् दाने) | दातृ | | | |
| वच् (वच परिभाषणे) | वक्तृ | | | |
| ग्रह् (ग्रह उपादाने) | ग्रहीतृ | | | |
| दृश् (दृशिर् प्रेक्षणे) | द्रष्टृ | | | |
| सृज् (सृज विसर्गे) | स्रष्टृ | | | |
| अत्ता (अद भक्षणे) | अत्तृ | | | |
| हर्ता (हृञ् हरणे) | हर्तृ | | | |
| खाद् (खादृ भक्षणे) | खादितृ | | | |
| विद् (विद ज्ञाने) | वेत्तृ | | | |
| भुज् (भुज पालनाभ्यवहारयोः) | भोक्तृ | | | |
| हु (हु दानादनयोः) | होतृ | | | |
| लभ् (डुलभष् लाभे) | लब्धृ | | | |
| वृध् (वृधु वृद्धौ) | वर्धिता | | | |

५. **तृच्प्रत्ययान्तानां शब्दानां पुँल्लिङ्गे सर्वाणि रुपाणि**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | कर्ता | कर्तारौ | कर्तारः |
| द्वितीया | कर्तारम् | कर्तारौ | कर्तॄन् |
| तृतीया | कर्त्रा | कर्तृभ्याम् | कर्तृभिः |
| चतुर्थी | कर्त्रे | कर्तृभ्याम् | कर्तृभ्यः |
| पञ्चमी | कर्तुः | कर्तृभ्याम् | कर्तृभ्यः |
| षष्ठी | कर्तुः | कर्त्रोः | कर्तॄणाम् |
| सप्तमी | कर्तरि | कर्त्रोः | कर्तृषु |
| सम्बोधनम् | हे कर्तः ! | हे कर्तारौ ! | हे कर्तारः ! |

६. **उपरि प्रदत्तानां सर्वेषां शब्दानां पुँल्लिङ्गे रूपसञ्चालनस्याभ्यासं कुरुत ।**

७. **तृच्प्रत्ययान्तेभ्यः शब्देभ्यः स्त्रीलिङ्गे 'ऋन्नेभ्यो ङीप्' इति सूत्रेण ङीप्प्रत्ययो भवति । तथा सति नदीशब्दस्येव सर्वेषां शब्दानां रूपाणि जायन्ते । कर्तृशब्दस्य रूपमधः प्रदत्तमस्ति । तस्यानुसारेण उपरि दत्तानां सर्वेषां तृच्प्रत्ययान्तशब्दानां स्त्रीलिङ्गे रूपसञ्चालनं कुरुत**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | कर्त्री | कर्त्र्यौ | कर्त्र्यः |
| द्वितीया | कर्त्रीम् | कर्त्र्यौ | कर्त्रीः |
| तृतीया | कर्त्र्या | कर्त्रीभ्याम् | कर्त्रीभिः |
| चतुर्थी | कर्त्र्यै | कर्त्रीभ्याम् | कर्त्रीभ्यः |
| पञ्चमी | कर्त्र्याः | कर्त्रीभ्याम् | कर्त्रीभ्यः |
| षष्ठी | कर्त्र्याः | कर्त्र्योः | कर्त्रीणाम् |
| सप्तमी | कर्त्र्याम् | कर्त्र्योः | कर्त्रीषु |
| सम्बोधनम् | हे कर्त्रि ! | हे कर्त्र्यौ ! | हे कर्त्र्यः ! |

८. **तृच्प्रत्यान्तशब्दानां वाक्यप्रयोगस्य उदाहरणं दृष्ट्वा तृच्प्रत्ययान्तशब्दैः वाक्यानि परिवर्तयत**

उदाहरणम् - ब्रह्मा जगत् सृजति । ब्रह्मा जगतः स्रष्टा अस्ति ।

सरस्वती विद्यां ददाति । सरस्वती विद्यायाः दात्री अस्ति ।

(क) कालिदासो महाकाव्यानि सृजति । गार्गी काव्यानि सृजति ।

(ख) प्रभा निबन्धानि रचयति । लक्ष्मीप्रसादो नाटकं रचयति ।

(ग) मम भ्राता कथाः शृणोति । मम भगिनी कविताः शृणोति ।

(घ) शिक्षकोऽस्माकं क्रीडां पश्यति । शिक्षिकाऽस्माकं नृत्यं पश्यति ।

(ङ) शिवः संसारं संहरति । देवी राक्षसान् संहरति ।

९. **क्विप्प्रत्ययेन शब्दव्युत्पादनं कथं विधीयते ? अधस्तनीं सारिणीं पठित्वा कथयत**

सोपपदेभ्यो निरुपपदेभ्यो वा सर्वेभ्यो धातुभ्यः क्विप्प्रत्ययो भवति । तस्य च सर्वापहारिलोपो भवति । केषाञ्चन क्विप्प्रत्ययान्तपदानां रूपाणि, तैर्निमितानि च वाक्यानि अधः प्रस्तूयन्ते

| **धातुः** | **क्विप्प्रत्ययान्तं रूपम्** | **अर्थः** | **प्रथमायां रूपाणि** | | |
|---|---|---|---|---|---|
| सम् + पद् + क्विप् | सम्पत्-द् | सम्पत्तिः | सम्पत्-द् | सम्पदौ | सम्पदः |
| वृत्र + हन् + क्विप् | वृत्रहन् | इन्द्रः | वृत्रहा | वृत्रहणौ | वृत्रहणः |
| वि + पद् + क्विप् | विपत् | विपत्तिः | विपत्-द् | विपदौ | विपदः |
| जल + मुच् + क्विप् | जलमुच् | मेघः | जलमुक-ग् | जलमुचौ | जलमुचः |
| अम्बु + भृ + क्विप् | अम्बुभृत् | मेघः | अम्बुभृत्-द् | अम्बुभृतौ | अम्बुभृतः |
| मधु + लिह् + क्विप् | मधुलिह् | भ्रमरः | मधुलिट्-ड् | मधुलिहौ | मधुलिहः |
| भुजङ्ग + भुज् + क्विप् | भुजङ्गभुज् | मयूरः | भुजङ्गभुक्-ग् | भुजङ्गभुजौ | भुजङ्गभुजः |
| विष + भुज् + क्विप् | विषभुज् | विषभोजी | विषभुक्-ग् | विषभुजौ | विषभुजः |
| विश्व + सृज् + क्विप् | विश्वसृज् | ब्रह्मा | विश्वसृट्-ड् | विश्वसृजौ | विश्वसृजः |
| सु + श्रु + क्विप् | सुश्रुत् | शास्त्रवेत्ता | सुश्रुत्-द् | सुश्रुतौ | सुश्रुतः |
| लिह् + क्विप् | लिह् | लेहकः | लिट्-ड् | लिहौ | लिहः |
| राज् + क्विप् | राज् | दीप्तः | राट्-ड् | राजौ | राजः |
| भू + भृ + क्विप् | भूभृत् | हिमालयः | भूभृत्-द् | भूभृतौ | भूभृतः |
| सु + लुञ् + क्विप् | सुलू | शोभनतया लवितुं समर्थः | सुलूः | सुल्वौ | सुल्वः |
| वर्षा + भू + क्विप् | वर्षाभू | भेकः | वर्षाभूः | वर्षाभ्वौ | वर्षाभ्वः |

१०. **क्विप्प्रत्ययान्तशब्दानां प्रयोगेण निर्मितानि वाक्यानि पठित्वाऽर्थापनाभ्यासं कुरुत**

सम्पत्-द् - सुखे दुःखे नरे नार्यां सम्पत्सु च विपत्सु च । विशेषो नैव धीरस्य सर्वत्र समदर्शिनः ॥

वृत्रहन् - एवं द्वितीये तृतीये चतुर्थे पञ्चमे तथा । अभ्येत्याभ्येत्य स्थविरो विप्रो भूत्वाह वृत्रहा ॥

विपत् - मनुष्यजीवने विपद आयान्ति अपयान्ति च ।

जलमुच् - यदि जलमुग् जलं नैव वर्षति, तर्हि कथं सस्यानि वर्धेरन् ?

अम्बुभृत् - अम्बुभृदाषाढे अम्बु वर्षयति ।

मधुलिह् - वसन्तसमये मधुलिह आम्रपुष्पेष्वेव विलसन्ति ।

भुजङ्गभुज् - भुजङ्गभुजो मयूराः मेघगर्जने नृत्यन्ति ।

विषभुज् - यो मद्यं पिबति स विषभुगेव ।

विश्वसृज् - यस्याम्भसि शयानस्य योगनिद्रां वितन्वतः । नाभिह्रदाम्बुजादासीद् ब्रह्मा विश्वसृजां पतिः ॥

सुश्रुत् - सुचक्षा अहमक्षिभ्यां, सुवर्चा मुखेन, सुश्रुत्कर्णाभ्यां भूयासम् ।

११. **कानिचन क्विप्प्रत्ययान्तानि अन्यानि पदानि अन्विष्य वाक्येषु प्रयोगं कुरुत ।**

१२. **इतच्प्रत्ययेन शब्दव्युत्पादनं कथं विधीयते ? निष्पन्नाश्च कीदृगर्था भवति ? अधः पठित्वा लिखत**

'तदस्य सञ्जातम्' इत्यर्थे तारकादिशब्देभ्य इतच्प्रत्ययो भवति । यथा - 'तारकाः सञ्जाता अस्य' इत्यस्मिन् अर्थे तारकितं नभः इति रूपं निष्पद्यते । इतच्प्रत्ययान्तः शब्दः प्रायो विशेषणरूपेण प्रयुक्तो भवति । केषाञ्चन इतच्प्रत्ययान्तानां शब्दानां रूपाणि यथा -

| **अर्थः मूलशब्दश्च** | **इतच्प्रत्ययान्तं रूपम्** | **वाक्येषु प्रयोगः** |
|---|---|---|
| पुष्पाणि सञ्जातानि अस्य | पुष्पित | वसन्तसमये वृक्षाः पुष्पिताः भवन्ति । |
| कुसुमानि सञ्जातानि अस्याः | कुसुमित | कुसुमितां लतां दृष्ट्वा मनो मोदते । |
| बुभुक्षा सञ्जाता अस्य | बुभुक्षित | बुभुक्षितं न प्रतिभाति किञ्चित् । |
| पिपासा सञ्जाता अस्य | पिपासित | अहं पिपासितोऽस्मि, जलं वाञ्छामि । |
| पुलकाः सञ्जाता अस्य | पुलकित | हर्षेण मम वपुः पुलकितमस्ति । |
| उत्कण्ठा सञ्जाता अस्य | उत्कण्ठित | वयमद्य काव्यश्रवणाय उत्कण्ठिताः स्मः । |
| तरङ्गाः सञ्जाता अस्य | तरङ्गित | सागरोऽद्य तरङ्गितो दृश्यते । |
| निद्रा सञ्जाता अस्य | निद्रित | निद्रितो बालः भूमावेव शयितवान् । |
| रोमाञ्चः सञ्जातोऽस्य | रोमाञ्चित | हर्षातिरेकेण मम देहो रोमाञ्चितो विद्यते । |

१३. **अधस्तनानामितच्प्रत्ययान्तशब्दानां वाक्येषु प्रयोगं कुरुत**

मूर्च्छितः, फलितः, दुःखितः, सुखितः, फलितः, दीक्षितः, कलङ्कितः, गर्वितः ।

१४. **आरकन्-घ-ख-आलच्प्रत्ययाः कस्मिन्नर्थे कुतो विधीयन्ते ? पठित्वा कथयत**

आरकन्प्रत्ययेन शृङ्गारकवृन्दारकशब्दौ निष्पद्येते । शृङ्गारकशब्दस्यार्थः शृङ्गार इत्येवार्थो भवति । वृन्दारकशब्दस्य चार्थो देव इति भवति । तथैव 'राष्ट्रे भवः' इत्यर्थे राष्ट्रशब्दाद् घप्रत्यये

घप्रत्ययस्य इयादेशेन 'राष्ट्रिय' इति शब्दो निष्पद्यते । 'क्षत्रे (राष्ट्रे) साधुः' इत्यर्थे 'क्षत्रस्यापत्यम्' इत्यर्थे वा क्षत्रशब्दाद् घप्रत्ययेन 'क्षत्रिय'शब्दो निष्पद्यते । कुलशब्दात्, अवारशब्दात्, पारशब्दात्, पारावारशब्दाद् अवारपारशब्दाच्च 'तत्र भवः' इत्याद्यर्थे खप्रत्ययेन कुलीन-अवारीण-पारीण-पारावारीण-अवारपारीणशब्दा निष्पद्यन्ते । 'कुत्सितं बहु भाषते' इत्यर्थे च वाच्शब्दाद् आलच्-आटचप्रत्ययो भवति । एतेषां शब्दानां वाक्येषु प्रयोगा अधः प्रस्तूयन्ते-

वृन्दारकः -अपि वृन्दारका यूयं न जानीथ शरीरिणाम् । (श्रीमद्भागवतम्, ६/१०/३०)

राष्ट्रियः - अस्माकं मनसि राष्ट्रियचिन्तनं वर्तते ।

क्षत्रियः - धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते ।

कुलीनः - कुलीनस्य सुतां लब्ध्वा कुलीनाय सुतां ददौ । पर्यायक्रमतश्चैव स एव कुलदीपकः ।

वाचालः - मूकं करोति वाचालं पङ्गुं लङ्घयते गिरिम् । यत्कृपा तमहं वन्दे परमानन्दमाधवम् ॥

१५. **उपर्युक्तानि पदानि प्रयुज्य नवीनानि वाक्यानि रचयत ।**

## रचनात्मकं कार्यम्

१. **शिक्षकस्य साहाय्येन पितृभक्तिदर्शिकां काञ्चन पौराणिककथां लिखत ।**

२. **पितृभक्तेर्लाभस्य सूचीं निर्मात ।**

३. **प्रत्ययं तद्भेदाँश्च स्वगिरा दर्शयत ।**

४. **तृच्प्रत्ययैर्निष्पनानि पदानि प्रयुज्य लघ्वनुच्छेदं लिखत ।**

# सन्देशाचारः

भाषाव्यवहारेण विचाराणां विनिमयो भवति । स च व्यवहारो द्विविधः – मौखिको लिखितश्च । पत्रव्यवहारो भाषाया लिखितं स्वरूपमस्ति । यथा मिथो भाषणेन जनाः स्वाभिव्यक्तिं प्रकटयन्ति तथैव ते पत्रमाध्यमेन च कुर्वन्ति । एतेन ते सन्देशं प्रेषयन्ति । एकस्मात् स्थानादपरं स्थानं प्रति सन्देशः प्रेष्यते । कुशलत्वाकुशलत्वविषये ज्ञातुं ज्ञापयितुं वा जनाः पत्रव्यवहारं कुर्वन्ति । किञ्चन कार्यं साधयितुम्, आपतिताः समस्याः समाधातुं च ते पत्रव्यवहारं कुर्वन्ति ।





पत्रव्यवहारस्येतिहासोऽतीव प्राचीनोऽस्ति । काव्येषु पौराणिकसाहित्ये च अस्योल्लेखो लभ्यते । यथा श्रीमद्भागवते रुक्मिण्या श्रीकृष्णं प्रति लिखितं प्रेमपत्रं प्रमाणयति यत् पञ्चसहस्रशो वर्षेभ्यः पूर्वमपि पत्रलेखनस्य परम्पराऽऽसीदिति । तदानीं भूर्जपत्रेषु, वस्त्रेषु वा लिखित्वा पत्राणि प्रेष्यन्ते स्म । पुरा कपोतादिपक्षिणां माध्यमेन च पत्रप्रेषणं क्रियते स्म । अपेक्षानुसारं जनो जनं प्रति, परिवारं प्रति, परिवारो जनं प्रति, अपरं परिवारं प्रति, जनः संस्थां कार्यालयं वा प्रति, कार्यालयः संस्था वा जनं प्रति पत्रव्यवहारं करोति । कस्मिँश्चिद्विषये सूचनाय, मनोभावज्ञापनाय, सन्देश-वार्तादिसम्प्रेषणाय च पत्रव्यवहारो विधीयते । पत्रव्यवहारेण सम्बन्धशोधनम्, पारस्परिकविश्वासस्य दृढीकरणञ्च सम्पादयितुं शक्यते । अधुना दूरभाषादियन्त्राणां विकासेन जनानां मिथः सन्देशादिप्रेषणाय पत्रव्यवहारस्य परम्परा यद्यपि न्यूनायिताऽस्ति, तथापि कार्यालयादीनां व्यवहारः प्रायः पत्रेणैव जायते ।

आधुनिके युगे तु विविधानां सन्देशपत्राणाञ्च प्रचलनमस्ति । यथा– सूचनपत्रम्, आमन्त्रणपत्रम्, वर्धापनपत्रम्, विज्ञापनपत्रम्, शुभकामनापत्रमित्यादीनि । जन्मोत्सवस्योपलक्ष्ये शुभकामनासन्देशम्, रुग्णं प्रति स्वास्थ्यलाभकामनाम्, उपनयनादिसंस्कारावसरेषु आमन्त्रणसन्देशम्, परीक्षोत्तीर्ण-पदोन्नत्याद्यवस्थासु वर्धापनसन्देशं प्रेषयितुञ्च सन्देशपत्राणां प्रयोगो दृश्यते ।

जनानां मिथो व्यवहृतं कुशलत्वाकुशलत्वादिविषयं पत्रमनौपचारिकं भवति चेत् कार्यालयात् कार्यालयं प्रति जनं प्रति वा लिखितं पत्रमौपचारिकं भवति । प्रकारान्तरेण पत्रस्य पारिवारिक-व्यावसायिक-कार्यालयीयभेदेन पुनस्त्रैविध्यञ्च स्वीक्रियते । पारिवारिकान् सदस्यान्, मित्राणि, सम्बन्धिनः प्रति च यत्पत्रं लिख्यते तद् व्यक्तिगतं पारिवारिकं वा पत्रमुच्यते । जनाः पारस्परिकं सम्बन्धमाधृत्य एतादृशं पत्रं लिखन्ति । सम्बोधनाय, शिष्टाचारव्यवहाराय, सम्बन्धबोधनाय च प्रयोज्यानां पदानां काचन व्यवस्था तु तत्रावश्यं भवति, परन्त्वेतादृशानां पत्राणां लेखनाय शब्दप्रयोगाय वा कश्चन विशेषोऽनिवार्यो नियमो न भवति । कुत्र कुत्र कथंविधानि पदानि प्रयोक्तव्यानीति सामान्यो नियमस्तु भवत्येव । सम्भाषणभाषयैव च पत्रव्यवहारो भवितुं शक्नोति । अत्रोच्चस्तरीया भाषा नापेक्ष्यते । अतः पत्रमिदमनौपचारिकमिति व्यवह्रियते । परीक्षासु परीक्षार्थिभिर्लेख्येषु पत्रेषु तु विशिष्टैव भाषा प्रयोज्या भवति ।

तदतिरिक्तानि व्यावसायिकानि कार्यालयीयानि च पत्राणि सर्वदैवौपचारिकाणि भवन्ति । औपचारिकपत्रेषु प्रायः पत्रसङ्ख्यानाञ्च समुल्लेखो विधीयते । अपेक्षानुसारं पत्राणां स्वरूपाणि पृथग्भवन्ति । एतादृशेषु पत्रेषु सम्बोधनपूर्वकस्य स्थानसङ्केतस्यानन्तरं पत्रस्य विषयस्य च स्पष्टतयोल्लेखनं क्रियते । एतादृशानां पत्राणां व्यवहाराय प्रायः संस्थानां कार्यालयानां वा नाम-स्थानाद्यङ्कितानि पत्रप्रपत्राणि प्रयुज्यन्ते ।

इदं युगं वैज्ञानिकम् । प्रविधेर्युगमिदम् । एतादृशे युगे च कर्गदे पत्रलेखनस्य परम्पराया महत्त्वं समाप्तं नास्ति । अन्तःसञ्जालमुपयुज्य इमेल-मेसेञ्जरादिमाध्यमेन सम्प्रति पत्र-सन्देशादिप्रेषणं सुकरं जातमस्ति । अद्यत्वे सङ्गणकमाध्यमेन टङ्कनं विधाय पत्राणां सद्यःप्रेषणं सम्भवति तथापि पत्रस्य मुद्रणं कृत्वा, लेखन्या कर्गदे लिखित्वा च पत्रव्यवहारोऽन्तःसञ्जालस्यैतस्मिन् युगेऽपि दृश्यत एव । एतेन युगं यावदपि प्रविधिमयं भवतु, कर्गदैः पत्रव्यवहारो नहि परित्यक्तो भविष्यतीति अनुमातुं शक्यते ।

## अभ्यासः

### श्रवणं भाषणं च

१. **शिक्षकमुखादधः प्रदत्तानि पदानि श्रुत्वा अनूच्चारयत**

भाषाव्यवहारेण, पत्रव्यवहारः, स्वाभिव्यक्तिः, पत्रमाध्यमेन, कुशलत्वाकुशलत्वविषये, साधयितुम्, समस्यानां समाधानाय, इतिहासः, पौराणिकसाहित्ये, अस्योल्लेखः, श्रीमद्भागवतम्, पञ्चसहस्रशः, भूर्जपत्रेषु, कपोतादिपक्षिणाम्, पत्रप्रेषणम्, अपेक्षानुसारम् ।

२. **उदाहरणमनुसृत्य अधस्तनपदानां पदच्छेदं विधाय श्रावयत**

उदाहरणम् : पौराणिकसाहित्ये = पौराणिके साहित्ये

औपचारिकपत्रेषु, पत्रसङ्ख्यानाम्, सम्बोधनपूर्वकस्य, पत्रप्रपत्राणि, सङ्गणकमाध्यमेन, सद्यःप्रेषणम्, पत्रव्यवहारः, अन्तःसञ्जालस्य, परित्यक्तः, सूचनपत्रम्, आमन्त्रणपत्रम्, वर्धापनपत्रम्, विज्ञापनपत्रम्, शुभकामनासन्देशः ।

३. **पाठं साभिनयं वाचयत ।**

४. **पाठाद् गृहीतानि अधस्तनानि पदानि प्रयुज्य प्रतिपदमेकं वाक्यं कक्षायां श्रावयत**

पत्रम्, कार्यालयः, त्रैविध्यम्, सदस्यान्, मित्राणि, पारस्परिकम्, शिष्टाचारः, व्यवस्था, अवश्यम्, लेखनाय, कश्चन, नियमः, उच्चस्तरीया, परीक्षार्थिभिः, विशिष्टा ।

५. **अनुवाचनपूर्वकं शिक्षकादधस्तनस्य नीतिपद्यस्यार्थं श्रुत्वा प्रदत्तानां प्रश्नानामुत्तराणि कथयत**

भोगे रोगभयं कुले च्युतिभयं वित्ते नृपालाद् भयं
मौने दैन्यभयं बले रिपुभयं रूपे जराया भयम् ।
शास्त्रे वादभयं गुणे खलभयं काये कृतान्ताद् भयं
सर्वं वस्तु भयान्वितं भुवि नृणां वैराग्यमेवाभयम् ॥

(क) भोगे कस्माद् भयं भवति ?

(ख) रूपे कस्या भयं भवति ?

(ग) काये कस्माद् भयं भवति ?

(घ) बले कस्माद् भयं भवति ?

(ङ) सर्वं वस्तु कीदृशमस्ति ?

(च) भुवि नृणां कृतेऽभयं किम् ?

६. **अधस्तनीं सूचनां पठित्वा कक्षायां श्रावयत**

**सूचना**

अस्माकं देशे नगरे नगरे ग्रामे ग्रामे च एकस्य नवीनस्य रोगस्य सङ्क्रमणं प्रस्रियमाणं वर्तते । रोगस्य विषयेऽनुसन्धानं जायमानमस्ति । अतः सङ्क्रमणात् स्वजीवनरक्षार्थं सर्वेऽवधानेन तिष्ठन्तु । मुखावरकादीन् सुरक्षोपायान् प्रयुञ्जन्तु । विना कार्यं गृहान्न निर्यान्तु । जनहिताय सूचनेयं प्रसारिताऽस्ति ।

स्वास्थ्य-सेवा-विभागः

दिनाङ्कः २०७९-०४-०२

७. **पाठस्थानामधस्तनानां पदानां सन्धिच्छेदं कृत्वा कथयत**

यथा– लिखितश्च = लिखितः + च

लिखितं स्वरूपम्, मिथो भाषणेन, स्वाभिव्यक्तिः, स्थानाद् अपरम्, कुशलत्वाकुशलत्वविषये, इतिहासोऽतीव, अस्योल्लेखः, परम्परासीदिति, अपेक्षानुसारम्, कस्मिँश्चिद्विषये, मनोभावः, द्रढीकरणञ्च, प्रविधेर्युगम्, नास्ति, तथापि, युगेऽपि, दृश्यत एव ।

८. **उदाहरणानुसारेण प्रदत्तपदानामर्थं वदत**

पुरा, विचारः, अतीव, परम्परा, वार्ता, रुग्णः ।

उदाहरणम् : भावना = विचारः

| | | | |
|---|---|---|---|
| (क) | अत्यन्तम् | = | ........................ |
| (ख) | प्राचीनकाले | = | ........................ |
| (ग) | रीतिः | = | ........................ |
| (घ) | आतुरः | = | ........................ |
| (ङ) | वृत्तान्तः | = | ........................ |

९. **अधस्तनानि वाक्यानि श्रुत्वा सत्यवाक्ये 'आम्' असत्यवाक्ये 'नहि ' इति वदत**

(क) भाषाव्यवहारो द्विविधो भवति । ..........

(ख) भाषाव्यवहारेण विचाराणां विनिमयो न भवति । ..........

(ग) रुक्मिण्या श्रीकृष्णं प्रति प्रेमपत्रं प्रेषितम् । ..........

(घ) पत्रव्यवहारस्य इतिहासोऽतीव नवीनोऽस्ति । ..........

(ङ) पत्रव्यवहारो भाषाया मौखिकं स्वरूपम् । ..........

१०. **औपचारिकानौपचारिकपत्रयोः को भेदः ? पाठाधारेण सखिभिः सह विमृशत ।**

११. **सन्देशाः कतिविधा भवन्तीति अधीतपाठानुसारं वदत ।**

१२. **अधस्तनं विज्ञापनं श्रुत्वा उत्तराणि कथयत**

**संस्कृतभाषाज्ञानाय स्वर्णावसरः**

दशाधिकवर्षेभ्यः पूर्वतः संस्कृतभाषाप्रशिक्षणं सञ्चालयता, संस्कृतसेवापदकविभूषितेन विदुषा राजीवशर्मणा विरचितं 'संस्कृत-सम्भाषण-सोपानम्' इत्याख्यं पुस्तकं सद्य एव प्रकाशितमस्ति । देशस्य संस्कृतपुस्तकापणेषु सर्वत्र पुस्तकमिदमुपलभ्यते । स्वस्य कृते सपदि सुरक्षितं कुर्वन्तु ।

समज्ञा-संस्कृताभियानम्

काष्ठमण्डपः, नेपालः

(क) पुस्तकं कदा प्रकाशितम् ?

(ख) पुस्तकस्य नाम किम् ?

(ग) पुस्तकस्य लेखकः कः ?

(घ) स कियद्वर्षेभ्यः शिक्षयन्नस्ति ?

(ङ) प्रकाशितं पुस्तकं कुत्रोपलभ्यते ?

(च) राजीवशर्मा केन पदकेन विभूषितोऽस्ति ?

## पठनम्

१. **पाठं निरवच्छेदेन पठत ।**

२. **अधस्तनं गद्यांशं पठित्वा प्रश्नानुत्तरयत**

मानवः प्राणिषु सर्वोत्तमो वर्तते, यतो हि स विवेकेनाचरति । गुणवत्तैव मानवीयं मूल्यमस्ति । गुणवत्ता मानवायोत्कर्षं दापयति, गुणहीनता चापकर्षम् । यो गुणवान् गुणग्राही च भवति स जीवने साफल्यं प्राप्नोति ।

इतरैः सह सद्भावः, दीनेषु दयाभावः, कनीयस्सु स्नेहभावः, वरीयस्स्वादरभावः, असहायेषु साहाय्यभावश्च मानवेषूत्तमतां साधयन्ति । एतादृशा गुणा मानवीयं मूल्यं वर्धयन्ति । मानवेषु सच्चारित्र्यं भावयन्ति । एते गुणा मानवान् जीवनस्योच्चं लक्ष्यं प्रति प्रेरयन्ति, लक्ष्यावाप्तौ साहज्यञ्च सम्पादयन्ति ।

मानवीयमूल्यवान् जनो विषमायां परिस्थितौ च दृढतया लक्ष्यमुखः सन् कार्यं कुरुते । स परिश्रमी, दृढसङ्कल्पश्च भवति परन्तु स्वार्थसाधनाय सद्गुणान् न कदापि त्यजति । स्वार्थं परित्यज्यापि मानवीयमूल्यं रक्षति । अतः समाजस्य व्यक्तेश्च शोभनतायै मानवीयमूल्यस्य परिपालनं नितरामावश्यकम् ।

## प्रश्नाः

(क) मानवीयं मूल्यं किम् ?

(ख) कः प्राणिषु सर्वोत्तमो वर्तते ?

(ग) को जीवने साफल्यं प्राप्नोति ?

(घ) गुणवत्ता मानवाय किं दापयति ?

(ङ) किञ्च मानवायापकर्षं दापयति ?

(च) मानवीयमूल्यवान् कदा किं कुरुते ?

(छ) के मानवेषूत्तमतां साधयन्ति ?

(ज) सद्गुणाः केषु सच्चारित्र्यं भावयन्ति ?

(झ) कः स्वार्थसाधनाय सद्गुणान् न त्यजति ?

(ञ) मानवीयमूल्यस्य परिपालनं किमर्थं नितरामावश्यकम् ?

**(आ) उपर्युक्तस्य गद्यांशस्य सन्देशः कः ? स्वविचारं प्रकटयत ।**

**(इ) उपरितनस्य गद्यांशस्य द्वितीयमनुच्छेदं पठित्वा कक्षायां श्रावयत ।**

**(ई) गद्यांशमाधृत्य रिक्तस्थानं पूरयत**

इतरैः .......... सद्भावः, .......... दयाभावः, .......... स्नेहभावः, .......... आदरभावः, .......... साहाय्यभावश्च मानवेषु .......... साधयन्ति । एतादृशा गुणा .......... मूल्यं वर्धयन्ति । .......... सच्चारित्र्यं भावयन्ति । एते .......... मानवान् .......... उच्चं लक्ष्यं .......... प्रेरयन्ति, लक्ष्यावाप्तौ .......... सम्पादयन्ति ।

## लेखनम्

१. **परस्परं मेलयत**

| **शुभकामनावचनं** | **अवसरः** |
|---|---|
| शतं जीव भद्रं पश्य | दीपावली |
| गृहे गृहे संस्कृतगर्जनं स्यात् | परीक्षा |
| शिवास्ते सन्तु पन्थानः | विवाहोत्सवः |
| दीपज्योतिर्जीवनं द्योतयेत् | जन्मोत्सवः |
| साफल्यं त्वमवाप्नुहि | संस्कृतदिवसः |
| नवदाम्पत्यं सुखं तनुयात् | यात्रावसरः |

२. **अधस्तनानां वाक्यानामशुद्धीः संशोधयत**

(क) अयं युगं वैज्ञानिकम् ।

(ख) व्यवहारं द्विविधम् – मौखिकं लिखितञ्च ।

(ग) अद्यत्वे सङ्गणकमाध्यमेन टङ्कनं विधीयेते ।

(घ) कर्गदे लिखित्वा पत्रव्यवहारोऽन्तःसञ्जालस्य युगेऽपि दृश्यन्ते ।

(ङ) प्रकारान्तरेण पत्रं त्रिविधम् – पारिवारिकम्, व्यावसायिकम्, कार्यालयीयं च ।

३. **अधस्तनानां पदानामर्थं लिखत**

विनिमयः, द्विविधः, पत्रमाध्यमेन, साधयितुम्, प्राचीनः, प्रेमपत्रम्, मनोभावः, सम्बन्धशोधनम्, आधुनिके युगे, विविधः ।

४. **पाठात् कानिचन दश समस्तपदान्यन्विष्य विग्रहपूर्वकमत्र लिखत**

यथा -

भाषाव्यवहारेण भाषया व्यवहारः तेन

५. **पाठस्य प्रथमस्यानुच्छेदस्य श्रुतलेखनं कुरुत ।**

६. **पाठं पठित्वा प्रश्नानुत्तरयत**

(क) इदं युगं कीदृशम् ?

(ख) भाषाव्यवहारः कतिविधः ?

(ग) कीदृशं पत्रमनौपचारिकं भवति ?

(घ) विचाराणां विनिमयः कथं भवति ?

(ङ) जनाः किमर्थं पत्रव्यवहारं कुर्वन्ति ?

(च) जनाः कथं स्वाभिव्यक्तिं प्रकटयन्ति ?

(छ) पत्रव्यवहारस्योल्लेखः कुत्र कुत्र लभ्यते ?

(ज) कैः पत्रव्यवहारः परित्यक्तो न भविष्यति ?

(झ) कीदृशे पत्रे उच्चस्तरीया भाषा नापेक्ष्यते ?

(ञ) इमेल-मेसेञ्जरादिमाध्यमेन किं सुकरं जातम् ?

(ट) पुरा कर्गदाभावे कुत्र लिखित्वा पत्राणि प्रेष्यन्ते स्म ?

(ठ) रुक्मिण्या श्रीकृष्णं प्रति लिखितं प्रेमपत्रं किं प्रमाणयति ?

७. **पाठाधारेण मञ्जूषायां प्रदत्तानि विपरीतार्थपदानि विचित्य लिखत**

यथा–

असमाधानम् - समाधानम्

नवीनः - ................

लिखितः - ................

कुशलत्वम् - ................

रोगी - ................

सामान्या - ................

पशुः - ................

गृहम् - ................

**मञ्जूषा**

| |
|---|
| मौखिकः, अकुशलत्वम्, समाधानम्, प्राचीनः, पक्षी, कार्यालयः, रुग्णः, विशिष्टा |

८. **मञ्जूषासाहाय्येनामन्त्रणपत्रगतं रिक्तस्थानं पूरयत**

**आमन्त्रणम्**

देवघट्टधाम, तनहूँ-मण्डलम्

दिनाङ्का २०७८-१०-२१

मान्या ईश्वरानन्द-ब्रह्मचारिणः,

सश्रद्धं ................ ।

वसन्तपञ्चमी अस्माकं गुरुकुलस्य वार्षिकोत्सवदिवसो .......... । ................ वसन्तपञ्चमी परश्वस्तनी विद्यत ................ तु नाविदितं भवताम् । तद्दिने ................ वार्षिकोत्सवस्य ................ प्रमुखातिथित्वेन ................ अस्माननुगृह्णन्तु इति प्रार्थ्यन्ते ।

स्थानम्–महेश-संस्कृत-गुरुकुलस्य प्राङ्गणम्

समयः –प्रातः सप्तवादनम्

भवदीयो दर्शनाभिलाषी
शुभङ्करः शर्मा
प्राचार्यः

**मञ्जूषा**

| |
|---|
| समागत्य, नमः, ऐषमी, प्रार्थये, कार्यक्रमे, गुरुकुलस्य, इति, वर्तते |

९. **मञ्जूषासाहाय्येन उचितं पदं लिखत**

**सम्बोधनम्–**

श्रद्धेयाः, समादरणीयाः ................ प्रति

पूज्याः, सम्मान्याः ................ प्रति

प्रिय सहोदर/भ्रातः ................ प्रति

प्रियवयस्य, प्रियसतीर्थ्य ................ प्रति

प्रियवत्स, दीर्घजीविन् ................ प्रति

प्रियतनये, आयुष्मति ................ प्रति

**मञ्जूषा**

| |
|---|
| मातरम्, मित्रम्, गुरुजनान्, अनुजम्, पुत्रीम्, शिष्यम्/पुत्रम् |

१०. **सूचनामन्त्रण-वर्धापन-शुभकामनानां शैलीषु का भिन्नतास्तीति विषये कक्षायां पाठं पाठाभ्यासञ्चाधृत्य विमृशत । विमृष्टं निष्कर्षमभ्यासपुस्तिकायां समुल्लिखत ।**

११. **अधस्तनीं कथां पठित्वा प्रश्नानुत्तरयत**

क्वचिदेको ग्राम आसीत् । ग्रामस्य जनाः कृषिकर्म कुर्वन्ति स्म । यामानुसारेण यव-तिल-गोधूम-मकाय-तण्डुलादीनुत्पाद्य ग्रामीणा जीविकां निर्वहन्ति स्म । तेषामपरं प्रमुखं कर्म पशुपालनमासीत् । विशेषतया गोमहिषादिपशवस्तत्र पाल्यन्ते स्म । स्वयमुपभुज्यावशिष्टमन्नं प्रवर्धितान् पशूँश्च ते हट्टापणे नीत्वा विक्रीणन्ते स्म ।

ग्रामीणाः सदैव स्वे स्वे कर्मणि निरता भवन्ति स्म । ग्रामीणाः श्रमशीला आसन् । अतो ग्रामश्च सम्पन्नताभिमुख आसीत् । एतादृशेऽपि ग्रामे एकः कश्चन दरिद्रो विप्रो वसति स्म । नित्यं स भिक्षाटनेन स्वजीवनं सञ्चालयति स्म । पत्नीतनयादीनाञ्चेच्छावानपि स दरिद्रतया एकाकी एव निवसति स्म ।

एकदा स भिक्षाटनार्थं कस्यचन श्रेष्ठिनो गृहं प्राप्नोत् । तत्रत्या गृहिणी तस्मै पिष्टेन पूर्णं मृद्घटं प्रायच्छत् । सदैव मुष्टिमितान् तण्डुलान् प्राप्य गृहं प्रत्यागमनशीलः स तस्मिन् दिने पिष्टपूरितं सकलं घटं प्राप्य अत्यन्तं प्रसन्नः सञ्जातः । घटं गृहीत्वा प्रसन्नचेताः स गृहं प्रत्यागच्छत् । घटं समानीय स तं रज्जुना बद्धवान् । उपरि लम्बके संयोज्य तमस्थापयत् । घटं तथाऽस्थापयत्, यथा पर्यङ्के सुप्त्वैव उपरि द्रष्टुं शक्येत । ततो नित्यं स पर्यङ्के सुप्त्वा तं पिष्टघटं सानन्दं पश्यति स्म ।

एकदा स तथैव पर्यङ्के सुप्त्वा पिष्टघटमेव वीक्षमाणः चित्तप्रसादनं कुर्वन्नासीत् । तस्य मनस्येका कल्पना प्रादुर्भूता । स चिन्तितवान्– "यदि दुर्भिक्षो भवेत्, तर्हि एतस्य पिष्टघटस्य शतरूप्यकपरिमितं मूल्यं भविष्यति । तदानीमहं शतरूप्यकैरेतं विक्रेष्यामि । पिष्टघटं विक्रीय प्राप्तेन धनेनाहमजद्वयं क्रेष्यामि । कालान्तरे ताभ्यामेवाजाभ्यामजसमूहो भविष्यति । तदनन्तरमजस्य समूहमपि विक्रेष्ये । अजविक्रयधनेन धेनुं क्रेष्यामि । तया च स्वल्पेनैव कालेन धेनवो भविष्यन्ति । धेनूनां च विक्रयेण प्राप्तै रूप्यकैः पुनर्महिषीः क्रेष्यामि । ता अपि विक्रीय बहूनश्वान् क्रेष्यामि । कालक्रमेणाश्वशालायामश्वानां सङ्ख्या अधिका भविष्यति । ततः काँश्चनाश्वान् विक्रेष्यामि । प्राप्तधनेन विशालं गृहं रचयिष्यामि । तदानीं मां वैभवशालिनं विज्ञाय जना आकृष्टा भविष्यन्ति । केचन मह्यं कन्यादानस्य प्रस्तावमानेष्यन्ति । एकां रूपवतीं कन्यां स्वीकृत्योद्वाहं करिष्यामि । अनन्तरं सा एकं पुत्रं सोष्यति । 'देवशर्मा' इति पुत्रस्य नामकरणं करिष्यामि । यदा स जानुभ्यां चलितुं समर्थो भविष्यति, तदा स वारं वारं मत्समीपं समायातुं

चेष्टते। एकदाऽहं स्वकीये ग्रन्थालये कञ्चन ग्रन्थमधीयानो भविष्यामि। पुत्रस्तत्रैव निकटे क्रीडन् भविष्यति। घोटकाकृतिकं क्रीडनकमूढ्वा क्रीडन् स सहसा ततो निपतिष्यति। अनन्तरं स रोदितुं प्रारप्स्यते। किमर्थं रोदिषीति मया पृष्टः स बालसुलभं व्यवहारं प्रदर्शयन् क्रीडनकं निर्दिश्य तद् दण्डयितुं सङ्केतयिष्यति। अहञ्च पुत्रस्य सन्तोषाय घोटकरूपं क्रीडनकं प्रति चरणप्रहारं करिष्यामि।"

एवं विचिन्तयन् स दक्षिणं चरणमुत्थाप्य प्राहरत्। चरणस्य प्रहारेण पर्यङ्कोपरि लम्बितः पिष्टघटो भूमौ निपत्य भग्नोऽभवत्। भग्नघटेन सहैव तस्य कल्पनास्वप्नश्च भग्नः सञ्जातः। अत उच्यते–

**अनागतवतीं चिन्ताम्, असम्भाव्यां करोति यः।**
**स एव पाण्डुरः शेते, देवशर्मपिता यथा॥**

(अ) **सङ्क्षेपेण उत्तरयत**

(क) ग्रामस्य जनाः किं कुर्वन्ति स्म ?

(ख) ग्रामीणानामपरं प्रमुखं कर्म किमासीत् ?

(ग) ग्रामः कीदृश आसीत् ?

(घ) दरिद्रो विप्रः किमर्थमेकाकी एव निवसति स्म ?

(ङ) गृहिणी कस्मै पिष्टेन पूर्णं मृद्घटं प्रायच्छत् ?

(च) चरणस्य प्रहारेण किमभवत् ?

(छ) भग्नघटेन सह कस्य कल्पनास्वप्नो भग्नः सञ्जातः ?

(ज) देवशर्मपिता कीदृशीं चिन्तामकरोत् ?

(आ) **कथाधारेण वाक्यानि संशोध्य लिखत**

(क) ग्रामे विशेषतया व्याघ्रगजादिपशवः पाल्यन्ते स्म।

(ख) ग्रामीणाः स्वयमुपभुज्यापि अन्नं विक्रीणन्ते स्म।

(ग) ग्रामीणा नागरिकाणां कर्मणि निरता भवन्ति स्म।

(घ) दरिद्रो जनः केवलं धनस्येच्छावानासीत्।

(ङ) स तण्डुलैः पूरितं मृद्घटं प्राप्तवान्।

(च) घटं समानीय स तं धौतवस्त्रेण बद्धवान्।

(छ) चरणेन प्रहृतो घटो दरिद्रजनस्य शिरसि न्यपतत्।

(ज) दरिद्रो विप्रः कृषिकर्मणा जीवनं सञ्चालयति स्म।

(इ) **कथाधारेण परस्परं मेलयत**

| | |
|---|---|
| पिष्टघटं विक्रीय | अजसमूहो भविष्यति । |
| अजाभ्यां | धेनुं क्रेष्यामि । |
| अजविक्रयधनेन | अजद्वयं क्रेष्यामि । |
| धेन्वा | धेनवो भविष्यन्ति । |
| धेनूनां विक्रयेण | गृहं निर्मापयिष्यामि । |
| रूपवत्या कन्यया सह | महिषीः क्रेष्यामि । |
| काँश्चन अश्वान् विक्रीय | विवाहं करिष्यामि । |

(ई) **कथायाः समुद्धृतानि क्रियापदानि उचितस्थानेषु लिखत**

कुर्वन्ति, आसीत्, पाल्यन्ते, सञ्चालयति, जनिष्यति, प्रायच्छत्, निवसति, अस्थापयत्, क्रेष्यामि, भविष्यति, प्राहरत्, भवन्ति, उच्यते, शेते, करोति ।

| | |
|---|---|
| लट्लकारः | कुर्वन्ति, ............... |
| लृट्लकारः | ............... |
| लङ्लकारः | ............... |

(उ) **कोष्ठकस्य पदैः रिक्तस्थानानि पूरयत**

(क) कुर्वन् = ............... (कृ + तव्यत्, कृ + शतृ, कृ + शानच्)

(ख) वीक्षमाणः = ............... (वि + ईक्ष् + शतृ, वि + ईक्ष् + शानच्)

(ग) सुप्त्वा = ............... (सुप् + क्त्वा, सुप् + आ, सुप् + ल्यप्)

(घ) तत्रैव = ............... (तत्रै + व, तत्र + एव, तत्र + इव)

(ङ) समायातुम् = ............... (सम् + आ + या + तुम्, सम् + आ + या + तुमुन्)

(च) ग्रन्थालये = ............... (ग्रन्था + लये, ग्रन्थ + अलये, ग्रन्थ + आलये)

(छ) प्राहरत् = ............... (प्र + अहरत्, प्रा + हरत्, प्र + आहरत्)

(ज) निपत्य = ............... (नि + पत् + य, नि + पत् + ल्यप्)

(ऊ) **कथायाः पदानि प्रयुज्य नवीनानि वाक्यानि रचयत**

निपतिष्यति, पर्यङ्कोपरि, भूमौ, कश्चन, स्वीकृत्य, नित्यम्, पशूनाम्, ग्रामीणाः, यामानुसारेण, भिक्षार्थम्, अत्यन्तम् ।

(ऋ) **कथायां प्रयुक्तस्य अधस्तनस्य पद्यस्य सरलार्थं लिखत**

अनागतवतीं चिन्तामसम्भाव्यां करोति यः ।
स एव पाण्डुरः शेते, देवशर्मपिता यथा ॥

## व्याकरणानुशीलनम्

१. **कोष्ठकस्य निर्देशनमाधृत्य णिनिप्रत्ययान्तपदैर्वाक्यानि पूरयत**

| | | |
|---|---|---|
| (क) | ................. मूर्खो भवति । | (पण्डित + मन् + णिनि) |
| (ख) | ................. जनो दुराचारी भवति । | (मिथ्या + वद् + णिनि) |
| (ग) | वसन्तस्य प्रकृतिः ................. भवति । | (मनस् + हृ + णिनि) |
| (घ) | ................. जनेभ्यो पशुहिंसा न रोचते । | (शाक + आ + हृ + णिनि) |
| (ङ) | ................. जनो राष्ट्राद् निष्कासनीयः । | (राष्ट्र + द्रुह् + णिनि) |

### कृदन्ते णिनि-प्रत्ययः

प्रायेण णिनि-प्रत्ययः स्वभावार्थे भवति । पूर्वभागे विशेषणस्य प्रयोगे धातोरयं प्रत्ययो भवति । यथा–

उष्णं भोक्तुं शीलमस्येति – उष्ण + भुज् + णिनि (इनि) = उष्णभोजी (पुंलिङ्गम्)

उष्णं भोक्तुं शीलमस्या इति – उष्ण + भुज् + णिनि (इनि) = उष्णभोजिनी (स्त्रीलिङ्गम्)

उष्णं भोक्तुं शीलमस्येति – उष्ण + भुज् + णिनि (इनि) = उष्णभोजि (नपुंसकलिङ्गम्)

| रूपावली– | | | |
|---|---|---|---|
| | उष्णभोजी | उष्णभोजिनौ | उष्णभोजिनः (पुंलिङ्गे ब्रह्मचारिवत्) |
| | उष्णभोजिनी | उष्णभोजिन्यौ | उष्णभोजिन्यः (स्त्रीलिङ्गे गौरीवत्) |
| | उष्णभोजि | उष्णभोजिनी | उष्णभोजीनि (नपुंसकलिङ्गे वारिवत्) |

२. **उष्णभोजि-शब्दस्य प्रदत्तां रूपावलीं पठित्वा मनोहारि-शब्दस्य रूपावलीं लिखत**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | उष्णभोजी | उष्णभोजिनौ | उष्णभोजिनः |
| द्वितीया | उष्णभोजिनम् | उष्णभोजिनौ | उष्णभोजिनः |
| तृतीया | उष्णभोजिना | उष्णभोजिभ्याम् | उष्णभोजिभिः |
| चतुर्थी | उष्णभोजिने | उष्णभोजिभ्याम् | उष्णभोजिभ्यः |
| पञ्चमी | उष्णभोजिनः | उष्णभोजिभ्याम् | उष्णभोजिभ्यः |
| षष्ठी | उष्णभोजिनः | उष्णभोजिनोः | उष्णभोजिनाम् |

| | | | |
|---|---|---|---|
| सप्तमी | उष्णभोजिनि | उष्णभोजिनोः | उष्णभोजिषु |
| सम्बोधनम् | हे उष्णभोजिन् ! | हे उष्णभोजिनौ ! | हे उष्णभोजिनः ! |

३. **कोष्ठकस्य निर्देशनमाधृत्य ल्युप्रत्ययान्तपदैर्वाक्यानि पूरयत**

(क) .................. रतिपतिरस्ति । (मद् + ल्यु)

(ख) हिमालयः .................. दृश्यते । (शुभ् + ल्यु)

(ग) मिथ्यालापः .................. अस्ति । (दुष् + ल्यु)

(घ) तस्य सखा .................. अस्ति । (नन्द् + ल्यु)

(ङ) .................. भक्तान् रक्षति । (मधु + सूद् + ल्यु)

**कृदन्ते ल्यु-प्रत्ययः**

नन्दादिधातुभ्यो ल्यु-प्रत्ययेन कर्तृवाचकाः शब्दा निर्मीयन्ते । यथा–

नन्द् + ल्यु = नन्दनः (नन्दयतीति)

रुच् + ल्यु = रोचनः (रोचयतीति)

| | | | |
|---|---|---|---|
| रूपावली – | नन्दनः | नन्दनौ | नन्दनाः (पुंलिङ्गे रामवत्) |
| | नन्दनी | नन्दन्यौ | नन्दन्यः (स्त्रीलिङ्गे नदीवत्) |

४. **परस्परं मेलयत**

| | |
|---|---|
| जल्पाकः | भिक्षते |
| भिक्षाकः | बहु भाषते |
| लुण्टाकः | कुट्टति |
| कुट्टाकः | लुण्टति |

**कृदन्ते षाकन्-प्रत्ययः**

शील-धर्माद्यर्थेषु जल्पादिधातुभ्यः षाकन्-प्रत्ययो भवति । षाकन्-प्रत्ययान्तं पदं विशेषणं भवति । यथा–

जल्प् + षाकन् (आक) = जल्पाकः (बहुभाषकः)

वृङ् + षाकन् (आक) = वराकः (दीनः)

| | | | |
|---|---|---|---|
| रूपावली– | जल्पाकः | जल्पाकौ | जल्पाकाः (पुंलिङ्गे रामवत्) |
| | वराकी | वराक्यौ | वराक्यः (स्त्रीलिङ्गे नदीवत्) |

५. **कोष्ठकस्य निर्देशनमाधृत्य क्मरच्-प्रत्ययान्तपदैर्वाक्यानि पूरयत**

(क) नदी .................. भवति । (सृ + क्मरच्)

(ख) भीमः .................. आसीत् । (अद् + क्मरच्)

(ग) दावानलः .................. अस्ति । (घस् + क्मरच्)

**कृदन्ते क्मरच्-प्रत्ययः**

सृ घसि अद इत्येतेभ्यो धातुभ्यः तच्छीलादिषु अर्थेषु क्मरच्-प्रत्ययो भवति । यथा–

अद् + क्मरच् = अद्मरः (अत्तुं शीलमस्येति)

| | | | |
|---|---|---|---|
| रूपावली – | अद्मरः | अद्मरौ | अद्मराः (पुंलिङ्गे रामवत्) |
| | अद्मरा | अद्मरे | अद्मराः (स्त्रीलिङ्गे नदीवत्) |

६. **कोष्ठकस्य निर्देशनमाधृत्य अण्-प्रत्ययान्तपदैर्वाक्यानि पूरयत**

(क) .................. श्रीरामो वनं जगाम । (रघु + अण्)

(ख) जमदग्निः .................. आसीत् । (भृगु + अण्)

(ग) शकुन्तला .................. आसीत् । (विश्वामित्र + अण्)

(घ) अर्जुनो भीमो युधिष्ठिरश्च .................. आसन् । (पृथा + अण्)

**तद्धिते अण्-प्रत्ययः**

अपत्यार्थे शिवादिभ्योऽण्प्रत्ययो भवति । यथा–

शिव + अण् = शैवः (शिवस्यापत्यम्)

पर्वत + अण् = पार्वती (पर्वतस्यापत्यम्)

७. **पार्वती-शब्दस्य रूपावल्यां रिक्तस्थानं पूरयत**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | पार्वती | ........... | पार्वत्यः |
| द्वितीया | ........... | पार्वत्यौ | पार्वतीः |
| तृतीया | पार्वत्या | पार्वतीभ्याम् | ........... |
| चतुर्थी | पार्वत्यै | ........... | पार्वतीभ्यः |
| पञ्चमी | पार्वत्याः | पार्वतीभ्याम् | ........... |
| षष्ठी | पार्वत्याः | ........... | पार्वतीनाम् |

| | | | |
|---|---|---|---|
| सप्तमी | ........... | पार्वत्योः | पार्वतीषु |
| सम्बोधनम् | हे पार्वति ! | हे ........... ! | हे ........... ! |

८. **कोष्ठकस्य निर्देशनमाधृत्य वुन्-प्रत्ययान्तपदैर्वाक्यानि पूरयत**

(क) माता पुत्राय .................. ददाति । (त्रि + शत + वुन्)

(ख) अग्रजो भ्रात्रे .................. यच्छति । (द्वि + पद + वुन्)

(ग) स मित्रात् .................. गृह्णाति । (पञ्चन् + शत + वुन्)

(घ) ग्राहक आपणिकाय .................. प्रयच्छति । (चतुर् + पद + वुन्)

**तद्धिते वुन्-प्रत्ययः**

सङ्ख्यावाचकस्य शब्दस्य पूर्वप्रयोगे पादशब्दात् शतशब्दाच्च स्वार्थे वुन्-प्रत्ययो भवति । वुन्-प्रत्ययसन्नियोगेन चान्तस्य लोपः । वुन्-प्रत्ययान्ताः शब्दाः केवलं स्त्रियां प्रयुज्यन्ते । यथा–

द्वि + शत + वुन् = द्विशतिका (द्वे द्वे शते सा)

द्वि + पाद + वुन् = द्विपदिका (द्वौ द्वौ पादौ सा)

९. **कोष्ठकस्य निर्देशनमाधृत्य अञ्-प्रत्ययान्तपदैर्वाक्यानि पूरयत**

(क) .................. दुग्धमानय । (गो + अञ्)

(ख) .................. वयो रमणीयं भवति । (किशोर + अञ्)

(ग) वचनस्य .................. सर्वान् आह्लादयति । (सुष्ठु + अञ्)

(घ) .................. कार्यं दृष्ट्वा राजा प्रासीदत् । (राजभृत् + अञ्)

**तद्धिते अञ्-प्रत्ययः**

प्राणिवाचकाद् जातिवाचकाद् आयुर्वाचकाच्च शब्दादञ्-प्रत्ययो भवति । अञ्-प्रत्ययान्तं पदं नपुंसकलिङ्गे प्रयुज्यते । यथा–

अश्व + अञ् = आश्वम् (अश्वस्येदम्/भावः)

पृथु + अञ् = पार्थवम् (पृथोरिदम्)

१०. **कोष्ठकस्य निर्देशनमाधृत्य इञ्-प्रत्ययान्तपदैर्वाक्यानि पूरयत**

(क) .................. श्रीकृष्णोऽस्मान् पातु । (वसुदेव + इञ्)

(ख) .................. महान् योद्धाऽऽसीत् । (सोमदत्त + इञ्)

(ग) लक्ष्मणः .................. अपि कथ्यते स्म । (सुमित्रा + इञ्)

(घ) अश्वत्थाम्नोऽपरं नाम .................. अस्ति । (द्रोण + इञ्)

**तद्धिते इञ्-प्रत्ययः**

अदन्तेभ्यः प्रातिपदिकेभ्योऽपत्यार्थे इञ्-प्रत्ययो भवति । यथा–

दशरथ + इञ् = दाशरथिः (दशरथस्यापत्यम्)

सोमदत्त + इञ् = सौमदत्तिः (सोमदत्तस्यापत्यम्)

११. **दाशरथि-शब्दस्य रूपावल्यां रिक्तस्थानं पूरयित्वा प्रदत्तैः पदैर्वाक्यानि रचयत**

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | दाशरथिः | ........... | दाशरथयः |
| द्वितीया | ........... | दाशरथी | दाशरथीन् |
| तृतीया | दाशरथिना | दाशरथिभ्याम् | ........... |
| चतुर्थी | दाशरथये | ........... | दाशरथिभ्यः |
| पञ्चमी | दाशरथेः | दाशरथिभ्याम् | ........... |
| षष्ठी | दाशरथेः | ........... | दाशरथीनाम् |
| सप्तमी | ........... | दाशरथ्योः | दाशरथिषु |
| सम्बोधनम् | हे दाशरथे ! | हे ........... ! | हे ........... ! |

**वाक्यप्रयोगार्थशब्दाः**

दाशरथिः, दाशरथिभ्यः, दाशरथिना, दाशरथ्योः, दाशरथौ, दाशरथे, दाशरथये, दाशरथेः, दाशरथिभिः, दाशरथीन्, दाशरथिषु ।

१२. **पठितानां तद्धितप्रत्ययान्तपदानामाधारेण परस्परं मेलयत**

| | |
|---|---|
| आश्वम् | विनायकः |
| दाशरथिः | गौरी |
| शैवः | मन्दुरा |
| पार्वती | श्रीरामः |

## रचनात्मकं कार्यम्

१. **पाठाद् गृहीतैरधोलिखितैः समस्तपदैर्नवीनानि वाक्यानि रचयत**

सूचनपत्रम्, आमन्त्रणपत्रम्, वर्धापनपत्रम्, विज्ञापनपत्रम्, शुभकामनापत्रम्, जन्मोत्सवस्य, शुभकामनासन्देशम्, स्वास्थ्यलाभकामनाम्, उपनयनादिसंस्कारावसरेषु, आमन्त्रणसन्देशम्, शिष्टाचारव्यवहाराय, शब्दप्रयोगाय, सम्भाषणभाषा, पत्रव्यवहारः ।

२. **स्वस्य भ्रातुर्भगिन्या वा विवाहोत्सवं विषयीकृत्यामन्त्रणपत्रं रचयत ।**

३. **मञ्जूषायाः साहाय्येन अधस्तनं चित्रम् दशभिर्वाक्यैर्वर्णयत**

यथा–



(क) अत्र पुस्तकमेलापकस्य चित्रमस्ति ।

मञ्जूषा

| |
|---|
| **पुस्तकमेलापकम्, विविधानि पुस्तकानि, आपणिकाः, ग्राहकाः, क्रीणन्ति, विक्रीणाति, रुप्यकाणि, पुस्तकानाम् आवरकाणि, मनोहारि दृश्यम्, जनसम्मर्दः, सुन्दराणि, बहुमूल्यम्, ज्ञानम्** |

४. **विविधेष्ववसरेषु प्रयोज्यानि वर्धापनवाक्यानि कर्गजपट्टे लिखित्वा स्वस्य कक्षाकोष्ठस्य भित्तौ श्लेषयत ।**

५. **विज्ञापन–शुभकामनयोः प्रयोजनस्य तल्लाभस्य च विषये कक्षाविमर्शं कृत्वा विषयेऽस्मिन् दश सूत्रवाक्यानि लिखित्वा शिक्षकं दर्शयत ।**

## सप्तमः पाठः

# सङ्गतिफलम्

**गम्यते यदि मृगेन्द्रमन्दिरम्**

**लभ्यते करिकपोलमौक्तिकम् ।**

**जम्बुकालयगते तु प्राप्यते**

**वत्सपुच्छखुरचर्मखण्डनम् ॥**

**अन्वयः–**

यदि मृगेन्द्रमन्दिरं गम्यते (तर्हि) करिकपोलमौक्तिकं लभ्यते, जम्बुकालयगते तु वत्सपुच्छखुरचर्मखण्डनं प्राप्यते ।

**व्याख्या–**

मृगेन्द्रमन्दिरम् = सिंहगृहम्, गम्यते = ईयते, करिकपोलमौक्तिकम् = हस्तिगण्डस्थमुक्तादिकम्, लभ्यते = प्राप्यते, जम्बुकालयगते = शृगालागारप्राप्ते, तु = च, वत्सपुच्छखुरचर्मखण्डनम् = तर्णकलाङ्गूलशफाजिनांशः, प्राप्यते = लभ्यते ।

**कोशः**

मृगेन्द्रः = सिंहो मृगेन्द्रः पञ्चास्यो हर्यक्षः केशरी हरिः ।

मन्दिरम् = निशान्तवस्त्यसदनं भवनागारमन्दिरम् ॥

करी = मतङ्गजो गजो नागः कुञ्जरो वारणः करी ॥

कपोल = अधस्ताच्चिबुकं गण्डौ कपोलौ तत्परा हनुः ।

मौक्तिकम् = शोणरत्नं लोहितकः पद्मरागोऽथ मौक्तिकम् ।

जम्बुकः = शृगालवञ्चकक्रोष्टुफेरुफेरवजम्बुकाः ।

आलयः = गृहाः पुंसि च भूम्न्येव निकाय्यनिलयालयाः ।

वत्सः = शकृत्करिस्तु वत्सः स्यात् ।

पुच्छः =	पुच्छोऽस्त्री लूमलाङ्गूले ।

खुरः =	शफं क्लीबे खुरः पुमान् ।

चर्म =	अजिनं चर्म कृत्तिः स्त्री.... ।

**विग्रहः**

मृगेन्द्रमन्दिरम् = मृगाणामिन्द्रो मृगेन्द्रस्तस्य मन्दिरम् ।

करिकपोलमौक्तिकम् = करिणां कपोलौ, तयोर्मौक्तिकम् ।

जम्बुकालयगते = जम्बुकस्यालः, तस्मिन् गतः, तस्मिन् ।

वत्सपुच्छखुरचर्मखण्डनम् = चर्मणः खण्डम् चर्मखण्डम्, पुच्छं च खुरश्च चर्मखण्डश्च तेषां समाहारः पुच्छखुरचर्मखण्डनम्, वत्सस्य पुच्छखुरचर्मखण्डनम् ।

**वृत्तज्ञानम्–**

पद्यमिदं रथोद्धतावृत्ते विरचितमस्ति । तल्लक्षणं यथा- 'रात्परैर्नरलगै रथोद्धता' ।

**भावार्थः–**

सिंहस्य गुहायां बहुमूल्यं मौक्तिकादिकं प्राप्तुं शक्यते चेत् शृगालस्य निवासे तुच्छं वत्सपुच्छादिकं लभ्यते । अतो महतां सङ्गतिः कार्या ।

**जाड्यं धियो हरति सिञ्चति वाचि सत्यं**
**मानोन्नतिं दिशति पापमपाकरोति ।**
**चेतः प्रसादयति दिक्षु तनोति कीर्तिं**
**सत्सङ्गतिः कथय किं न करोति पुंसाम् ॥**

**अन्वयः–**

धियो जाड्यं हरति; वाचि सत्यं सिञ्चति; मानोन्नतिं दिशति; पापम् अपाकरोति; चेतः प्रसादयति; कीर्तिं दिक्षु तनोति । सत्सङ्गतिः पुंसां किं न करोति ? कथय ।

**व्याख्या–**

धियः = बुद्धेः, जाड्यं = मान्द्यं, हरति = नाशयति, वाचि = वचसि, सत्यम् = ऋतम्, सिञ्चति = निक्षिपति, मानोन्नतिं = स्वाभिमानं, दिशति = निर्दिशति, पापम् = कल्मषम्, अपाकरोति = अपसारयति, चेतः = चित्तम्, प्रसादयति = आनन्दयति, कीर्तिं = यशः, दिक्षु = काष्ठासु, तनोति = विस्तारयति, सत्सङ्गतिः = सज्जनसङ्गः, पुंसां = नराणाम्, किं न करोति = किं न सम्पादयति ? कथय = वद ।

**कोशः**

धीः = बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः ।

वाक् = ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती ।

दिक् = दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः ।

सत्यम् = सत्यं तथ्यमृतं सम्यगमूनि त्रिषु तद्वति ।

मानः = गर्वोऽभिमानोऽहङ्कारो मानश्चित्तसमुन्नतिः ॥

पापम् = अस्त्री पङ्कं पुमान् पाप्मा पापं किल्विषकल्मषम् ।

चेतः = चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः ।

कीर्तिः = यशः कीर्तिः समज्ञा च....।

पुमान् = स्युः पुमांसः पञ्चजनाः पुरुषाः पूरुषाः नरः ॥

**विग्रहः**

जाड्यम् = जडस्य भावः = जड + यञ्

सत्सङ्गतिः = सतां सङ्गतिः ।

**वृत्तज्ञानम्–**

पद्यमिदं वसन्ततिलकावृत्ते विरचितमस्ति । तल्लक्षणं यथा-ज्ञेया वसन्ततिलका तभजा जगौ गः । इति ।

**भावार्थः**

सत्सङ्गतिर्मनुष्याणां किं न करोति ? सर्वमपि करोति । सर्वमिति किम् ? मनसो मन्दतां दूरीकरोति । वचसि सत्यतां स्थापयति । स्वाभिमानं दृढीकरोति । पापं नाशयति । चित्तं रञ्जयति । कीर्तिं च विस्तारयति ।

**आरम्भगुर्वी क्षयिणी क्रमेण**
**लघ्वी पुरा वृद्धिमती च पश्चात् ।**
**दिनस्य पूर्वार्द्धपरार्द्धभिन्ना**
**छायेव मैत्री खलसज्जनानाम् ॥**

**अन्वयः**

खलसज्जनानाम् मैत्री क्रमेण आरम्भगुर्वी, पश्चात् क्षयिणी, पुरा लघ्वी, पश्चात् च वृद्धिमती, दिनस्य पूर्वार्द्धपरार्द्धभिन्ना छाया इव भवति ।

**व्याख्या**

खलसज्जनानाम् = दुर्जनसज्जनानाम्, मैत्री = मित्रता, क्रमेण = क्रमशः, आरम्भगुर्वी = पूर्वघनीभूता, पश्चात् = अन्तराले, क्षयिणी = विनाशशालिनी, पुरा = प्रारम्भे, लघ्वी = अघनीभूता, पश्चात् = समयान्तराले, च वृद्धिमती = दीर्घा, दिनस्य = दिवसस्य, पूर्वार्द्धपरार्द्धभिन्ना = पूर्वाह्नापराह्नविभक्ता, छाया इव = आकृतिरिव, भवति = सम्पद्यते ।

**कोशः**

खलः = पिशुनो दुर्जनः खलः ।

दिनम् = घस्रो दिनाहनी वा तु क्लीबे दिवसवासरौ ।

छाया = छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपः ।

**विग्रहः**

खलसज्जनानाम् = खलाश्च सज्जनाश्च, तेषाम् ।

पूर्वार्द्धपरार्द्धभिन्ना = पूर्वश्चासौ अर्द्धः पूर्वार्द्धः, परश्चासौ अर्द्धः परार्द्धः, पूर्वार्द्धश्च परार्द्धश्च पूर्वापरार्द्धौ, ताभ्यां भिन्ना ।

**वृत्तज्ञानम्**

पद्यमिदमुपजातिवृत्ते विरचितमस्ति । तल्लक्षणं यथा-

एकत्र पादे चरणद्वये वा पादत्रये वान्यतरः स्थितश्चेत् ।
तयोरिहान्यत्र तदूहनीयाश्चतुर्दशोक्ता उपजातिभेदाः ॥

**भावार्थः**

खलस्य मित्रता दिनस्य पूर्वार्द्धस्य छायेव आरम्भे दीर्घा पश्चाच्च लघ्वी भवति । परन्तु सज्जनस्य मित्रता दिनस्य पश्चार्द्धस्य छायेव आरम्भे लघ्वी पश्चाच्च दीर्घा भवति । अतः सज्जनैः सह मित्रता कर्तव्या न तु दुर्जनैः सह ।

**सत्सङ्गाद् भवति हि साधुता खलानां**
**साधूनां न हि खलसङ्गतः खलत्वम् ।**
**आमोदं कुसुमभवं मृदेव धत्ते**
**मृद्गन्धं न हि कुसुमानि धारयन्ति ॥**

**अन्वयः**

हि सत्सङ्गात् खलानां साधुता भवति, खलसङ्गतः साधूनां खलत्वम् न हि (भवति), (यतो हि), मृत् एव कुसुमभवम् आमोदं धत्ते, कुसुमानि मृद्गन्धं न धारयन्ति ।

**व्याख्या**

हि = निश्चयमेव, सत्सङ्गात् = सज्जनसंसर्गात्, खलानां = दुर्जनानाम्, साधुता = सज्जनता, भवति = सम्पद्यते, खलसङ्गतः = दुर्जनसम्पर्कात्, साधूनाम् = सताम्, खलत्वम् = दुर्जनता, न हि भवति = न सम्पद्यते, मृद् एव = मृत्तिका एव, कुसुमभवम् = सुमनसम्भूतम्, आमोदम् = सौरभम्, धत्ते = धारयति, कुसुमानि = पुष्पाणि, मृद्गन्धम् = मृत्तिकागन्धम्, न धारयन्ति = न गृह्णन्ति ।

**कोशः**

सत् = विद्वान् विपश्चिद्दोषज्ञः सन्सुधीः कोविदो बुधः ।

खलः = पिशुनो दुर्जनः खलः ।

मृत् = मृन्मृत्तिका प्रशस्ता तु मृत्सा मृत्स्ना च मृत्तिका ।

कुसुम = स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं सुमम् ।

आमोदः = विमर्दोत्थे परिमलो गन्धे जनमनोहरे । आमोदः सोऽतिनिर्हारी... ।

साधुः = महाकुलकुलीनार्यसभ्यसज्जनसाधवः

**विग्रहः**

सत्सङ्गात् = सतां सङ्गस्तस्मात् ।

साधुता = साधूनां भावः (साधु+तल्+टाप्+सु)

खलसङ्गतः = खलानां सङ्गः, ततः ।

कुसुमभवम् = कुसुमेषु भवः, तम् ।

मृद्गन्धम् = मृदः गन्धः, तम् ।

**वृत्तज्ञानम्**

पद्यमिदं प्रहर्षिणीवृत्ते विरचितमस्ति ।

**भावार्थः**

यथा मृत्तिका पुष्पस्य सुगन्धं गृह्णाति परन्तु पुष्पं मृत्तिकाया गन्धं न गृह्णाति तथैव सज्जनेन सह मेलनेन दुर्जनोऽपि सज्जनो भवति । परन्तु दुर्जनेन सह मेलनेन सज्जनो दुर्जनो न भवति । अतः सज्जनसङ्गतिः फलदायिनी भवति, दुर्जनसङ्गतिस्तु वृथैव ।

**सन्तप्तायसि संस्थितस्य पयसो नामापि न ज्ञायते**
**मुक्ताकारतया तदेव नलिनीपत्रस्थितं शोभते ।**
**स्वात्यां सागरशुक्तिमध्यपतितं तन्मौक्तिकं जायते**
**प्रायेणाधममध्यमोत्तमगुणः संसर्गतो जायते ॥**

**अन्वयः**

सन्तप्तायसि संस्थितस्य पयसः नाम अपि न ज्ञायते, नलिनीपत्रस्थितं तद् एव (पयः) मुक्ताकारतया शोभते । स्वात्यां सागरशुक्तिमध्यपतितं तत् (पयः) मौक्तिकं जायते । (अतः) प्रायेण अधममध्यमोत्तमगुणः संसर्गतो जायते ।

**व्याख्या**

सन्तप्तायसि = तप्तलोहखण्डे, संस्थितस्य = अवस्थितस्य, पयसः = जलस्य, नाम अपि = अभिधेयमपि, न ज्ञायते = न दृश्यते, नलिनीपत्रस्थितम् = कमलपत्रस्थम्, तत् पयः = पूर्वोक्तमेव पानीयम्, मुक्ताकारतया = मौक्तिकमिव, शोभते = विराजते, स्वात्याम् = स्वातीनक्षत्रसमये, सागरशुक्तिमध्यपतितम् = समुद्रशुक्तिमध्यगतम्, तत् पयः = पूर्वकथितम् नीरम्, मौक्तिकम् = मुक्ता, जायते = सम्पद्यते, अतः, प्रायेण = मुख्यतः, अधममध्यमोत्तमगुणाः = निम्नमध्यमोच्चगुणाः संसर्गतः = सङ्गत्याः, जायते = सम्पद्यते ।

**कोशः**

अयः = लोहोऽस्त्री शस्त्रकं तीक्ष्णं पिण्डं कालायसायसी । अश्मसारोऽथ ।

पयः = आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जलम् । पयः कीलालममृतं जीवनं भुवनं वनम् ।

नाम = आख्याह्वे अभिधानं न नामधेयं च नाम च ।

नलिनी = वा पुंसि पद्मं नलिनमरविन्दमहोत्पलम् । सहस्रपत्रं कमलं शतपत्रं कुशेशयम् ।

सागरः = समुद्रोऽब्धिरकूपारः पारावारः सरित्पतिः । उदन्वानुदधिः सिन्धुः सरस्वान् सागरोऽर्णवः ॥

**विग्रहः**

सन्तप्तायसि = सन्तप्तं च तदयस्तस्मिन् ।

नलिनीपत्रस्थितम् = नलिन्याः पत्रम्, तत्र स्थितम् ।

सागरशुक्तिमध्यपतितम् = सागरस्य शुक्तिः, तस्या मध्यम्, तस्मिन् पतितम् ।

अधममध्यमोत्तमगुणाः = अधमश्चासौ मध्यमश्चासौ उत्तमश्चासौ गुणः ।

**वृत्तज्ञानम्**

पद्यमिदं शार्दूलविक्रीडितवृत्ते विरचितमस्ति। तल्लक्षणं यथा- सूर्याश्वैर्मसजस्ततः सगुरवः शार्दूलविक्रीडितम् । इति ।

**भावार्थः**

पय एकमेव अस्ति । किन्तु भिन्नवस्तुनः संसर्गात् तस्य स्वरूपं परिवर्तितं भवति । यदा पयः तप्तेऽयःखण्डे पतति तदा सहसैव लुप्तो भवति । तद् दृष्टिपथमेव नायाति । यदा कमलपत्रे पतति तदा मौक्तिकमिव सुन्दरं दृश्यते, मौक्तिकं तु न जायते । पुनश्च तदेव पानीयं स्वातीनक्षत्रसमये सागरमध्यस्थशुक्तौ पतति चेन्मौक्तिकमेव सम्पद्यते । अधमः, मध्यमः, उत्तमो वा गुणः संसर्गत एव उत्पद्यते ।

## अभ्यासः

### श्रवणं भाषणं च

१. **अधस्तनपदानामनूच्चारणं कुरुत**

(क) मृगेन्द्रमन्दिरम् (ख) वत्सपुच्छखुरचर्मखण्डनम् (ग) करिकपोलमौक्तिकम्
(घ) जम्बुकालयः (ङ) अपाकरोति (च) आरम्भगुर्वी
(छ) पूर्वार्द्धपरार्द्धभिन्ना (ज) खलसज्जनानाम् (झ) मृद्गन्धम्
(ञ) सन्तप्तायसि (ट) नलिनीपत्रस्थितम् (ठ) सागरशुक्तिमध्यपतितम्
(ड) अधममध्यमोत्तमगुणाः

२. **शिक्षकाच्छ्रुत्वा पद्यमनुवाचयत**

सन्तप्तायसि संस्थितस्य पयसो नामापि न ज्ञायते
मुक्ताकारतया तदेव नलिनीपत्रस्थितं शोभते ।
स्वात्यां सागरशुक्तिमध्यपतितं तन्मौक्तिकं जायते
प्रायेणाधममध्यमोत्तमगुणः संसर्गतो जायते ॥

३. **गति–यति–लयनिर्धारणपुरःसरमधोऽङ्कितं पद्यं वाचयत**

गम्यते यदि मृगेन्द्रमन्दिरम्
लभ्यते करिकपोलमौक्तिकम् ।
जम्बुकालयगते तु प्राप्यते
वत्सपुच्छखुरचर्मखण्डनम् ॥

४. **अधस्तनश्लोकस्थपदानां शुद्धोच्चारणं कृत्वा प्रतिपदमर्थं श्रावयत**

आरम्भगुर्वी क्षयिणी क्रमेण
लघ्वी पुरा वृद्धिमती च पश्चात् ।
दिनस्य पूर्वार्द्धपरार्द्धभिन्ना
छायेव मैत्री खलसज्जनानाम् ॥

५. **पाठस्य चतुर्थस्य श्लोकस्यान्वयं सहपाठिनं श्रावयत ।**

६. **निर्दिष्टपदानां पर्यायान् कोशात् सङ्कलय्य श्रावयत**

(क) मन्दिरम् (ख) दिनस्य (ग) मौक्तिकम् (घ) अपाकरोति

७. **पुस्तकमवलम्ब्य अन्तिमस्य श्लोकस्य भावार्थं शिक्षकं श्रावयत ।**

८. **नीतिसम्बद्धं श्रुतपूर्वं श्लोकं कक्षायां श्रावयत ।**

९. **समूहं विधाय 'अस्माकमाचरणे नीतिपद्यानां प्रभावः' इति विषये मिथो विमर्शं कुरुत ।**

१०. **अधोलिखितौ श्लोकौ पठित्वा प्रश्नान् उत्तरयत**

उष्ट्राणां च विवाहे तु गीतं गायन्ति गर्दभाः ।
परस्परं प्रशंसन्ति अहो रूपमहो ध्वनिः ।
वैद्यराज ! नमस्तुभ्यं यमराजसहोदर !
यमस्तु हरते प्राणान् त्वं तु प्राणान् धनानि च ॥

(क) केषां विवाह आसीत् ?
(ख) के गीतं गायन्ति ?
(ग) गर्दभा उष्ट्राणां किं प्रशंसन्ति ?
(घ) वैद्यराजः कस्य सहोदर आसीत् ?
(ङ) यमः कान् हरते ?
(च) कः प्राणान् धनानि च हरते ?

११. **सखिभिः सह मिलित्वा संवादं पठत, समुचितं शीर्षकं च वदत**

(वसुधाया वार्षिकपरीक्षा दिनद्वयपूर्वं समाप्ता । इदानीं तस्या विद्यालयेऽवकाशो वर्तते । तस्या भ्रातुः परीक्षा शीघ्रं भविष्यति । स पठन् अस्ति । माता पाकप्रकोष्ठे वर्तते । सा नित्यपूजां करोति । तदैव सा वसुधामाह्वयति)

माता – वसुधे, कुत्रासि ?

वसुधा – अत्र दूरदर्शनप्रकोष्ठेऽस्मि मातः ।

माता – तत्र किं करोषि ?

वसुधा – दूरदर्शने व्यङ्ग्यचित्रं पश्यामि ।

माता – प्रातरेव कथं तत् पश्यसि ? किमपि न पठसि ?

वसुधा – पठनस्य काऽऽवश्यकता ? मम परीक्षा तु समाप्ता । यदा विद्यालयश्चलिष्यति तदा पठिष्यामि ।

माता – तन्न । विद्यालयसञ्चालनस्य समये एव पठितव्यमिति कथनं नोचितम् । पठनं तु नित्यकर्मेव मन्तव्यम् । नियमितपठनादेव लाभो भवति ।

वसुधा – तर्हि विद्यालयस्यावकाशसमये किं पठितव्यम्, मातः ?

माता – पठितानां पाठानामेव वारं वारमभ्यासः कर्तव्यः। भाषा–साहित्य–जीवनी–नीतिकथानां पुस्तकानि च यथासमयं पठितव्यानि। प्रातरेव दूरदर्शनस्य विलोकनाद् समयस्य दुरुपयोगो भवति।

वसुधा – तत्तु श्वस्तनदिवसात् पठिष्यामि। विद्यां वर्धयितुं को न वाञ्छति ? सम्प्रति किं कुर्याम् ?

माता – शोभनम्। शृणु, उद्यानात् पुष्पाण्यवचित्यानय। साम्प्रतं नित्यपूजायाः समयो वर्तते।

वसुधा – भ्राता नानयति ?

माता – स पठन्नस्ति। तस्य परीक्षा श्वो भविता।

वसुधा – परीक्षायाः पश्चात् स कार्यमेतत् करिष्यति ?

माता – अवश्यम्। तदाऽहं तमपि कार्यमेतत् कर्तुं कथयिष्यामि।

वसुधा – मम परीक्षायामपि भ्राता तत् करिष्यति, मातः ?

माता – कथं न करिष्यति ? तव परीक्षायामेतत् तस्यैव कार्यं भविष्यति।

वसुधा – गृहस्य कार्याणां यथाशक्ति सम्पादनमपि बालानां कर्तव्यमिति भवतीनामाशयः किम् ?

माता – आम् पुत्रि, सत्यं वदसि। तेन त्वादृशा जना भविष्यति स्वावलम्बिनो नागरिका भविष्यन्ति। देशाय अयं सुखदो विषयः।

## पठनम्

१. **लयमनुसृत्य अधस्तनं पद्यं सस्वरं वाचयत**

सत्सङ्गाद् भवति हि साधुता खलानां
साधूनां न हि खलसङ्गतः खलत्वम्।
आमोदं कुसुमभवं मृदेव धत्ते
मृद्गन्धं न हि कुसुमानि धारयन्ति॥

२. **प्रदत्तश्लोकस्य मौनपठनं विधायान्वयं प्रस्तुत**

जाड्यं धियो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं
सत्सङ्गतिः कथय किं न करोति पुंसाम्॥

३. **अधस्तनश्लोकं पठित्वा शिक्षकसाहाय्येन तदनुवर्तिनः प्रश्नानुत्तरयत**

प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारभ्य चोत्तमजना न परित्यजन्ति ॥

(क) नीचैः किमर्थं कार्यं नारभ्यते ?

(ख) उत्तमजनाः किं कुर्वन्ति ?

(ग) 'विघ्नविहताः' इति पदं कस्य विशेषणम् ?

(घ) 'उत्तमजनाः' इत्यस्य विग्रहं कुरुत ।

(ङ) 'प्रारभ्य' इत्यस्य सन्धिविच्छेदं कुरुत ।

(च) 'प्रारभ्यते' इति क्रियापदस्य धातुं लकारं प्रत्ययञ्च दर्शयत ।

(छ) 'प्रतिहन्यमानाः' इत्यस्यार्थं प्रकाशयत ।

(ज) 'विघ्नः' इत्यस्य कोशनिर्देशं कुरुत ।

(झ) 'खलु' इत्यस्य पर्यायं कथयत ।

(ञ) श्लोके कस्य वृत्तस्य प्रयोगः ?

(ट) अस्य श्लोकस्य भावार्थं निदर्शयत ।

४. **पाठं पठित्वा समस्तपदानि चिह्नीकुरुत ।**

५. **पाठस्य प्रथमस्य श्लोकस्य भावार्थं पठित्वा तत्र समाविष्टविषयान् सूत्ररूपेण कथयत ।**

६. **प्रदत्तं गद्यांशं पठित्वा तदनुवर्तिनः प्रश्नानुत्तरयत**

अस्माकं देशः कृषिप्रधानोऽस्ति । अधिका नैपालका ग्रामेषु निवसन्ति । ते कृषिकर्मणि स्वकीयं जीवनं समर्पयन्ति । कृषकाः परिश्रमेण कृषिकार्यं कुर्वन्ति । कृषिकर्म सर्वोत्तममस्ति यदनेन चराचरस्य हितं भवति । अन्नमहत्त्वं प्रस्तुवन् श्रीकृष्णो गीतायामकथयत्, 'अन्नाद् भवन्ति भूतानि ।' 'कलौ अन्नगताः प्राणाः' इत्यादीनि सुभाषितान्यप्यन्नं प्रशंसन्ति । अस्माकं देशे शरत्कालीनानि शस्यानि मुख्यतया धान्यानि भवन्ति । वसन्तकालीनानि शस्यानि प्रधानतो गोधूम-यव-चणक-मुद्ग-मसुरादीनि बहुविधानि भवन्ति । कृषक आदिवसं परोपकाराय कृषिकर्मणि व्यापृतो भूत्वा सर्वेषां प्राणपोषकमन्नमुत्पादयति । स उष्णस्य, शीतस्य, हिमस्य वर्षाणामपि चिन्तां विहाय सर्वाणि कष्टानि सोढ्वा निरन्तरं तत्र संलग्नो दृश्यते । अनेन परोपकारस्तु भवत्येव सहैव स्वास्थ्यलाभोऽपि जायते । ते वणिजः ये कार्पासस्फीतायामासन्दिकायामुपविश्य व्यापारं कुर्वन्ति

तेषामपेक्षया कृषकस्य स्वास्थ्यं सर्वथा समीचीनं भवति । कृषिः स्वाधीनतमो व्यवसायः । अत्र न कापि पराधीनता नापि बन्धनव्यसनिता च । सः स्वयमेव यथावसरं स्वकर्मणि प्रवृत्तो भवति । कृषकः क्षेत्रं कर्षति, बीजं वपति, यथासमयं जलेन सिञ्चति, समये समयेऽन्नादिकस्य सुरक्षाया व्यवस्थां विदधाति । अन्यत् किमपि घासादिकं चेन्निवारयति । तदुत्पन्नैः अन्नादिभिः पारिवारिकान् पालयति । घासादिभिः पशून् पोषयति । सम्पन्नः कृषको लवणातिरिक्तं सर्वं वस्तु कृषेः साहाय्यादुत्पादयति ।

## प्रश्नाः

(अ) **एकवाक्येन उत्तरयत**

(क) नेपालदेशे जीविकोपार्जनाय मुख्यतया किं क्रियते ?

(ख) अस्माकं देशे कान्यन्नानि उत्पाद्यन्ते ?

(ग) कृषकः किं किं सहते ?

(घ) कृषिः स्वाधीनतमो व्यवसायः पराधीनतमो वा ?

(ङ) सम्पन्नः कृषकः किमुत्पादयितुं न शक्नोति ?

(आ) **सङ्क्षेपेण प्रश्नानामुत्तरं दत्त**

(क) कृषकः किं किं करोति ?

(ख) अन्नविषये कीदृशानि सुभाषितानि प्राप्यन्ते ?

(ग) कृषकस्य स्वास्थ्यं किमर्थं समीचीनं भवति ?

(घ) अन्नाद् भवन्ति भूतानीति गीतावचनमुपयुक्तमनुपयुक्तं वा ?सकारणं लिखत ।

(ङ) स्वकीयसमाजे समुत्पादनशीलानां दशानामन्नानां नामानि लिखत ।

७. **अधोलिखितं हरिदेवस्य जीवनवृत्तं पठित्वा ततो दश सूत्रवाक्यानि लिखत**

हरिदेवमिश्रस्य जन्म १९८३ तमे विक्रमवर्षेऽभवत् । स महोत्तरीमण्डलस्य नैनहीग्रामेऽजायत । स बाल्यादेवाध्ययनशील आसीत् । पश्चात् स हरिदेवमिश्रः संस्कृतवाङ्मयस्य विशिष्टो विद्वानभवत् । मिश्रः संस्कृतव्याकरणे, न्यायशास्त्रे, साहित्यशास्त्रे च विशिष्टाध्ययनमकरोत् । तेन पण्डितप्रवरात् पद्मप्रसादभट्टराईमहोदयाद् हरेरामशुक्लाच्च नव्यन्यायः पठितः । तथैव तारानाथ-भट्टाचार्यात् साहित्यशास्त्रं पठितम् । स राधाकृष्णझा-ईश्वरनाथझामहोदयाभ्यां संस्कृतव्याकरणस्याध्ययनमकरोत् । असौ पाणिनीयव्याकरणविषयमवलम्ब्य “विद्यावारिधिः”

(पिएच्.डी.) इत्युपाधिमलभत । आङ्गलभाषायामपि हरिदेवः कुशल आसीत् । अनेन विद्यावारिधेः शोधप्रबन्धोऽपि आङ्गलभाषायामेव लिखितः ।

हरिदेवमिश्रः सदाचारी आसीत् । धर्मस्यानुशासनस्य च पालने स दृढ आसीत् । तस्य जीवनं त्यागमयमासीत् । स कदापि पदस्य सुविधायाच कृते न प्रायतत । व्यवहारे सरलता विचारे गभीरता च तस्यादर्श आसीत् । दीर्घकालपर्यन्तं सोऽध्यापने संलग्नोऽभूत् । स सर्वान् जनान् सस्कृतं पठितुं प्रेरयति स्म ।

हरिदेवः महेन्द्रसंस्कृतविश्वविद्यालस्य प्रथमोपकुलपतिरासीत् । स प्रज्ञाप्रतिष्ठानस्य सदस्यो भूत्वाऽपि कार्यमकरोत् । असौ त्रिभुवनविश्वविद्यालयस्य सेवाऽऽयोगस्य अध्यक्षपदे स्थित्वा कार्यमकरोत् । मिश्रमहोदयः २०४८ तमे विक्रमवर्षे प्राणानत्यजत् ।

समकालिकेषु संस्कृतविद्वत्सु हरिदेवमिश्रस्य पाण्डित्यं विशेषेण प्रशस्यते ।पाश्चात्त्यसाहित्यस्याध्ययनेन तस्य ज्ञानस्य क्षेत्रं विस्तीर्णमासीत् । स सर्वेषु जनेषु संस्कृतस्य ज्ञानमावश्यकं मन्यते स्म । अतः स साधारणशिक्षायां संस्कृतस्य समावेशनाय प्रयासमकरोत् । स छात्राणां गुरूणां च प्रेरणादायको विद्यते । नेपालस्य विद्वज्जनेषु हरिदेवमिश्रो विशेषेण स्मर्यते ।

## लेखनम्

१. **अधस्तनपदानां विग्रहं प्रदर्शयत**

| | |
|---|---|
| (क) मृगेन्द्रमन्दिरम् | (ख) वत्सपुच्छखुरचर्मखण्डनम् |
| (ग) करिकपोलमौक्तिकम् | (घ) जम्बुकालयः |
| (ङ) अपाकरोति | (च) आरम्भगुर्वी |
| (छ) पूर्वार्द्धपरार्द्धभिन्ना | (ज) खलसज्जनानाम् |
| (झ) मृद्गन्धम् | (ञ) सन्तप्तायसि |
| (ट) नलिनीपत्रस्थितम् | (ठ) सागरशुक्तिमध्यपतितम् |
| (ड) अधममध्यमोत्तमगुणः | |

२. **सन्धिविच्छेदं कुरुत**

| | | |
|---|---|---|
| (क) मृगेन्द्रः | (ख) जम्बुकालयः | (ग) पूर्वार्द्धः |
| (घ) सन्तप्तायसि | (ङ) मानोन्नतिम् | (च) अधममध्यमोत्तमगुणाः |

३. **अधस्तनपद्यस्यान्वयं लिखत**

सन्तप्तायसि संस्थितस्य पयसो नामापि न ज्ञायते
मुक्ताकारतया तदेव नलिनीपत्रस्थितं शोभते ।
स्वात्यां सागरशुक्तिमध्यपतितं तन्मौक्तिकं जायते
प्रायेणाधममध्यमोत्तमगुणः संसर्गतो जायते ॥

४. **गुरोः सहपाठिनां कोशस्य वा साहाय्येन प्रदत्तेषु प्रतिपदं द्वौ पर्यायौ निर्दिशत**

(क) पयः (ख) जम्बुकः (ग) नाम (घ) कुसुमम्

५. **अधस्तनस्य नीतिपद्यस्य सन्देशं सरलसुरभाषायां लिखत**

जाड्यं धियो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति ।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं
सत्सङ्गतिः कथय किं न करोति पुंसाम् ॥

६. **प्रदत्तगद्यांशतः पञ्च बोधप्रश्नान् निर्माय तेषामुत्तराणि लिखत**

सर्वेषु व्यवसायेषु कृषिकर्म सर्वोपरि वर्तते । सर्वेषां जीवनमन्नाधीनं भवति । यदि संसारे सर्वेऽपि वेतनभोगिनः स्युर्न कोऽपि कृषिकर्म कुर्याच्चेत् किं तर्हि रूप्यकजातैर्बुभुक्षा प्रशाम्यति ? कृषकातिरिक्तः कः साहसी वर्तते योऽन्नमुत्पाद्य स्वल्पेनैव मूल्येन परेभ्यो ददाति । गोमहिष्यादीनां पालनेन दुग्धं, दधि, घृतं तक्रं च प्राप्यते । मलमूत्रादिभिर्भूमिरुर्बरा भवति । कृषकपरिश्रमेणैव धरित्री सुजला, सुफला, सस्यश्यामला चास्ति । परन्तु वर्तमानकाले कृषिकर्मणो जनाः पराङ्मुखाः सन्ति । परिश्रमाधिक्यान्मूल्यस्याभावाच्च कृषकाः सदैव प्रताडिता भवन्ति । प्राथमिकताया अभावात्, आधुनिकप्रविधेः प्रयोगाभावाच्च कृषिकर्म प्रतिदिनं दुष्करं जायमानमस्ति । भूमिः सर्वत्र कृषिकर्मरहिता जायमाना अस्ति । जना अन्यकर्मस्वाकृष्टाः सन्ति । कृषिकर्मणो विदेशगमनं सुकरमिव प्रतिभाति वर्तमानकाले । यदि कृषकाः श्रमस्योचितं मूल्यं प्राप्स्यन्, तर्हि एतादृश्यवस्था न समभविष्यत् ।

७. **सान्वयं व्याख्यात**

आरम्भगुर्वी क्षयिणी क्रमेण
लघ्वी पुरा वृद्धिमती च पश्चात् ।
दिनस्य पूर्वार्द्धपरार्द्धभिन्ना
छायेव मैत्री खलसज्जनानाम् ॥

८. **अधस्तनपद्यस्य सप्रसङ्गं व्याख्यां कुरुत**

सत्सङ्गाद् भवति हि साधुता खलानां
साधूनां न हि खलसङ्गतः खलत्वम् ।
आमोदं कुसुमभवं मृदेव धत्ते
मृद्गन्धं न हि कुसुमानि धारयन्ति ॥

९. **अधो लिखितपद्यस्य शिक्षकसाहाय्येन वृत्तलक्षणं सङ्गमयत**

सन्तप्तायसि संस्थितस्य पयसो नामापि न ज्ञायते
मुक्ताकारतया तदेव नलिनीपत्रस्थितं शोभते ।
स्वात्यां सागरशुक्तिमध्यपतितं तन्मौक्तिकं जायते
प्रायेणाधममध्यमोत्तमगुणः संसर्गतो जायते ॥

## व्याकरणानुशीलनम्

१. **अधोलिखितसामग्रीं पठित्वा तत्पुरुषसमासस्य भेदविषये विमृशत**

प्रायेणोत्तरपदार्थप्रधानोऽयं समासः । परं कानिचिदुदाहरणानि पूर्वपदार्थप्रधानान्यपि समुपलभ्यन्ते । अतोऽयं समासो द्विविधः- पूर्वपदार्थप्रधानः, उत्तरपदार्थप्रधानश्च । तत्राद्यो यथा- जीविकां प्राप्तः = प्राप्तजीविकः, न धर्मः = अधर्मः । द्वितीयो यथा- राज्ञः पुरुषः = राजपुरुषः, कृष्णं श्रितः = कृष्णश्रितः ।

**तत्पुरुषभेदाः**

तत्पुरुषसमासः पुनर्द्विविधः- व्यधिकरणः, समानाधिकरणश्च । यत्र भिन्नविभक्तिकयोः पदयोर्योगः स व्यधिकरणतत्पुरुषसमासः । स चानेकविधः । तत्र-

**(क) प्रथमातत्पुरुषः**

पूर्वः कायस्य = पूर्वकायः
अपरः कायस्य = अपरकायः
अर्धं पिप्पल्याः = अर्धपिप्पली
अर्धं कौशितकी = अर्धकौशितकी
द्वितीयं भिक्षायाः = भिक्षाद्वितीयम्

जीविकां प्राप्तः = प्राप्तजीविकः

जीविकामापन्नः = आपन्नजीविकः

(ख) **द्वितीयातत्पुरुषः**

नीडं श्रितः = नीडश्रितः

वनमतीतः = वनातीतः

नरकं पतितः = नरकपतितः

ग्रामं गतः = ग्रामगतः

तरङ्गमत्यस्तः = तरङ्गात्यस्तः

सुखं प्राप्तः = सुखप्राप्तः

दुखमापन्नः = दुःखापन्नः

वर्षं भोग्यः = वर्षभोग्यः

(ग) **तृतीयातत्पुरुषः**

शङ्कुलया खण्डः = शङ्कुलाखण्डः

धान्येन अर्थः = धान्यार्थः

मासेन पूर्वः = मासपूर्वः

मात्रा सदृशः = मातृसदृशः

पित्रा समः = पितृसमः

मासेन ऊनम् = मासोनम्

वाचा कलहः = वाक्कलहः

वाचा निपुणः = वाङ्निपुणः

गुडेन मिश्रः = गुडमिश्रः

आचारेण श्लक्ष्णः = आचारश्लक्ष्णः

(घ) **चतुर्थीतत्पुरुषः**

यूपाय दारुः = यूपदारुः

कुम्भाय मृत्तिका = कुम्भमृत्तिका

कुण्डलाय हिरण्यम् = कुण्डलहिरण्यम्

ब्राह्मणाय अयम् = ब्राह्मणार्थः

द्विजाय इयम् = द्विजार्था

विप्राय इदम् = विप्रार्थम्

ब्राह्मणाय बलिः = ब्राह्मणबलिः

विप्राय हितम् = विप्रहितम्

गवे सुखम् = गोसुखम्

महिषाय रक्षितम् = महिषरक्षितम्

(ङ) **पञ्चमीतत्पुरुषः**

सिंहाद् भयम् = सिंहभयम्

व्याघ्राद् भीतः = व्याघ्रभीतः

चौराद् भीतिः = चौरभीतिः

अपयशसः भीः = अपयशोभीः

अर्थाद् अपेतः = अर्थापेतः

सुखाद् अपोढः = सुखापोढः

बन्धनाद् मुक्तः = बन्धनमुक्तः

वृक्षात् पतितः = वृक्षपतितः

अपवादाः - स्तोकान्मुक्तः, अन्तिकादागतः, दूरादागतः, कृच्छ्रात्प्राप्तः ।

(च) **षष्ठीतत्पुरुषः**

राज्ञः पुरुषः = राजपुरुषः

वृक्षस्य मूलम् = वृक्षमूलम्

(छ) **सप्तमीतत्पुरुषः**

अक्षेषु शौण्डः = अक्षशौण्डः

पाटलिपुत्रे सिद्धः = पाटलिपुत्रसिद्धः

रणे निपुणः = रणनिपुणः

काव्ये कुशलः = काव्यकुशलः

मासे देयम् = मासदेयम्

वाचि पटुः = वाक्पटुः

आतपे शुष्कः = आतपशुष्कः

स्थाल्यां पक्वः = स्थालीपक्वः

(ज) **उपपदतत्पुरुषः**

| | | |
|---|---|---|
| कुम्भं करोति | = | कुम्भकारः |
| गृहे तिष्ठति | = | गृहस्थः |
| मनो हरति | = | मनोहारी |
| सत् कृत्वा | = | सत्कृत्य |
| कुत्सितः पुरुषः | = | कुपुरुषः |

(झ) **नञ्तत्पुरुषः**

| | | |
|---|---|---|
| न धर्मः | = | अधर्मः |
| न ईशः | = | अनीशः |
| न दृष्टः | = | अदृष्टः |
| न समर्थः | = | असमर्थः |
| न पण्डितः | = | अपण्डितः |
| न धीरः | = | अधीरः |

(ञ) **कर्मधारयतत्पुरुषः**

समानाधिकरणं तत्पुरुषसमासं कर्मधारयनाम्ना व्यवह्रियते । यत्र समानाधिकरणप्रथमान्तपदयोर्योगः स कर्मधारयः । समासेऽस्मिन् विशेष्यपूर्वपदोपमानोत्तरपदयोः पूर्वपदार्थस्य तदन्यस्त्र चोत्तरपदार्थस्य प्राधान्यम् । तत्र-

(अ) **विशेषणपूर्वपदः**

| | | |
|---|---|---|
| नीलञ्च तद् वस्त्रम् | = | नीलवस्त्रम् |
| रक्ते च ते पुष्पे | = | रक्तपुष्पे |
| पक्वानि च तानि फलानि | = | पक्वफलानि |
| पुष्पिता चासौ लता | = | पुष्पितलता |
| छिन्ने च ते लते | = | छिन्नलते |
| गृहीताश्च ताः शाट्यः | = | गृहीतशाट्यः |
| उन्नतश्चासौ वृक्षः | = | उन्नतवृक्षः |
| उन्नतौ च तौ वृक्षौ | = | उन्नतवृक्षौ |

(आ) **विशेष्यपूर्वपदः**

| | | |
|---|---|---|
| ब्राह्मणश्चासौ श्रोत्रियः | = | ब्राह्मणश्रोत्रियः |
| गौश्चासौ वशा | = | गोवशा |

गौश्चासौ गर्भिणी = गोगर्भिणी

(इ) **विशेषणोभयपदः**

शीतञ्च तदुष्णम् = शीतोष्णम्

कृतञ्च तदकृतम् = कृताकृतम्

पूर्वं स्नातः, पश्चादनुलिप्तः = स्नातानुलिप्तः

(उ) **उपमानपूर्वपदः**

मेघ इव श्यामः = मेघश्यामः

विद्युदिव चपला = विद्युच्चपला

अञ्जनमिव नीलम् = अञ्जननीलम्

(ऊ) **उपमानोत्तरपदः**

नृपः चन्द्र इव = नृपचन्द्रः

ना सिंह इव = नृसिंहः

राजा हंस इव = राजहंसः

नर इन्द्र इव = नरेन्द्रः

(ऊ) **आरोप्योत्तरपदः**

मुखमेव चन्द्रः = मुखचन्द्रः

मन एव मृगः = मनोमृगः

विद्या एव धनम् = विद्याधनम्

(ए) **भावनापूर्वपदः**

गुण इति बुद्धिः = गुणबुद्धिः

शत्रुरिति धीः = शत्रुधीः

मित्रमिति दृष्टिः = मित्रदृष्टिः

आलोक इति शब्दः = आलोकशब्दः

(ऐ) **द्विगुसमासः**

यत्र सङ्ख्यावाचकशब्देन सह समाहारार्थे समासः स द्विगुसमासः। स च द्विविध एकपदभावी अनेकपदभावी च। यथा-

(अ) **एकपदभावी**

त्रयाणां लोकानां समाहारः = त्रिलोकम्, त्रिलोकी ।

पञ्चानां मूलानां समाहारः = पञ्चमूलम्, पञ्चमूली ।

(आ) **अनेकपदभावी**

चतस्रो दिशः = चतुर्दिशः ।

त्रयो लोकाः = त्रिलोकाः ।

२. **अधस्तनशब्दानां विग्रहं प्रदर्शयत**

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| (क) | भवनाश्रितः | (ख) | कालातीतः | (ग) | कुण्डपतितः | (घ) | मासभोग्यः |
| (ङ) | वर्षपूर्वः | (च) | पितृतुल्यः | (छ) | भ्रातृसमः | (ज) | कृष्णार्थम् |
| (झ) | भूतबलिः | (ञ) | चोरभीतिः | (ट) | पापमुक्तः | (ठ) | सर्पमाता |

३. **समस्तशब्दान् लिखत**

| | | | | | |
|---|---|---|---|---|---|
| (क) | पीतं च तदम्बरम् | (ख) | वचनेन बद्धः | (ग) | विहितं च तदविहितम् |
| (घ) | नरः सिंह इव | (ङ) | पञ्चानां नदीनां समाहारः | (च) | गुण इति बुद्धिः |

४. **शिक्षकसाहाय्येन अधोलिखितपाठात् कृदन्तशब्दान् विचित्य तेषां प्रयोगं दर्शयतः**

सङ्गं त्यक्त्वा कार्यं कर्तव्यमिति श्रीकृष्णस्य निर्देशः । कार्यं कुर्वाणाः कृषकाः कोलाहलं कुर्वन्ति । वर्तमानेन कालेन प्रवर्तन्ते विचक्षणाः । श्रीकृष्णेन कुत्रापि गतेन भाव्यम् । दशरथः प्रलपति, "हंहो ! मां विहाय रामः क्व गतः, कुत्र लक्ष्मणो यातः, सत्यं सीतापि गता ।" इत्थं विलपति तस्मिन् कौशल्या निवेदयति-अलं विलापेन । त्रेतायां रामो वनं जगाम किमिति कश्चन पृष्टवान् । सुरेशो मात्रा सह गृहं गतवान् । स्नात्वाऽनुलिप्य भक्तो मन्दिरं प्राप्तवान् । ततः प्रणम्य सद्भक्त्या त्यक्तुं पापान्यशेषतः । तपस्तप्तुं मनश्चक्रे शिवभक्तिपरायणः । त्वया मया च कर्तव्यं सत्कार्यं सर्वसौख्यदम् । ध्यातव्यं मनसा देवं सर्वकामार्थसिद्धिदः । कर्तव्यं करणीयं च मदीयं निर्दिशन्तु माम् । प्रार्थयामास सच्छिष्यो गुरुं विनतकन्धरः । तिष्ठन्नेकपदेनैव व्रजन् हरिहरान्तिके । अहर्निशं कर्म कुर्वन् सद्भक्तः सुखभाग्भवेत् ।

५. **उदाहरणं दृष्ट्वा कोष्ठकसङ्केतानुसारेण वाक्यानि परिवर्तयत**

रामः ओदनं खादति । (उत्तमपुरुषः)

उत्तरम्- अहमोदनं खादामि ।

(क) पिता कृषिकर्म कुर्वन् अस्ति । (स्त्रीलिङ्गे)

(ख) सखायो विद्यालयं गच्छन्तः सन्ति । (मित्रशब्दस्य प्रयोगेण नपुंसकलिङ्गे)

(ग) ते कार्यं कुर्वन्तु । (मध्यमपुरुषे)

(घ) विद्वान् सर्वत्र पूज्यते । (बहुवचने)

(ङ) पृथ्वी सूर्यं परिक्रमते । (विध्यर्थे)

(च) भिक्षामट गां चानय । (निषेधार्थे)

## रचनात्मकं कार्यम्

१. **अधोलिखितपाठात् तद्धितान्तशब्दान् सङ्कलय्यानुच्छेदमेकं रचयत**

दाशरथिः पितुराज्ञया वनं जगाम । वासुदेवः कंसं जघान । सौमित्रिः राममन्वगच्छत् । विष्णुर्वैनतेयं वाहनं स्वीचकार । कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति । गाङ्गो भीष्मपितामह इति नाम्ना प्रसिद्धः । द्वैमातुरः षाण्मातुरश्च भ्रातरौ आस्ताम् । काषायं परिधाय साधुः परिभ्रमति । तपस्विनः प्रातरादित्यं नमस्कुर्वन्ति । चैत्रे मासि सुखदो वायुः प्रवहति । काकं दृष्ट्वा बालकाः पाषाणप्रहारं कुर्वन्ति । सूर्यो नैशं तमो विनाशयति । गोमान् गोरसमादाय याति । एष दण्डी धनं याचते । दण्डिको धनिकं प्रार्थयते । तारकितं नभो विरहिणां चेतांस्युत्कण्ठितानि विदधाति । विद्वत्त्वं च गुरुत्वं च प्रतिष्ठां प्रति साहाय्यं गच्छतः । लघुता शिशुता च सुखाय भवतः । सत्सङ्गतिर्धियो जाड्यं हरति । ततः परावृत्य कियान् मार्गोऽवशिष्यते ? तदानीं चतुर्धा विभज्य ग्रामीणस्तद्वस्तु पाश्चात्त्येभ्यो ददाति ।

२. **अधः प्रदत्तानि पदानि प्रयुज्य भाषाविषये अनुच्छेदमेकं रचयत**

जाड्यम्, वाङ्मयम्, शृण्वन्, वक्ता, पठितव्यम्, लेखनीयम्, विद्वत्त्वम्, मेधावी